CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रजतजयन्ती ग्रन्थमाला-४

मानुषत्वाद् दैविकत्वं प्रति

के० पी० ए० मेनोन्

राष्ट्रिय-संस्कृत-संस्थानम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानुषत्वाद् दैविकत्वं प्रति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रजतजयन्तीग्रन्थमाला- ४

मानुषत्वाद् दैविकत्वं प्रति

28-1-98

के. पी. ए. मेनोन्

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
557

राष्ट्रीय-संस्कृत-संस्थानम्
नई दिल्ली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशकः—
डॉ. कमलाकान्तमिश्रः
निदेशकः
राष्ट्रिय-संस्कृत-संस्थानम्
ए-४०, विशाल एन्क्लेव, राजा गार्डन
नई दिल्ली-११००२७

© राष्ट्रिय-संस्कृत-संस्थानम्

रजतजयन्तीग्रन्थमाला ।

वर्षः १९९५

विक्रम संवत् २०५२

मूल्यम्:

557

मुद्रकः—
नागप्रकाशकः
११ ए/यू. ए. जवाहर नगर, दिल्ली-११०००७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Dedicated

to the sacred and everfresh memory
of my beloved brother

K. P. U. Menon

Who made me realise
that Valmiki's ideals of fraternal love
are capable of fulfilment
even in this world we live in.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्यागमस्योद्घोषं परिदधत् स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं रजतजयन्तीवर्षं पूरयतीति विज्ञाय समेषां विदुषां संस्कृतानुरागिणाञ्च चेतोऽवश्यं मोमुद्येत।

प्राचीनशास्त्राणां ज्ञाननिधीनां संरक्षणे संवर्धने संस्कृतपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारार्थं संस्थानस्यावदानं कियदित्यत्र संस्कृतलोक एव प्रमाणम्।

अस्मिन् रजतजयन्तीशुभावसरे नानाप्रान्तेषु विद्योतमानैः विद्वत्तल्लजैः विविधशास्त्रविषयानवलम्ब्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य सङ्ग्रथ्य च **रजतजयन्तीग्रन्थमालात्वेन** तत्रभवतां समक्षं प्रस्तूयामन्दानन्दोऽनुभूयते।

ग्रन्थेऽस्मिन् लेखकप्रवराः **मानुषत्वाद् दैविकत्वं प्रति** श्रीरामचन्द्रस्य मानुषत्वं मूलतो निर्वर्णयन्तो यथाक्रमं तस्य देवत्वं सम्प्रदर्शयन्ति। आदिकविना वाल्मीकिना चित्रितो नरोत्तमो रामः कथं देवत्वमधिरूढ इति प्रश्नस्य समाधानमेव प्रमुखमाभिमुख्यं प्रकृतग्रन्थस्य। ग्रन्थोऽयं शिक्षादक्षैः प्रशासकमूर्धन्यैः भारतसर्वकारस्य पूर्वरक्षासचिवैः **डॉ. के. पी. ए. मेनोनमहोदयैः** महता श्रमेण प्रणीत इति तेभ्यः कार्तज्ञ्यं निवेद्यते संस्थानेन।

ग्रन्थमालायाः आयोजनप्रकाशनादिकार्येषु बहुधोपकृतवन्तः अस्माकं सहयोगिनः विशेषतः डॉ० सवितापाठक - डॉ० रा. देवनाथन् - प्रभृतयः नितरां साधुवादार्हाः। नागप्रकाशकाधिकारिणः अल्पीयसि काले ग्रन्थममुं सम्मुद्र्य यथासमयं विमोचनाय च प्रस्तूय अस्माकं सङ्कल्पसिद्धौ विशिष्टसहयोगं कृतवन्तः अतस्ते धन्यवादार्हाः।

दिनाङ्कः ११.१०.१९९५
कार्तिककृष्णतृतीया, २०५२

कमलाकान्तमिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानं, नवदेहली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राक्कथनम्

प्रायः दशसंवत्सरात्पूर्वं अमेरिका देशतो मम दर्शनार्थं यदा मत्पुत्र आगतवानासीत्तदाहं सदुपदेशप्रतिपादकस्य कस्यचन पाश्चात्यसाहित्य ग्रन्थस्याध्यनंकृतवानासम् । ग्रन्थोऽयं आङ्गलभाषामहाकविना अलक्साण्टर पोप् महोदयेन ग्रथितानां निबन्धानां प्रशंसात्मकं निरूपणमासीत् । अपि चास्य निरूपक आसीत् षेक्स्पियरु महोदयस्य निरूपकेषु प्रसिद्धः विल्सण् नइट्महोदयः । तन्मतानुसारेण पोप् महोदयस्य निबन्धेषु सदुपदेशात्मकत्वं सम्यक्तया दृश्यते ।विना सदुपदेशात्मकत्वं यःकोऽपि साहित्य निबन्धः काव्यो वा समीचीनतां पूर्णताञ्च प्राप्तुं न प्रभवतीत्येव विल्सण् महोदयस्याशयः । पोप् महोदयस्य कृतिषु सदुपदेशात्मकत्व प्रतिपादनं प्रधानतया दृश्यत इत्यस्मात्कारणाद्विमर्शकैरस्य सत्कवित्वं अस्य ग्रन्थानां श्लाधनीयत्वञ्चाङ्गीकृतमस्ति ।

ईदृशानामुपदेशात्मकसन्देशानां दृश्यमानत्वादेव षेक्स्पियरु, गोथे, दान्ते, विर्जिल् प्रभृतीनां पाश्चात्यसाहित्यकाराणां तथा ग्रीक्नाटककर्तृणाञ्च ग्रन्थाः सहृदयैः परमं श्लाधनीया दृश्यन्ते ।

विषयमिदं मत्कृते अतीवाह्लादकारी तथाश्चर्यकारीचासीद्यत्पाश्चात्य साहित्यनिरूपका अपि विना कामपि विचिकित्सां साहित्यकृतिष्वन्तर्भूतस्य उपदेशात्मकत्वस्य स्वीकारःकृतवन्त इति ।इममेव सिद्धान्तं मानदण्डत्वेन स्वीकृत्य मया भारतीयसाहित्यप्रपञ्चे अस्याः सदुपदेशात्मकतायाः पर्यवेक्षणं विधत्तम् । गतेषु त्रिषु दशाब्देषु कालिदासं तद्ग्रन्थाञ्चाध्ययनं कृत्वा मयैतदवगतं यन्नास्ति तत्रैकोऽपिग्रन्थः कालिदासस्य यत्र सदुपदेशात्मकत्वं न विद्यते । धर्मार्थ-काम-मोक्ष इति चतुर्विधपुरुषार्थप्राप्तेर्मार्गदर्शकान्यनेकान्युपदेशानि रामायणादिषु-भारतीयेतिहासेषु दृश्यन्त इत्यत्र नास्ति संशयः ।

विषयमिममवलम्ब्य मन्मनसि विचारः प्रचलति सति दिल्लीसंस्कृत अकाडमी द्वारा वाल्मीकिजयन्ती समारोहे निमन्त्रितोऽहं विषयमिममेवावलम्ब्य निबन्धमेकं पठितुं प्रेरितवान् । तदा मया तस्मिन् समारोहे "आदिकवेरांदर्शपुरुषः समाजश्च" इति विषयमवलम्ब्य निबन्धःपठितः ।

अयमासीन्महान्सन्तोषस्य विषयो मत्कृते यन्मम निबन्धःश्रोतृणां मनसि विषयमिमं प्रति श्रद्धामङ्कुरितुं समर्थ आसीदिति ।अपि च विषयमिममवलम्ब्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चर्चापि तत्र प्रचलिता। चर्चायां तस्यामेकस्य पण्डितस्याभिप्राय आसीद्यद्वाल्मीकेर्मनसि यो रामस्य व्यक्तिप्रभावसङ्कल्प आसीद्यद्रस्य वास्तविकं प्रकाशनं मम निबन्धे एवासीदिति।

अत्रान्तरे कस्यचन पत्रिकाकारस्याभ्यर्थनानुसारं विषयमिममवलम्ब्य निबन्धयुगलं निर्मातुमुद्यता मया विषयमेतदवगतं यदस्मिन् विषये निबन्धद्वयं न पर्याप्तं भविष्यति अपि तु पुस्तकमेकमेवास्य कृते आवश्यकमस्तीति। अत एवास्य ग्रन्थस्य निर्माणे मया श्रद्धा दत्ता।

आदिकविना वाल्मीकिना रामायणे विद्यमानानां कथापात्राणां स्वभाव चित्रीकरणं यथा समाचरितं तदनुसृत्यैव ग्रन्थेऽस्मिन् कथापात्ररूपीकरणं कर्तुं प्रयत्नो मया कृतः।ग्रन्थारम्भे विषयमिदं मयावधारितमस्ति यल्लोके मानवेषु सर्वोत्तमः कोऽस्तीति विषये वाल्मीकेर्मनसि औत्सुक्यमासीत् अपिचास्य प्रश्नस्य समाधानं नारदात्सम्प्राप्तोऽयं यदिक्ष्वाकुवंशप्रभवस्यरामस्य नरोत्तमत्वम्। अनन्तरं तत्र प्रत्यक्षीभूतेन ब्रह्मणा ससीतां स चलक्ष्मणं रामस्य कथां निर्मातुंप्रेरितो वाल्मीकिः नूनमेवासीदियं कथा कस्यचन श्रेष्ठपुरुषस्य यो मानवो भूत्वापि स्वक्रोधेन देवानपि प्रकम्पयितुंसमर्थोऽस्ति।

इक्ष्वाकुवंशावतंसकस्य दशरथमहाराजस्य पुत्ररूपेणास्य जन्माभूत्। तत्तत्कालक्रमानुसारेणास्य विद्याध्ययनं आयोधनकलाभ्यासश्चानेन सम्पादितः। बाल्यावस्थायामनेन कदाप्यमानुषिकसमाचरितानि कार्याणि न कृतमासीद्यथास्यानन्तरकालीनावतारपुरुषेण श्रीकृष्णेन बाल्येनसमाचरितम्। स्व विद्याभ्यासानन्तरं यथा सन्दर्भमेवानेन राक्षसैस्सह युद्धःकृतः। तदनन्तरमनेन देवैरपि दुर्जयो रावणो हतः। कथमनेनेदृशी महती स्थितिः सम्प्राप्ता। मनुष्यो भूत्वापि देवैरपि दुष्करं यत्कर्म समाचरितुमयं प्रभवति। वाल्मीकिना चित्रीकृतो रामः कथममानुषस्थितिं सम्प्राप्तः। तदेव मया ग्रन्थेऽस्मिन् प्रतिपादयितुं प्रयत्नः क्रियते।

प्रायः तत्कालीन समाजस्य चित्रीकरणे वाल्मीकिना परिश्रमो न विधत्तः। परन्तु कैश्चिदुदाहरणैः कस्यचनमातृकासमाजस्य चित्रीकरणं तथा तस्मिन् समाजे दृश्यमानानां स्वाभाविकवैपरीत्यानां प्रकाशनमेव वाल्मीकिनात्र कृतम्। समाजस्यास्य चित्रीकरणे एव रामायणस्य सदुपदेशात्मकत्वं प्रकाशयति। रामायणे प्रतिपादितानां उपदेशात्मकतत्वानां पर्यवेक्षणमेवात्र मम परिश्रमः। सहृदयैरनुवाचकैरेव ममोद्यमस्य साफल्यं निर्णेतव्यम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रस्तावना

रामायणात्मके कथाकाव्ये किं वा आदकिविः कमप्यादर्शपुरुषं तादृशं नृपतिं च समग्रतया वर्णयितुं यतते स्म ? किं समकालिकमादर्शनिष्ठमथवा आदर्शपरत्वेन भावनाभावितं कञ्चन समाजं व्यवस्थापितुमुद्दिश्य वर्णयितुं स प्रायतत ? स्वनिर्मिते काव्ये उपदेशदातृत्वं कीदृशमादिकविना सङ्कल्पविषयीकृतमित्यमुं विषयं समग्रतया बोद्धुमेतौ द्वौ प्रश्नौ विशेषतः समाधेयौ ॥

प्रथमत एको निर्णय अत्यावश्यक एव । न कस्यापि श्रेष्ठकाव्यस्य रचना उपदेशपरत्वं विना संम्भवितुमर्हति । एषा विचारधारा न केवलं पौरस्त्यानां काव्यशास्त्रपण्डितानां, अपि तु विवेकमतीनां चिन्तादक्षाणां पाश्चात्यसाहित्य-मर्मज्ञानां चास्तीत्यत्र प्रस्ताव्यो विषयः ॥

ईदृशं तत्त्वं यदि केवलं श्रेष्ठकाव्यस्य निकषोपलत्वमावहति तर्हि इतिहास-विषये ततः परमपि तथाविधत्वं पूर्वाधिकं समीचीनम् ॥ पुराण इति सुप्रसिद्धेन काव्यग्रन्थजातात् पृथक्तया रामायणमहाभारते इतिहाससंज्ञा ऽभ्युपेता वर्तते । इति-हासस्य लक्षणं प्रख्यातम् -

धर्मार्थ काममोक्षाणा-
मुपदेशसमन्वितम् ।
पूर्ववृत्तं कथायुक्त-
मितिहासं प्रचक्षते ॥

"इतिह" इत्यव्ययात्समुत्पन्न ऐतिह्य शब्दः ततः परमितिहासश्चेति ॥

पारम्पर्योपदेशस्या-
दैतिह्यमितिहाव्ययम् ॥- इतयमरः ।

काव्यशास्त्रज्ञानामयमभिसन्धिः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" इति ॥

उपदेशपरत्वमितिहासे प्रमुखस्थानमावहति ॥ काव्यकारः प्राचीनान् प्रख्यातान् ग्रन्थानुपजीव्य स्वकृतिनिर्माणे स्वतन्त्रो यतः स्वकीयमुद्देश्यं साधयितुं स प्रभवेत । बहुभिर्दैनन्दिनपारायणत्वेन धार्मिक ग्रन्थत्वेन चाऽदृतं रामायणकाव्यम् ॥ कोटिशोनुवाचकाः रामायणग्रन्थमधीयते, तेष्वेकप्रतिशतात्मकानामपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साक्षाद्वाल्मीकिरामयणेन सह मौलिकरूपेण वा परिवर्तन रूपेण वा परिचयः कदाचित्स्यात् ॥ सर्वेष्वपि रामायणपादकग्रन्थेषु, वाल्मीक्युपज्ञत्वमभ्युपेतं वर्तते यद्यपि प्रतिपादितकथानां वृत्तानाञ्च वैविध्यं दृश्यते। भूयांसो रामायणग्रन्था अध्यात्मरामायणमुपजीव्य लिखिता इति प्रतिभाति ॥ तदध्यात्मरामायणञ्चाज्ञातकर्तृकमिति मन्तयम् ॥ ब्रह्माण्डपुराणेऽन्तर्गतं वर्तत इति हेतोः व्यासकर्तृत्वमस्य ग्रन्थस्र्य सिद्धं स्यात् ॥ प्रायः पण्डिता अध्यात्मरामायणं श्रीमद् भागवतानन्तरमेव कदापि विरचितमिति मन्यन्ते, दाक्षिणात्यः कश्चन कविः तत्कृतवानित्यपि केषाञ्चिदभ्यूहः ॥

अध्यात्मरामायणग्रन्थे श्रीरामचन्द्रः भगवतो विष्णोः सम्पूर्णावताररूपेणाभ्युपेत इति होतोस्तस्य मानवीयगुणभूयिष्ठत्वं तद्वत् स च समाजो यस्मिन् रघुनाथस्य जीवनमासीत् सोपि चर्चाविषयो न भवितुमर्हति। एतद्वीक्षणकोण्या वाल्मीकिरूपिणा कविना समुचिता श्रद्धा नाधिगता ॥

॥ मनुष्यकथानुगायकः ॥

यदा वयं रामायणग्रन्थस्य सिंहावलोकनं कुर्मः तदाऽस्माकं मार्गदर्शकस्तद्ग्रन्थमूलकएव भवतु॥ कथामुखादेवास्माकं चर्चामारभामहे ॥ महातपस्वी वाल्मीकिः स्वाध्यायनिरतं वाग्विदां वरं मुनिपुंगवं नारदमुपगम्य प्रश्नं कुरुते- "सांप्रतमस्मिन् लोके जीवतां शारीरिकैर्मानसिकैरात्मनिष्ठैश्च गुणविशेषैःसुभूषितो नरश्रेष्ठः को वा वर्तते-" इति ॥

एतच्छ्रुत्वा नारदः प्रत्युवाच ॥

बहवो दुर्लभाश्चैव
ये त्वया कीर्तिता गुणाः ॥

परन्तु इदानीं राज्यशासनं कुर्वतः इक्ष्वाकुसमुद्भवस्य श्रीरामचन्द्रस्य प्रस्तावः अस्मिन् सन्दर्भ औचित्यमावहतितराम् ॥ रघूत्तमस्य सर्वानपि गुणविशेषानुपन्यस्य तम् सर्वगुणोपेतं कौसल्यानन्दवर्धनं कथयन् सादृश्यकल्पनां च कुरुते-

समुद्र इव गाम्भीर्ये
धैर्येण हिमवानिव।

विष्णुना सदृशो वीर्ये
सोमवत्प्रियदर्शनः ॥

कालाग्निसदृशः क्रोधे
क्षमया पृथिवीसमः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धनदेन समस्त्यागे
सत्ये धर्म इवापरः । (बा. I.-17-18)

तदनन्तरं संक्षिप्य रामकथां प्रतिपादयति। अभिषेकविषये पितुर्दशरथस्य धर्माद्व्यतिचलनं मा भूदिति सङ्कल्प्य वनवासं वृणीते- इत्यारभ्य ॥

मुनिद्वयसंवादसमये श्रीरामचन्द्र अयोध्यायां शासनं कुर्वन्नासीत्।

दशवर्षसहस्राणि
दशवर्षशतानि च।
रामो राज्यमुपासित्वा
ब्रह्मलोकं प्रयास्यति ॥ (बा. I.-97)

एतद्रीत्या नारदः समाप्तिं करोति ॥

एतस्मिन् संक्षिप्ते चरितोपन्यासे श्रीरामस्य ईश्वरावतारत्वं प्राकट्येन न सूचितमिति तत्वमस्मच्छ्रद्धामर्हति ॥ रामः ब्रह्मलोकं प्रयास्यतीत्येव मुनिः प्राह, न ब्रह्मलोकं प्रतिगच्छतीति ॥ यद्येवमकथयिष्यत् इश्वरावतारत्वं नारदाभिप्रेतमिति सिद्धमभविष्यत् ॥

वाल्मीकिमहर्षिणा वर्णिते श्रीरामे दैविकत्वलेशमपि नास्तीति सत्वरमस्माकं निर्णयः कथञ्चिदपि मा भूत् ॥ आदिकाव्ये ये ये अंशाः रामस्य दैविकत्वप्रकटनपराः ते सर्वे कैश्चित् प्रक्षिप्ता इत्यपि मा वदामः । एतं विषयमधिकृत्य तत्समुचितस्थाने चर्चां विदध्यामः परन्तु स्थूणानिखनन्यायेन निर्णेतव्यमेतत् वाल्मीकेर्मनसि सम्पूर्णः कश्चन मानवश्चित्रीकृतो वरीवर्तते स्म ॥ भक्ताग्रगण्यो वाल्मीकिः स्वकीयोपदेशपरत्वोद्देश्येनादर्शभूतस्य कस्यचन मानवस्य कथां कथयितुमेव प्रवर्तते ॥

प्रख्यात इक्ष्वाकुवंशे रामस्य जन्म समभवत् ॥ तद्वंशीयाः केचिदतिमानुषप्रभावसम्पन्ना आसन्, देवानां साहाय्यमप्याचरन्ति स्म ॥ स्वयं दशरथः, शम्बरेण सह युद्धं कृत्वा इन्द्रस्य साहाय्यं चक्रे ॥ केषुचित्पुराणेषु कालिदासस्य रघुवंशे च दशरथस्य पितामहत्वेनोपन्यस्तो रघुः इन्द्रस्य वज्रायुधमपि सोढुं शक्तआसीत् स्वर्गाधिपतिं पराजयमभ्युपेतुं निर्बवन्ध च ॥ अपर इक्षवाकुवंशप्रभवः ककुत्स्थः बलिष्ठेन केनचिदसुरेण सह युद्धे क्रियमाणे इन्द्रः वृषभरूपमादाय स्वकीये ककुदे तमासीनं चकार ॥

देवैरसुरैश्च दुर्दमस्य राक्षसराजस्य युद्धाह्वानमिक्ष्वाकुवंश्योऽभ्युपेतुं समर्थ इत्यविश्वसनीयो नैव स्यात् ॥

नारदस्यान्वाख्यानानुरोधेन रामे निखिला अपि श्रेष्ठगुणाः-विक्रमपराक्रमौ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानसिकगुणा आत्मनिष्ठा महासत्वादिरूपा आसन्नेव ॥ तादृशमेवादर्शभूतं मानवं वर्णयितुं वाल्मीकिः प्रयत्नमकरोत् ॥

वाल्मीकिना चित्रीकृतेन नायकेन मानवेनैवावश्यं भवितव्यम् ॥ यद्यपि तस्यावस्थितिरत्युन्नता स्यात्, तथापि गुणाः मानवीया एवावश्यं भवेयुः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयानुक्रमणिका

१.	.प्राक्कथनम्	i
२.	.प्रस्तावना	iii
३.	वाल्मीकिरामायणे चित्रीकृतः समाजः	1
४.	आदर्शनृपतिरथवा अवतारपुरुषः	5
५.	अहं दाशरथिर्भूत्वा	10
६.	सद सीतासौमित्रे श्रीरामकथा	23
७.	अधिरोहण पदव्याम्	37
८.	उच्चतरत्वेऽपि मानुष एव	49
९.	देवानमपि दुष्करम्	73
१०.	रामस्य युद्धनयः तत्ररावणरय प्रतिकरणं च	83
११.	त्रिस्तरीया समाजव्यवस्थितिः	98
१२.	रामो विग्रह्वान् धर्मः	107

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाल्मीकिरामायणे चित्रीकृतः समाजः-
समकालिको वा भावनाभावितो वा

न कस्यापि मानवविशेषस्य कथानकं यत्र समाजे स निवसति स्म उत तस्य वसतित्वेनानुमितो वा तस्मात् पृथक्तया वर्णयितुं न शक्यते ॥ यद्येतादृशं पूर्वग्रहमादाय रामायणकाव्यं निरीक्षामहे तर्हि यस्मिन् समाजे श्रीरामचन्द्रः जीवन्नवर्तत अथवा रामस्य जीवितसमयविशेषेण यः समाजः कविना भावनाभावितो वा आसीत्तस्यैकदेशपरिज्ञानं वयं प्राप्तुं शक्नुमः ॥

अत्र उन्नीतो मुख्यः प्रश्न एष यद्रामायणे वर्णितः समाजो वाल्मीकिसमकालिक आसीदथवा आदर्शभूतः समाजः कश्चन भावनाभावित इति ॥ अयमेव शासनकालः महात्मागान्धिप्रभृतिभिर्विचिन्तकैः रामराज्यमिति प्रशंसाविषयीकृतः ॥

न केवलं वाल्मीकेरथवा व्यासस्य कृतिविषय ईदृशं निगमनं याथातथ्यं भजते किन्तु विश्वसाहित्ये प्रख्यातानां बहूनां ग्रन्थानां विषयेऽपि तदवस्थमेव। होमर प्रभृतयो यवनमहाकवयः स्वकीयसाहित्यरचनासमये तेषां भावनायां भासुरत्वेन वर्तमानं कश्चन कालघट्टमधिकृत्य पात्रविशेषान् संकल्पयन्ति स्म। तेषां रचनासु वर्णिताः महासत्वाः गंभीरात्मनश्च कदाचिद्देवैः सहाप्ययुध्यन्त ॥ तेषां रूपवत्करणं दैविकांशैरेव समभवदिति सुनिश्चितं भासते ॥एतादृशी स्थितिरस्माकं साहित्यसमुच्चयविषयेऽपि यथातथाऽस्तीत्यत्र को वा संशयः ?

इदं च सत्यं यदादर्शभूतः श्रीरामचन्द्रस्तस्मिन्नेव समाजे सीमितत्वेन प्रावर्तत इति वक्तुं न शक्यते॥ तस्मादप्युच्चादुच्चतरा श्रीरामस्यावस्थितिः॥ ऋग्वेदकालादारभ्यार्याणां समाजे पितृभक्तिः भ्रात्रनुरागः स्नेहमसृण स्वभावविशेष इत्यादयः कल्याणगुणाः प्रचुरप्रचारा आसन्निति निर्विवादः॥ तादृशेऽप्यादर्शभूते समाजे श्रीरामचन्द्रस्याचरणविशेषेषु यावज्जीवं प्रवर्तमानमादर्शपरत्वं भूयिष्ठतयात्मानं न लभते॥ वसिष्ठप्रभृतीनामाचार्यवर्याणां पितृभ्रात्रादीनामपि प्रतीक्षामतिशेते रघूत्तमस्य तस्याऽदर्शनिष्ठत्वम्॥ स्यान्नाम श्रीरामचन्द्रस्याचरणविशेषाः तात्कालिकाचारमर्यादाविषये विद्यमानैर्व्यवस्थाविशेषैः सदा न घटेरन्॥ एतस्मादेव कारणात् केचित् श्रीरामचन्द्रस्याचारविशेषा विवादग्रस्तानि भासेरन् अथवा निगमनवैविध्यविषयाः वा स्युः॥ उचितेसन्दर्भ एतान् विषयानधिकृत्य चर्चां कुर्मः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुना प्रोक्तं

यत्र नार्यस्तु पूज्यन्ते
रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते
सर्वास्तत्राफलाः क्रियाः- इति ॥

सर्वास्वपि सामाजिकव्यवस्थासु, नारीणामौचित्ययुक्तमर्हतानुकलं वा स्थानं रामायणकालिके समाजे सर्वदाऽसीदिति निश्चयेन वक्तुं न शक्यते ॥ इक्ष्वाकुवंशाचार्यो वसिष्ठामहर्षिरथर्ववेदपारंगत आसीदित्यन्यत्र दृश्यते ॥ अस्मादेव कारणात् श्रीमद्रामायणकाव्यं औपनिषदकालात्प्राङ् न विरचितमित्येव प्रतिभाति ॥ आर्याणां संस्कृतिः गंगातटवर्तिषु भूयिष्ठेषु भागेषु प्रचरत् तथा च विदेहाः प्रख्यात विद्याकेन्द्रत्वेन संस्कृतिप्रमुखस्थानत्वेन च कीर्तिभासुरा आसन् ॥ सीतादेव्याः पिता जनकः प्रख्यातेन तत्वज्ञेन जनकमहाराजेन यस्यास्थाने याज्ञवल्क्य आचार्य आसीत् तेन सह तादात्म्यं कदाचिन्न लभेत ॥ तथाऽपि स तपोमाहात्म्येन युक्तो दर्शनग्रन्येषु पारंगतश्चासीदित्यत्र न कोपि विवादः ॥ लौकिकाचारेषु नारीणां मुख्यत्वं यद्यप्यधिगतं तथाऽपि सामान्यजनतामध्ये तासां दीयमाने स्थानविशेषे ह्रासः समभवदित्यवश्यमेव बक्तव्यं॥ राजमहिष्यै कौसल्याये अश्वमेधयागे प्रमुखस्थानं प्रदत्तमासीत्॥ राजमहिष्य अश्वमेधसमये विद्यमानत्वमवश्यं कर्तव्यमित्यभिमतम्। तस्मादेव कारणात् स्वकीयेऽश्वमेधे श्रीरामचन्द्रः सीतायाः काञ्चनप्रतिमा यागशालायां स्थापयामास ॥

दशरथस्यान्तः पुरे पञ्चाशदधिकत्रिशत महिष्य आसन्निति न विस्मर्तव्यं यद्यपि तिस्राणामेब प्रमुखवर्णनं कृतमस्ति ॥ बहवो राजानः महर्षयश्च बहुभार्यवन्तः श्रूयन्ते ॥ वाल्मीकिना तादृशं बहुभार्यात्वं न गर्हितम्। पश्चादस्माकं चर्चाविषयत्वेन एष प्रश्न उननीयते यत्र वालिनः अत्यन्तगर्हणत्वेनोपन्यस्यमाना दुर्बलता केवलं स्त्रैणचापल्यमेव ॥ एष एक एव दोषो गुणबहुत्वेऽपि श्रीरामस्य विचारानुरोधेन गर्हणविषयत्वं वाल्मीकिनाभिमतम् ॥

पुरुषस्यात्यन्तापेक्षिता जाया तथैव विद्यासम्पन्नस्य पुरुषस्यापत्यजननीत्वेनापि भार्याया अत्यन्तापेक्षितत्वमभ्युपगन्तव्यम् ॥ राज्यस्य सुस्थितित्वाय सुघटितत्वाय च सिंहासनं न्याय्येऽपत्ये समर्पयितव्यं, तेनैवाराजकत्वस्य परिहारो भवति ॥ पुंनाम्नो नरकात् त्रायत इति कृत्वा पुत्रस्य पुत्रत्वम् ॥ मरणानन्तरक्रियाकलापस्याचरणं पुत्रेणैव कर्तव्यं येन स्वर्गगतिः पितुः स्यात् ॥ सामाजिकशास्त्रानुराधेन इदृश्याः व्यवस्थाया अवश्यस्वीकर्तव्यत्वमनिवार्यमेव ॥ प्रथमायाः पत्न्याः अपत्याभावे द्वितीयां तृतीयां वा पत्नीं स्वीकुर्यात्॥ पर्याप्तायाः सतर्कतायाः कृते केचिद्राजान आदावेव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पत्नीबहुत्वमङ्गीकुर्वन्ति स्म ॥ परन्तु किं स्त्रीणां भोगोपकरणत्वमेव स्यात्? तादृशस्य स्थितिविशेषस्य वृद्धौ समाजोऽपथेनैव प्रयात् ॥ दशरथस्य वैषयिके जीविते ईदृशस्य दोषस्य स्पष्टतः सूचना बाल्मीकिना बहुशः प्रदत्ता पत्नीत्रयप्रस्तावेऽपि ॥ तस्य दौर्बल्यस्य सह लब्धपरिचयाणामपि पञ्चाशदधिकत्रिशत- भार्यात्वमतिमात्रमाश्चर्यजनकमेव स्यात् ॥ एतदप्यवगन्तव्यं यद्दशरथः सर्वेषां राज्ञां मध्येऽतिमात्रप्राधान्यमर्हन् वर्णितः ॥

वाल्मीकिना वर्णिते समाजे स्त्रीणां समाजमध्ये स्थितिविशेष विषयेऽतिमात्रं न्यूनं स्थानमलभत ॥ रामायणकालिके समाजे पुरुषास्त्रियश्च स्वातन्त्र्येण परस्परसम्पर्कं कर्तुमनुमताः किं वा? अग्रजस्य पन्ती जननीसदृशी भावयितव्या इत्येवं रूपो नियन्त्रणविशेषः समाजे स्यान्नाम ॥ किं वा पुत्रो जननीं साक्षान्न पश्येत्? सीतया सह लक्ष्मणस्य सम्पर्कः संबन्धश्च दिव्यं माधुर्यमावहति ॥ केषांचित् श्लोकानामनुवाचनेन एवं प्रतिभासेद् यद् बाह्यप्रबोधनार्थं गुप्तस्यापि व्यवहारस्यौपयिकत्वमंगीकृतमासीदिति ॥

रामायणस्य समग्रपठनेन एतदस्माकं न प्रतिभाति यदार्याणां समाजे स्त्रीणां पृथक्करणं प्रचलितमासीदिति ॥ यस्मिन् रामस्तस्य भ्रातरश्च व्यवहरन्त आसन् स समाजः सम्यङ्नियन्त्रितस्याधुनिकस्य कस्यचित्परिवारस्य सादृश्यमेवावहति, यत्र भ्रातरः स्वसारः भ्रातृपत्न्यः देवर इत्यादीनां पुरूषाणां स्त्रीणां च स्वातन्त्र्येण इतरेतरैः सह व्यवहारे न कोपि प्रतिबन्धोऽस्ति ॥ सीतायाः सुरक्षाविषये स्वेन सतर्कत्वेनावश्यं भाव्यमिति जानन् लक्ष्मणः केवलमधोदत्तदृष्टिरेव तस्या अनुगमनं करोति स्मेति कथं विश्वसिमः? रामायणे वाल्मीकिना सुस्फुटमेवैतच्चित्रीकृतं वर्तते । गंगायां नावः तरणसमये रामः सीता प्रथमत आरोहणीया तदनन्तरं सः स्वयमारोहतु इति लक्ष्मणमादिशति ॥ शीघ्रं प्रवहतो नदीस्रोतसः सीतायाः सावधानं संरक्षणं लक्ष्मणेनैव करणीयम् ।

आरोह त्वं नरव्याघ्र
स्थिता नावामिमां शनैः ।
सीतां चारोपयान्वक्षं
परिगृह्य मनस्विनीम् ॥ (अ.-14-75)

अत्र 'परिगृह्य' पदस्यार्थगर्भत्वं श्रद्धेयम् ॥ यथाऽर्वाचीनः कश्चनाचारवान् युवा अधुनातनसमाजेऽवश्यमेव कुरुते तथैव सीतायै हस्तसाहय्यं दत्वैव लक्ष्मणो नावं समारोहयत् ॥ पश्चादेव रामः स्वयं नावि पदविन्यासं कृतवान् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सीतायाः सुरक्षाविषये रामेण चिन्ताग्रस्तेन नैव भाव्यम् । स्वकीयां मातारमिव तामवश्यमेव परिचरेल्लक्ष्मणः । मां विद्धि जनकात्मजामीतिं सुमित्राया उपदेशं विनैव लक्ष्मणः तथाऽनुतिष्ठेदेव ॥ स एव लक्ष्मणः पादपावृतायां गुहायां नीत्वा सा परिरक्षणीयेति रामेणादिश्यते स्म यावत्कालं रामः स्वयं चतुर्दशसहस्रसंयुतै राक्षसैस्सह युद्धे प्रसक्त आसीत् । किं वा स्वमातुरुपधेयं वस्त्राभरणानि च लक्ष्मणेन नैव विलोकितानीति कथं वा वक्तुं शक्यते ? तथाऽपि किष्किन्धायां समुपलब्धानां सीताया आभरणानि विवेक्तुं यदा लक्ष्मण आदिष्टस्तेन किं वा उक्तं ?

नाहं जानामि केयूरे
नाहं जानामि कुण्डले ।
नूपुरेत्यभिजानामि
नित्यं पादाभिवन्दनात् ॥ (कि. VI.-22)

एवं कथं वा समभवत् ? स्वेन प्राग्वर्णितेन विरुद्धमेव बाल्मकिनाऽत्र वर्ण्यत इति स्यान्नाम किन्तु न किमप्युद्देश्यं विना ॥ लक्ष्मणेन जानतैवासत्यं बभाष इत्यपि न ॥ सीताया निविष्ठभक्तेर्लक्ष्मणस्य हृदये तस्याः पादसरोजं स्फुटमेवालिखितमवर्तत ॥ एतदप्यवश्यं श्रद्धेयं यल्लक्ष्मणेन तानि वचनानि समाजान्तरस्तरयोर्नातिपरिचितयोर्व्यक्तिविशेषयोः पुरत एव कथितानि । रामलक्ष्मणयोर्वानरसमाजं प्रति प्रथमो जाते विचारः कौटुम्बिकजीवितविषये श्लथबन्धवानयं समाज इत्येव स्यात् ॥ बालिना कनीयसः भ्रातुः पत्नी स्वायत्तीकृता ॥ तां पुनः प्राप्तुं सुग्रीवो यतते स्म ॥ तादृशानां वानराणां पुरत एव लक्ष्मण एवं कथितवान् । लक्ष्मणे यदि कस्यचन पर्याप्तस्य सावधानस्य सत्ता विद्येत तर्हि तस्या आवश्यकता नासीदिति न ॥

स्त्री पुरुषयोः भार्याभर्त्रोश्च विशिष्य सीतारामयोः सम्बन्धे केचित् जटिलाः प्रश्नाः वाल्मीकिना उन्नीताः स्युः ॥ सर्वगुणसम्पन्ना जनकात्मजा रामस्यात्यन्तं प्रेयसी आसीत् ॥ तादृश्याः पत्न्याः वियोगे सति तत्तादृक् धैर्यशालिनोऽपि रामस्य मनसः असन्तुलनमभूत् ॥ प्रधानेषु विषयेषु निश्चिततत्वनिर्णये धार्मिकं बोधमदृत्यैव रामः प्रावर्तत ॥ स एव रामः सीतायाः उपदेशानङ्गीकर्तुं सदा सन्नद्धोऽभवत् ॥ तथाप्यपरे किं वा ब्रूयुः कथं वा व्यवहरेयुः इत्यादीन् विषयान् मनसिकृत्वा शङ्काकुलचित्तोपि यदाकदाचिदासीद्वा ?

अग्निपरीक्षार्थं विधेयीभूतया सीतया केचित् जटिलाः प्रश्ना समुन्नीताः ॥ नार्यः पूजार्हा इत्यभ्युपेते समाजे पुरुषस्य स्त्रियश्च स्वभावदृढीकरणविषये मानदणडद्वयमासीद्वा न वा ? एतेषां प्रश्नानां केवलमुत्थापनं कविना कृतं न तु किमपि सन्तोषावहं समाधानं प्रदत्तम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ आदर्शनृपतिरथवा अवतारपुरुषः ॥

रामायणकथां मनुष्यकथारूपेण वर्णयन् वाल्मीकिः तत्र तत्रावतरात्मकत्वमपि न निर्विशतीति न॥ ईदृशे प्रश्ने चर्चाविषये सति रामायणकथानायक आदर्शपुरुषत्वेन सर्वश्रेष्ठनृपत्वेन चावगन्तव्य उतवा विष्णोर्मानवीयत्वं प्रकटयदवतारात्मकत्वं व्यपदिशन् मन्तव्य इत्येष विषयो विवादग्रस्तः स्यान्नाम ॥

ये नाम केचित् प्रथमोक्तमभिप्रायमादृत्य तदेव तथ्यं मन्यन्ते तेषामीदृशी चिन्तागतिः यदवतारत्वसूचकाः भागाः यत्र यत्र श्रीवाल्मीकिरामायणे विद्यन्ते ते सर्वेऽपि पश्चादुपनिबद्धाः प्रक्षिप्तभागा एवेति ॥ प्रत्युताध्यात्मरामायणं यत्क्रैस्तवीय दशमशताब्दे अथवा तत्पश्चादाविरभूदित्यनुमन्तुं शक्यते तस्मिन् पुराणे श्रीरामस्याचरणानि सर्वाण्यपि भगवतो विष्णोर्लीलाविलसितानीत्यपि स्पष्टतया प्रतिपादितम् ॥ आधुनिकभारतीयभाषासु विरचितानां रामायणकथाकाव्यानां भूयान् भागोपि तादृशीमभिप्रायविचारधारामावहन्ति ॥ तेषां श्रद्धाविश्वासावेवं प्रकटी-भवन्ति श्रीरामचन्द्र आदर्शपुरुषो भूपतिश्चेति न केवलं मन्यते, किन्तु रामः साक्षाद् भगवानेव स्वयं यस्य नामोच्चारणं मायात्मकात्प्रपञ्चादस्मानुद्धरेत् ॥ एकतः अध्यात्मरामायणे आध्यात्मिकस्तरे निम्नावस्थान् जनानुद्बोधयति "आत्मानं भगवतः सकाशे अर्पयत भक्तिमार्गेनैव मोक्षमवाप्नुत" इति ॥ ये तावत् साधनादिसम्पन्नाः आध्यात्मिकविषये लब्धप्रवेशाश्च ते अद्वैतदर्शनमनुसरन्तु यस्य विवृतिः श्रीरामहृदयनाम्नि भागे वर्तते ॥

यद्यपीदानीमुपलभ्यमानोऽध्यात्मरामायणग्रन्थः वाल्मीकेर्वर्षसहस्रात्पश्चादाविरभूदिति मन्तव्यं तथापि कालिदासात्पूर्वमेव रामायणरय लोकप्रियं पाठान्तरं यद्वाल्मीकिरामायणादपि जनप्रियमासीत्तस्य प्रचलितत्वमपि मन्तव्यम् ॥ रघुवंशे रामकथारम्भः एवं ननु ॥ पौलस्त्योपप्लुता देवाः अध्वगच्छावायावृक्षमिव हरिमभिजग्मुः अभयं ययाचिरे च ॥ विष्णुना दाशरथिर्भूत्वा तस्य वधं करिष्यामीति तेभ्यः प्रतिश्रुतम् ॥

सोऽहं दाशरथिर्भूत्वा
रणभूमेर्बलिक्षमम् ।
करिष्यामि शरैस्तीक्ष्णै-
स्तच्छिरः कमलोच्चयम् ॥ (R.V.-X-44)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इदानीं वाल्मीकिना कथं वाऽवतरात्मकत्वमुपनिबद्धमिति पर्यवेक्षामहे ॥ यदा दशरथः पुत्रकामेष्टिं यजन्नासीत्तदा स्वंस्वं भागं ग्रहीतुं देवगन्धर्वसिद्धपरमर्षयस्तत्र समागताः ॥ ते सर्वे ब्रह्माणमेवमब्रुवन् "भवतोऽनुग्रहेण संवर्धितो दशाननो न केवलं देवान् मनुष्यांश्च पीडयत्यपि तु प्राकृतिकान् शक्तिविशेषान् स्वस्वव्यापाररतान् नानुमन्यते ॥

ऋषीन् यक्षान् सगन्धर्वान्
ब्राह्मणानसुरांस्तदा ।
अतिक्रामति दुर्धर्षो
वरदानेन मोहितः ॥
नैनं सूर्यः प्रतपति
पार्श्वे वाति न मारुतः ।
चलोर्मिमाली तं दृष्ट्वा
समुद्रोऽपि न कम्पते ॥ (बा. XV.-9, 10)

ईदृशं लोककण्टकं कथं वोच्छेदयितुं शक्यमित्यत्र विषये चिन्तां करोतु भवान् ॥"

भगवान् परमेष्ठी तानेवमसान्त्वयत्- "रावणः सर्वथाऽवध्योऽजय्यश्चेति मा मन्यध्वम् ॥ मानवानवजानता तेन मानवादवध्यत्वं न प्रार्थितम् ॥" एतस्मिन्नवसरे भगवान् नारयणाः शंखचक्रगदापाणिः पीतवासास्तत्राऽविर्बभूव । चतुर्थे हस्ते पद्मेनाभूयत इत्यप्यभ्युपगन्तव्यं किन्तु वाल्मीकिः शब्दतो न प्रोक्तवान् यतः पद्मस्य तादृशे सन्दर्भे न किमप्युपयोगित्वम् ॥ ब्रह्मणः पार्श्वे तिष्ठन्तं हरिं प्रेक्ष्य सर्वे सुराः तमस्तुवन्नेवं प्रार्थयामासुश्च ॥ भगवान् दशरथस्य पत्नीत्रय आत्मानं चतुर्धा विभज्यावतीर्णो भूत्वा रावणरूपाद् घोरात् संकटादस्मान् परित्रायस्व-इति ॥ भगवान् विष्णुः तेभ्योऽभयं प्रायच्छदेवमवादीच्च-अमुं लोककण्टकं सपुत्र ज्ञातिबान्धवं समुन्मूल्य दशवर्षसहस्राणि दशवर्षशतानि च राज्यशासनं करिष्यामीति ॥

भगवान् स्वयं सर्वशक्तः सर्वज्ञश्च तथाऽपि देवानां सान्त्वनानन्तरं जानन्नप्येवमन्वयुङ्क्ते-एतादृश उपद्रवकारी राक्षसः कथं वा हन्तुं शक्यत-इति ॥ देवा एवं व्यजिज्ञपन्-भगवतो वेधसो वरानुरोधेन मानुषादन्यैः स न वध्यः ॥तस्मात् भगवता मानवीयं रूपं धारयितव्यं-इति ॥ देवानां वचनं श्रुत्वा भगवतैवं निश्चितं राजानं दशरथं पितृत्वेन स्वीकुर्यामिति ।

तदानीमेव राजा दशरथो यज्ञशालायां पुरुषप्रजार्थी पुत्रकामेष्टिं कुर्वन्नासीत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्मणः सन्देशवाहको दिव्यपायसरूपं भगवत उपायनं राज्ञो दशरथस्य हस्ते न्यक्षिपद् यच्च प्रजाकरं धन्यमारोग्यवर्धनं चास्तीति प्राजापत्येन नरेण प्रतिज्ञातम् ॥

कथं वैष पायसात्मकश्चरुः पत्नीषु व्यभज्यतेत्यत्र रामायणग्रन्थकारेष्वभिप्रायभेदा दृश्यन्ते ॥ वाल्मीकिवर्णनाधारेण पायसार्धं पट्टमहिष्यै कौसल्यायै प्रादीयत ॥ अर्धस्यार्धं भागं नृपस्सुमित्रायै प्रायच्छत् ॥ पुनरवशिष्टस्यार्धो भागः कैकेय्यै प्रदत्तः ॥ अनुचिन्त्य स पुनरप्यवशिष्टं भागं सुमित्रायै प्रदत्तवान् ॥

अध्यात्मरामायणरीत्या पायसं द्विधा विभज्यैकैकं भागं कौसल्यायै कैकेय्यै ऋष्यशृङ्गस्य वसिष्ठस्य च वचनमनुरुध्य नृपतिरयच्छत् ॥ द्वे अपि राज्ञ्यौ स्वकीयभागस्यार्धांशेन सुमित्रां योजितवत्यौ ॥ भारतीयभाषाग्रन्थकाराणां भूयांसोऽध्यात्मरामायणमनुसृत्यैव विभजनकथामकथयन् ॥

वाल्मीकेरुक्तेर्विभिन्न एते पाठाः अर्वाचीनाः नेति । “कालिदासस्याभिप्राय एषः- राज्ञा अर्चिता कौसल्या परन्तु कैकेयी नितान्तं प्रेयस्यासीत् पश्चात्सुमित्रायै प्रदास्यत इति मनसि कृत्वा द्वाभ्यामेव पायसं प्रदत्तंम् ॥ तीक्ष्णबुद्धेर्दशरथस्य स्वपत्नीविषयकोऽवबोधो नितरां सम्यगासीदित्यस्माद्व्यक्तीभवति ॥ कैकेय्या उदारमनस्कतां प्रति वाल्मीकेः सहमतिरासीदित्यत्र न किञ्चिदुपोद्बलकम् ॥

अस्माकं पुनः सम्बन्धोस्मिन् विषये एव दिव्यत्वांशस्य दशरथपुत्रेषु कथं वा कीदृग्वा विभजनमवर्तत ॥ एवमेव साधरणयाभ्युपेतं श्रीरामचन्द्रः अंशावतारो ननु एक एव वासुदेवः कृष्णः सम्पूर्णावतारः ॥ देवीं भूमिं सान्त्वयता भगवता अहं समग्रात्मनाऽवतीर्य कंसादिकान् दैत्यान् हनिष्यामीति प्रतिश्रुतम् । रामायणे भगवान् विष्णुरेवं प्रार्थ्यते- ‘अस्य (दशस्थस्य) भार्यासु आत्मानं चतुर्विधं कृत्वा पुत्रत्वमागच्छ इति ॥ एतस्यायं पिण्डितोर्थ एकैकस्मिन् पुत्रे अंशानां विभिन्नाऽवस्थितिरिति ।

द्वादशमासिक गर्भावस्थानन्तरं रामः पुनर्वसुनक्षत्रे नवम्यां तिथ्याववतारमलभत ॥

विष्णोरर्धं महाभागं
पुत्रमैक्ष्वाकुनन्दनम् ।
लोहिताक्षं महाबाहुं ।
रक्तोष्ठं दुन्दुभिस्वनम् ॥
कौसल्या शुशुभे तेन
पुत्रेणामिततेजसा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथा वरेण देवाना
मदितिर्वज्रपाणिना ॥ (बा. XVIII.-11-12)

भरतस्य जन्म विवृण्वन् वाल्मीकिः कथयति तस्मित् विष्णु तजसः एकचतुर्थांशो वर्तत इति। लक्ष्मणशत्रुघ्नौ विष्णोः तेजोर्धमधारयताम्। भिन्नानामाहत्य योगः एको न भवतीत्यकिञ्चित्करम् ॥ एवं नामोत्तरं नीयते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते-इति हेतोः पूर्णाद् भगवतः पूर्णापनयनेऽपि भगवान् पूर्णरूपेणैवावतिष्ठति ॥

एतस्य निर्णयस्य प्राधान्यं विष्णुतेजसः रामे भ्रातृत्रितये च तरतम भागेनैवावस्थितिरिति ॥ राक्षसैः सहासकृद्युद्ध्यमानस्य लक्ष्मणस्य विष्णुतेजसो भरत शत्रुघ्नापेक्षया अधिकांशत्वमत्यन्तापेक्षितं खलु ॥ उत्तररामायणं बाल्मीकिकृतमिति यदि मत्यते तर्हि शत्रुघ्नः स्वतन्त्रतया लवणासुरं जेतुं अशक्त आसीत्। अवश्यौपयिकानि शस्त्रांणि शत्रुणा सह युद्धात्प्रागेव रामेण प्रदेयान्यासन् ॥

अस्मिन् सन्दर्भेऽपरस्यापि कस्यचित्प्रश्नस्योत्थितिरनिवार्यः। यद्रामस्तस्य भ्रातरश्च किं स्वकीयं दैविकांशिकत्वमजानन् वा न वा? एषः बलीयान् विश्वासः यद्रामोऽपि स्वयं सीताया अग्निपरीक्षाकालावधि एतन्नावबोधदिति ॥ यदा देवैः स पृष्टः।

कथं देवगणश्रेष्ठ
मात्मानं नावबुद्धध्यसे- (यु. CXVII-6)

तदारामः -

आत्मानं मानुषं मन्ये
रामं दशरथात्मजम् ॥ (यु. CXVII-11)

इति प्रत्युत्तरं दत्वा

सोऽहं यश्च यतश्चाहं
भगवांस्तद् ब्रवीतु मे ॥ (यु. CXVII-11)

इति तेभ्यो विवेचनं प्रार्थयते ॥ एतस्य वाक्यस्यार्थकल्पनायां व्याख्यातृष्वभिप्रायवैरूध्यं वर्तते। एक अभिप्राय ईदृशः, श्रीरामः साधारणस्य कस्यचित्पुरुषस्य भूमिकामभिनयति स्म ॥ तस्मिन् समयेऽविदित स्वकीयपारमार्थ्यो नाभवत् ॥

अध्यात्मरामायणे देवी उमा अमुं सन्देहं परिहर्तुं वाञ्छति ॥ स्वकीयं तथ्यं रामोऽस्मारितो नावबुदध्यत इत्येतत्किं सत्यं ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वदन्ति केचित् परमोऽपि रामः
स्वाविद्यया संवृतमात्मसंज्ञम्
जानाति नात्मानमतः परेण
संबोधितो वेदपरात्मतत्वम् ॥

यदि रामः तथ्यं जानाति तर्हि सीतावियोगेन तेन किमर्थं विलापः कृतः ?

यदि स्म जानाति कुतो विलापः
सीताकृते तेन कृतः परेण ।

यदि सः न जानाति स्म कथं वा अन्यैः सेव्यो भूयात् ?

जानाति नैवं यदि केन सेव्यः
समो हि सर्वैरपि जीवजातैः

एष एव चर्चाबिन्दुः यमधिकृत्य विविधा विरुद्धाश्चाभिप्रायाः स्युः ॥ एतदेवास्माभिरवश्यं स्मरणीयं यद्वाल्मीकेः प्रमुखोद्देश्यः श्रीराममादर्शपुरुषत्वेन वर्णयितुमेव ॥ अवसरविशेषेषु रामस्य तादृशमाचरणमप्यवर्तत यत्र तस्य स्वकीयस्य दैविकत्वस्य नासीदनवबोधः ॥ कथायाः प्राथमिके भाग एव एतस्य विषयस्य निदर्शनं दृश्यते यदा स विश्वामित्रस्य कथानुसारेण गौतमाश्रमं प्रविशदहल्यायाः पुनरपि पूर्वरूपप्राप्तिरभवच्च ॥ पुनश्च यदा जामदग्निना परशुरामेण सह रामस्याभिमुख्यमभवत्तदनन्तरं रामो मधुहन्ता सुरोत्तम इत्यादिभिर्नामाभिस्स्ममबुद्ध्यत ॥

अध्यात्मरामायणादितरत्र यदा यदा भरद्वाज सुतीक्ष्णं शरभंगागस्त्यादयो महर्षयो रामं संबुध्य भाषणं कुर्वन्ति तदा परमात्मत्वेन नाभिसंबोधयन्ति ॥ प्रत्युत श्रीरामचन्द्रस्य सङ्ग्रामहेतोः सुदीर्घकालीनायाः सन्नद्धताया अन्तिमान् भागान् ब्राह्म्यमस्त्रं वैष्णवं चापं च तस्मै प्रयच्छन्नगस्त्यमुनिरेव सज्जीकरोति ॥ परमशत्रुं दशाननं कथं वा हनिष्यामीति सम्यगबुद्ध्यन् रामो यदा विवशतां प्राप्नोति स्म तदा स एव मुनिस्तत्रागत्याऽऽदित्यहृदयरूपं परमं मन्त्रमुपदिश्य तस्य युद्धोत्साहमवर्धयत् ॥ एतेन सह इदमप्यत्रावधेयं न केवलं रामः अपि तु लक्ष्मणश्च स्वकीयं दैविकत्वांशावबोधं प्रदर्शयामास यदाकदाचिदिति निषेद्धुं न पार्यते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ अहं दाशरथिर्भूत्वा ॥

कथारम्भे राम 'इक्षवाकुवंशप्रभव' इति विशेषणेनैव वाल्मीकये नारदेन कृतपरिचयः ॥ वाल्मीकिरामायणे सर्वत्रानुस्यूततया इक्षवाकुवंशोत्पन्नत्वे दृढ़ीकरणं कृतमिति प्रतिभाति ॥ कालिदासकृतावप्येतद्दृष्टचरम् ॥ मन्विक्ष्वाकुककुत्स्थसगरभगीरथ इत्येवं रूपाणां राज्ञां राजधानीरूपेणायोध्यानगरी सरयूतीरे परिलसति स्म ॥ रावणस्य दायादैस्सहावश्यमायोधनं भविष्यतीति हेतोः त्रस्तो भूत्वा राजा दशरथो यदा रामलक्ष्मणौ विश्वामित्रेण सह प्रेषयितुं वैमुख्यं प्रदर्शयति कुलगुरुणा वसिष्ठेन सः स्मारितः-

इक्षवाकूणां कुले जातः
साक्षाद् धर्म इवापरः ।
धृतिमान् सुव्रतः श्रीमान्
न धर्मे हातुमर्हति-इति

मन्विक्ष्वाकुसगरदिलीपककुत्स्थरघुप्रभृतीनां प्रख्यातानां समानवंशोत्पन्नानामुच्चारणं रामस्य वंशावलिं वर्णयत कौशिकेन पश्चात्कृतं च ॥ विष्णुः तस्यावतारहेतोस्तादृशं वंशं विचिनोदित्यस्मादन्यत्किं वा स्वाभाविकं स्यान्नाम ?

अयोध्याधिपः दशरथः पुत्रकामेष्टियागे प्रवर्तमान आसीद्यदा मानवीयत्वेनावतारार्थं महाविष्णुः कृतमतिर्बभूव ॥राजा दशरथः सत्यपराक्रमः महासत्वश्च खलु, किन्तु स ईषद् दौर्बल्यवान् चेति जानन्नपि तत्पुत्रत्वेनावतारं स्वीकर्तुं भगवान् कृतनिश्चय आसीद्वा एषः प्रश्नः समुत्तिष्ठति ॥ यदा विष्णुः श्रीमता स्वकीयेन रूपेण देवानां पुरतं आविरभूत् तैरेवं विज्ञापितः-

त्वां नियोक्ष्याम्यहे विष्णो
लोकानां हितकाम्यया ।

राज्ञो दशरथस्य त्व-
मयोध्याधिपतेर्विभो ।
धर्मज्ञस्य वदान्यस्य
महर्षिसमतेजसः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य भार्यासु तिसृषु
ह्री श्री कीर्त्युपमासु च।
विष्णो पुत्रत्वमागच्छ
कृत्वात्मानं चतुर्विधम्॥

तत्र त्वं मानुषो भूत्वा
प्रवृद्धं लोककण्टकम्।
अवध्यं देवतैर्विष्णो
समरे जहि रावणम्। (बा. XV.-18-21)

अपरस्मिन् सर्गे यथा वर्णितं दशरथं स्वपितरं स्वीकर्तुं कृतमतिरप्य भूत्विष्णुः तेषां प्रार्थनामङ्गीचकार॥

इत्येतद् वचनं श्रुत्वा
सुराणां विष्णुरात्मवान्।
पितरं रोचयामास
तदा दशरथं नृपंम्॥ (बा. XVI.-8)

एवं सति विष्णुना जानतैव दशरथं स्वपितृत्वेन स्वीकृतवानित्यत्र न कोऽपि सन्देहः समुद्भवति॥ स्वकीयप्रसादेनानुग्रहीतं यं स स्वयमचिनोत्तस्य ईषद् दौर्बल्यमपि न ज्ञातवानिति कथं वक्तु शक्यते ?

अस्मिन् सन्दर्भे एतन्नितरां स्मर्तव्यं यच्छ्रीरामावतारो न केवलं लोककण्टकानां राक्षसानां समुच्छेदनार्थम्॥ एतदुद्दिष्टार्थं चतुर्विशद्वर्षसीमिते काले एष सम्यग् निर्व्यूढंम्॥ तथाप्येषः प्रवादो यद्दशवर्षसहस्राणि दशवर्षशतानि च रामो राज्यमकरोदिति॥ अस्यायं पिण्डितार्थो यदादर्शनृपः कथं वा राज्यभारं कुर्यादिति भाविजनानां मार्गदर्शनमप्यवतारेण निर्व्यूढं स्यात्॥ व्यतिरिक्तविधया राम एतदपि प्रदर्शययितुं कृतसंकल्पः उत्कृष्टराजशासनादर्शानां इक्ष्वाकुककुत्स्थरघुप्रभृतिषु सम्यग् स्थितस्य धर्मादर्शस्य दशरथशासनकाले ह्रासः समुच्छित इति

पश्चाद्विरचितायां श्रीमद्भगवद् गीतायामेतस्य निर्देश उपलभ्यते यद्धर्मस्य ह्रासः क्रमिकः पश्चात्स विलुप्तश्चेति॥ रामायणकथानुसारे सूर्यवंशे न कस्यापि शाश्वतिका नाशो न चाप्यनुस्यूतः ह्रासश्च॥ इक्ष्वाकुककुत्स्थरघुप्रभृतयो राजर्षिश्रेष्ठाः अपरे केचन किंचिन्यूनाः कतिपये च प्रजापरोधकाश्चासन्निति ज्ञायते।भाविपौराणां प्रकृष्टप्रकाशं किञ्चन निदर्शनं प्रदातुं रामः प्रायतत इति किं वा वयमनुमातुं शक्ताः ? एतेषां प्रश्नानां वाल्मीकिना चर्च विहिता यद्यपि तृप्तिकरं समाधानं नासादितम्॥

दशरथस्य वर्णनमिन्द्रापेक्षया प्रशंसनरीत्या वाल्मीकिनोपवर्णितम्॥ एषा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्णना प्रतीकात्मिका एव भवेत् कदाचित्। इन्द्रस्य विभुत्वस्य सीमितत्वं वाल्मीकेरपि तूलिकाया अनेकशः निर्गलितम् ॥ भूभर्तृणां साहाय्यापेक्षी इन्द्रः बहुशः वर्णितः तथाप्यतिमात्रप्रभावन्तं राममिन्द्रेण सह तुलयितुं वाल्मीकेः न काऽपि विचिकित्सा आसीत् ॥

दशरथः देवेन्द्रश्च उभावपि समानदौर्बल्यवन्ताविति हेतोः तादृशमुपमानं सार्थकमेव ॥ नारीलोलुपत्वविषये न कस्यापि स्वात्मनियन्त्रणक्षमता ॥ बालकाण्डे वत्सलपितृत्वेनैव दशरथस्य चित्रीकरणमाविर्भावश्च ॥ अयोध्याकाण्डारम्भात्प्रभृति वाल्मीकिः विभिन्नचित्रीकरणविधया दशरथस्य स्वभावाविष्करणं कुरुते ॥ इक्षवाकूणां नियमाननुसृत्य सिहांसनं परित्यज्य मुनिवनतरुच्छयानिषेवणे नात्यन्ततत्परो दशरथः। कालिदासवर्णितो रघुः शारीरिकविक्रमपराक्रमयोः निरातिशययोः तदवस्थयो एवाजं·समस्तगुणसम्पन्नं राज्यभारं वोढुं समर्थं च निरीक्ष्य वनं प्रति प्रस्थितः ॥ दिलीपस्य विषये प्रवयसस्तस्य वानप्रस्थस्वीकरणं समुचितमेव यतः यागादीन् यथाविधि समाप्य स्वंकर्तव्यनिर्वहणमनुष्ठितवान् । स्वपुत्रः सर्वथा राज्यभारार्हः स्वात्मानमप्यतिशेते इत्यवगतवान् च। रामचद्रोऽपि विश्वामित्रस्य यागानां राक्षसेभ्यः संरक्षणं कुर्वन् स्वकीयं निरतिशयं पराक्रमं धर्मनिष्ठाञ्च यथाकालं प्रदर्शितवान् ॥ अयोध्याप्रत्यागमनावसरे परशुरामस्य गर्वभङ्गमप्यकरोत् ॥ यूनि रघूत्तमे राज्यभरणविषये न्यूनत्वमपि यदि शङ्क्येत तर्हि तत्परिपूर्तिं कर्तुं द्वादशवर्ष समयो न पर्याप्तः किं ?

अयोध्या काण्डस्यारम्भे दशरथकृतमात्मगतमर्थगर्भमिति मन्तव्यम् । रामस्य कल्याणगुणानां प्राचुर्यमनुचिन्तयतः पितुरानन्दमनुभवतो दशरथस्य हृदयं द्रवीभूत्वा परमानन्दमनुभवति ॥ रामः स्वात्मानं नितरमतिशेत इति तेनाभ्युगम्येत ॥ वीर्ये यमेन शक्रेण च स साम्यमावहति मतौ बृहस्पतिसमश्च ॥ स्वसापेक्षया तस्य लोकप्रियत्वं जनतामध्ये प्रचलति स्म इत्येवमनुचिन्त्यापि केवलं यौवराज्ये राममभिषित्कुमेव किमिति निश्चिनोति ?

तं समीक्ष्य तदा राजा
युक्तं समुदितैर्गुणैः ।
निश्चित्य सचिवैः सार्धं
यौवराज्यममन्यत ॥ (अ.-I-42)

यदि यौवराज्ये सर्वमपि कार्यकलापं समर्पयितुं तस्य विचारः तर्हि प्रतीकविधया साम्राज्यप्रभुत्वे संलग्नं स्मात्मानमाभिलषति किमर्थं ? केनेदं सुस्पष्टं स्यात् यद् दशरथः पर्याप्तरूपेण विषयतृष्णाविमुक्तः नाऽसीत् तेनैव स्वस्मिन्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नृपाभिधां रक्षन् यौवराज्ये राममभिषिन्तुमैच्छत् ॥ विषयभोगानुभवे सर्वात्मना विलीनत्वमेव दशरथं संसारेण सह बध्नाति ॥

यदा दशरथो निखिलां परिषदं समाहूय मन्त्रयति तदा तत्पारिषदाः रामचन्द्रं दशरथापेक्षया गुणवत्तरमप्यभ्युपगच्छन्तः व्यवहरन्ति। यस्मिन् ते सर्वे अवश्यमेवानुरक्ता आसन् तस्य भूपतेर्दशरथस्य मनोगतिमनिरुध्य रामे यौवराज्यमेव समर्पयितुं समीचीनमित्येवाऽकथयन् ॥.

प्रथमं यौवराज्याभिषेकविषये प्रकटनं कृत्वा रामेण सह द्वितीये हृदयङ्गमे संभाषणे जाते अभिनवानि तत्त्वानि समुत्थितवन्ति ॥ भाविनं प्रत्याशङ्कापूर्णा विचारधारास्तस्य मनसि प्रवर्तन्ते ॥

अपि चाद्याशुभान् राम
स्वप्नान्पश्यामि दारुणान् ॥
सनिर्घाता महोल्काश्च
पतन्ति हि महास्वनाः ॥

अवष्टब्धं च मे राम
नक्षत्रं दारुणैर्ग्रहैः ।
आवेदयन्ति देवज्ञाः
सूर्याङ्गारकराहुभिः ॥

प्रायेण हि निमित्ताना
मीदृशानां समुद्भवे
राजा मृत्युमवाप्नोहि
घोरां वाऽपदमृच्छति ॥ (अ.-IV-17-19)

यावत्तस्यमनो न व्यतिचलेत्तावदेवाभिषेकः करणीय इति रामं निर्बध्नाति ॥

तद्यावदेव मे चेतो
न विमुह्यति राघव ।
तावदेवाभिषञ्चस्व
चला हि प्राणिनां मतिः ॥ (अ.-IV-20)

भरतः सर्वथा सद्गुण सम्पन्न इति तेन सम्यग् ज्ञातं तथापि मानवीयं मनः सर्वदा सुस्थितत्वेन न वर्तते ॥

कामं खलु सतां वृत्ते
भ्राता ते भरतः स्थितः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्येष्ठानुवर्ती धर्मात्मा ।
सानुक्रोशो जितेन्द्रियः ॥
किं तु चित्तं मनुष्याणा-
मनित्यमिति मे मतिः ॥ (अ.-IV-26-27)

यदा प्रभृति भरतो मातुलस्य गृहं प्रति प्रस्थितः तदा प्रभृति रामस्याभिषेचनार्थं समुचितसमयः प्रारभत इत्यपि दशरथेन स्फुटीकृतम्-

विप्रोषितश्च भरतो
यावदेव पुरादितः ।
तावदेवाभिषेकस्ते
प्राप्तकालो मतो मम । (अ.-IV-25)

एतस्मिन् समये सर्वान्यपि तथ्यानि पठितृणां पुरतो नोपक्षिप्तानि ॥ कैकेय्याः पाणिग्रहणसमये तस्याः पितुर्निकटे दशरथेन प्रतिज्ञातमासीद्यत्तत्पुत्रः स्वस्मादनन्तरं राजा भविष्यतीति ॥ वरद्वयमपि यत्कैकेय्या प्रदत्तमासीत् तत्र किमपि पूर्वनिबन्धनमीदृक्ता वा इयत्ता वा नासीत् ॥ सा च प्रतिज्ञा यद्यदिच्छति तत्तदेव प्राप्नुहीत्यादिरूपा ।एषा प्रतिज्ञा दशरथं चिन्ताकुलं नैवाकरोत् यतस्सा विस्मृतप्राया एव ॥ कैकेंय्या न किमपि कदापि प्रार्थितम् । यद्यत्तया वाञ्छितमासीत् तत्तत् सद्य एव तस्यै प्रदत्तमिति हेतोः तया अर्थिन्या नैवाभूयत ॥

अश्वपतये दत्ता प्रतिज्ञा कैकेय्याऽपि नोऽबुद्ध्यतेति प्रतिभाति ॥ एकः केकयराज एव तद्विषयं ज्ञातवान् ॥ समीचीनेषु कारणेषु सत्स्वपि अश्वपतिः दौहित्रार्थमवकाशवादं न समर्पितवान् ॥ सर्वथा स्वकीय भ्रातणामपेक्षया रामो गुणवत्तमः ॥ न केवलं वयसा ज्येष्ठः अपि तु गुणैरपि सर्वेषां श्रेष्ठः ॥ आस्मिन् विषये न कोपि सन्देहः कस्यापि ॥ कैकैय्यापि राममादृतवती स्वपुत्राद् भरतादपि राज्यभारं बोढुमर्हत्तरः राम इत्येव तस्या अभिमतम् ॥ इक्ष्वाकूणां वंश उपलभ्यमानाया आचारसंहिताया वैरुद्ध्येन यत्स्वस्मै प्रतिज्ञातं तद्विषय़ अवकाशवादे अश्वपतिरप्युदासीनोऽभवत् ॥ एतस्मिन् विषये ज्येष्ठएव अर्हतम इति अश्वपतेः सुनिश्चयः गुणभूयिष्ठयुक्तस्य प्रेयसोभरतस्य अलब्धावसरत्वमिति स्यान्नाम ॥

यदा वा मन्थरा अभिषेकसम्बन्धिवार्तामुपन्यस्य स्वकीयं दुरुपदेशं प्रारभत तदा कैकेयी रामं प्रति नितरां सुस्निग्धा एवाऽसीत् ॥ पश्चात् सा आदर्शभूता गृहिणी नैवासीदित्यपि स्पष्टीभवति ॥ एकेन वरेण भरतस्याभिषेचनं द्वितीयेन च रामस्य चतुर्दशवर्षावधिको वनवासश्च इत्येवं रूपस्य वरद्वयस्य कैकेय्या कृता प्रार्थना

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विस्फोटपदार्थ इव यदा दशरथमत्यन्तचकितमकरोत् तदा दशरथः कैकेथीमेवं स्मारयति-

भूतोपहतचित्तेव
ब्रुवन्तीं मां न लज्जसे ।
शीलव्यसनमेतत्ते
नाभिजानाम्यहं पुरा ॥

बालायास्तत्त्विदानीं ते
लक्षये विपरीतवत् ।
कुतो वा ते भयं जातं
यात्वमेवं विधं वरम् ॥ (अ.-XII-59-58)

-इत्यादि ॥

अन्वर्थे वाक्ये अस्माभिरेवमवगम्यते यत् कैकेय्यामीदृशानां दुर्गुणानामुत्पत्तिरभिवृद्धिश्च पश्चात् संजात इति ॥ एतादृशमवगुणोत्पत्तिर भिवृद्धिरतिसूक्ष्मेन वर्णनापटवेन क्रमशः औचत्यिानुगुण्येनोपनिबद्धेत्यहो वाल्मीकेः कविताचातुरी । प्रथमतः कैकेय्यां रामचन्द्रं प्रति वात्सल्याधिक्यं परिस्फुटमासीत् ॥ दशरथेन भरतशत्रुघ्नौ मातुलगेहं प्रत्यभिप्रायविशेषेणैव प्रस्थापिताविति च मन्थरा कथयति ॥ भरतस्यासान्निद्ध्ये एव रामस्याभिषेचनं कर्तुं शक्य इत्यपि सा वदति ॥ रामो निस्संशयं यौवराज्याभिषेचनमर्हतीति विश्वसन्ती कैकेयी नितरां मुमोद ॥ कैकेयीमुद्बोद्धुं स्वाभिप्रायानुकूलां कर्तुं च मत्थरया नयान्तरं स्वीकर्तव्यमासीत् ।

राष्ट्रकार्येषु सर्वेष्वपि पट्टमहिष्याः कौसल्यायाः प्रमुखस्थानमदीयत इति हेतोः कैकेयी तस्याः विषये किंचिदीर्ष्याकुलाऽसीदिति मत्थरा जानात्येव स्म, सुमित्रां प्रत्यपि साऽतिमात्रं स्निग्धा आसीदिति न। तेन कारणेन मत्थरा कैकेय्यै एवमुपदिशति यत् भरतस्य कैकेय्याश्च आपदवमतिश्च संभवेत् यदि सा सतर्का नाभविष्यत् ॥ रामस्यातिमात्रं वत्सल आसील्लक्ष्मणः ॥ तेन सः तन्माता सुमित्राश्च सुखासीनौ निश्चिन्तौ च भवितुमर्हतः स्म ॥ सपत्न्याः पुत्रेणावश्यं शत्रुणा भूयत इति प्रायोवादः ॥ तेन कैकेयी भरतश्चापदुन्मुखौ स्यातां नाम ॥ किन्तु ईदृशा वादमुखाऽपि कैकेयीं व्यतिचालयितुं पर्याप्ता नाऽभवन् ॥ कैकेयी एवं प्रतिजानीते यद्रामचन्द्रस्य सकाशात् कौसल्यापेक्षया प्रेमभक्त्यतिशये सा स्वयं प्राप्नुते स्म ॥ यदा हि रामाय राज्यं समर्पितमासीत्तदैव तदानीमेव भरतेनाऽपि तत्प्राप्तमिति सिद्धम् ॥ रामः स्वकीयान् भ्रातृन् स्वमात्मानमेवामन्यत ॥

कैकेयीं कीदृशा वादमुखा रामस्य निर्वासनं प्रत्युत्सुकां स्थिरमतीं च कर्तुं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्ता अभवन् तस्मात् प्राग् मन्थराया दुर्बोधनस्यामिषीभवनात्पूर्वं तस्या मनोवस्था कीदृशी आसीदिति विश्लिष्यावगन्तुं यतेमहि। रामं प्रति प्रेमवात्सल्यादि भासुरं हृदयौन्मुख्यं कैकेय्या आसीदेव। तत्तु न तस्याः स्वाभाविको विचारगतिविशेषः।। अर्वाचीनेषु केचिद्रामायणग्रन्थेषु कैकेयीं दुर्बुद्ध्याः निर्मुक्तां स्थापयितुं यतन्ते॥ कूटोपायचतुरया. कुब्जया व्यतिचालिता कैकेयी॥ रामस्याभिषेकस्य विधातोऽवश्यं करणीय इति देवानामभिलाष आसीदिति हेतोः मत्थरामपि ते अदुष्टां मन्यन्ते॥ नोचेत् रामस्य दण्डकारण्यं प्रति गमनं स्वकीयस्यावतारस्योनिर्वहणञ्च नाऽभविष्यताम्॥ अध्यात्मरामायणानुरोधेनैवंरीत्या कार्यनिर्वहणमासीत्॥ सुराः देवीं सरस्वतीमेवं प्रार्थयन्ते-भवती कैकेय्याः मत्थरायाश्च जिह्वामनुप्रविश्य एवं वाचयितुं ते प्रेरयतु इति।

अभिषेकस्योद्धोषणानन्तरमपि कौसल्या एवं शङ्कमाना आसीत् एष अभिषेकः भविष्यति वा न वा॥ तस्मादेव कारणात् सा समस्तं भारं देव्यै दुर्गायै समर्पयत॥ वाल्मीकिना विषयानपूर्णतया वर्णयितुं न कोपि प्रयत्नः कृतः॥ तेन कैकेयी एवं चित्रीकृता ईर्ष्याकलुषितमतिः द्रोहबुद्धिश्च तस्या नैसर्गिकस्थितिरिति॥ तथाऽपि रामं भरतापेक्षया तस्याः स्निग्धतरमवर्णयत्। तच्च रामस्य गुणातिशयेन सम्पादितमिति स एवास्मिन् विषये प्रशंस्यः। सकृदेव रामेण कैकेय्याः कौसल्यां सुमित्रां च प्रति कलुषमतित्वं स्पष्टतया कथितं तच्च निर्वासस्य प्रथमरजन्यामासीत्॥ सन्दर्भवशाद्रामेणोक्तात् वाक्यविशेषादपि तत्सूच्यते स्म॥ सूक्ष्मेक्षिकयाऽन्तःपुरवार्ता अवेक्षमाणाया सीतायाः अवगत्यामन्तःपुररहस्यानि निर्मुक्तानि नैव स्युः। कैकेयीसदृश्यां कलुषवत्यामपि श्रद्धाविषयं जनयितुमनुकूल आसीद्रामस्य व्यवहारः॥ दशरथस्य अवलेपकलुषितया उद्धतया च सपत्न्या कैकेय्या करिष्यमाणः स्वमातुरनादरं रामेण नावगतः॥ तथाऽपि तामनुनयेनानुकूलयितुं रामो यतत॥ तेन सौलभ्येन स्वकीये मातुर्जीविते अनुकूलाधिक्यं सिद्धं स्यात्, अत एव स्वार्थपरायणा कैकेय्यपि रामं प्रति स्निग्धा एवाभवत्॥

कैकेयीमेवं बोधयितुं दुश्शकं यद्रामस्य राज्यप्राप्तौ सा वा भरतो वा दुरवस्थामवश्यमनुभवेदिति॥ कौसल्या मधुरस्वभावा दीर्घकालेन परितापसहिष्णुश्च॥ यदि कश्चित् वदेत् सा सन्दर्भं प्राप्य कैकेयीं द्रुह्येत् तद्वाक्यं अवितर्कितमेव सा विश्वास्यं मन्येत॥ मन्थरा कैकेयीं स्मारयति यत् अपलेपभूयिष्ठा साभिमाना च सा सपन्त्याावपीडयन्नेव॥ कैकेयी इतरपत्न्यपेक्षया सुन्दरतरा तारुण्यभूयिष्ठा च॥ दशरथस्तस्यामतिमात्रमासक्त आसीत् नो चेदेतादृशी दशासन्धिर्नाभविष्यत्। पुत्रचतुष्टयस्य जन्मकाले नितरां प्रवया आसीद्धशरथः॥ तस्मित् काले

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कैकेय्यास्तारुण्यं तदवस्थमेवासीदिति न संभवति । तथापि तस्या रूपयौवनविषये सावधारणानिर्देशो न विस्मर्तव्यः । अभिषेकसंबन्धिनीषु प्रबन्धपरिपाटीषु निश्चितासु दशरथः कैकेय्याः अन्तः पुरं गंच्छति, तद्विषयकं वाल्मीकेर्वर्णनं नितरामर्थगर्भं, किन्तु समस्तलौकिकभागान् त्यक्तुमुद्युक्तस्य राज्ञः शोभां नाऽदत्ते । अवश्यकर्तव्यत्वेन कौसल्यया सह वनं गन्तव्यं वानप्रस्थानाश्रमे तिप्ठता ॥ अन्तः पुरमुपेत्य राजा दशरथः कौसल्यान्वेषी न वर्णितः । तया सहाभिषेकप्रबन्धपरिपाटयस्तेन चर्चा करणीयाः परन्तु तरुणीं रुपसौभाग्यशालिनीं कनीयसीं भार्यामेव पर्यवेक्षते तया सह रतिसुखलिप्सुः ।

स प्रविश्य महाराजः
स्वमन्तः पुरमृद्धिधमत् ।
न ददर्श स्त्रियं राजा
कैकेयीं शयनोत्तमे ॥

स कामबलसंयुक्तो
रत्यर्थी मनुजाधिपः
अपश्यन् दयितां भार्यां
पप्रच्छ विषसाद च ॥ (अ- X- 16-17)

वाल्मीकेः रत्यर्थीति शब्दप्रयोगो न केवलमर्थगर्भ अपित्वादिकवेस्तत्सन्दर्भं प्रति घृणातिशयमपि सूचयते ॥ एतत्तावत् न केवलं दशरथस्य राज्ञः व्यक्तिगतो विमर्श अपि तु स्वकीयां विषयलिप्सां नियमितुमसमर्थानिच्छांश्च पुरुषविशेषान् प्रत्यपि समालोचना एव ॥ एष शब्दः तस्मिन् सन्दर्भे वाल्मीकिना प्रयुक्ते यदा दशरथः कैकेय्यै प्रतिश्रुतं वरप्रदानं पुनरपि प्रतिजानीते ॥

अस्मिन्नितिहासे बहवस्तादृशाः पात्रविशेषाः वर्णिताः येषु सर्वेष्वपि कामात्मको दोषः स्फुटतया दृश्यते। दशरथस्य एतत् दौर्बल्यंभवनवातावरणमशेषं कलुषीकुरुते । महाकुलीना कौसल्या वीरमातृत्वेन पश्चादुपवर्ण्यमाना सुमित्रा चान्यत्र निष्कासिते दृश्येते। एतत्तथ्यं रामेण नावगतमिति न। यदा लक्ष्मणो वनं प्रति तदनुयात्रां रामं प्रार्थयते तदा तामनुमतिं निषेधयता रामेण एतत्कारणमुपन्यस्यते । राजा दशरथः कैकेयीवशग इतं कारणात् कौसल्या सुमित्रा च दुरवस्थां सोढुं बाध्ये स्याताम्। कैकेय्याः प्रतिकूलमाचरणं निवारयितुं लक्ष्मणस्यायोध्याया-मुपस्थितिरावश्यकीति ॥ यदा रामो वनं प्रति गमनाय स्वकीयं निर्णयं प्रकटयति तदा कौसल्याप्येतां वस्तुस्थितिं व्यक्तीकरोति ॥ मम पुत्रत्वेन जातवान् इति कारणेन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समस्ता विपद अनुभवितुं त्वं निर्बद्धः । पत्युरनावाप्तस्य सुखस्य पुत्रात् प्रतीक्षां तया कृता ॥ सर्वदाऽपि सपत्न्या उपालम्भः तां तुदति स्म ॥

सर्वेऽपि नायकाः विशिष्य धीरोदात्ताः निसर्गतः महासत्त्वाः नारीलोकंप्रति विशेषतः स्वपत्नीः प्रति सहानुभूतियुक्ताश्च । यदा दशरथस्य साक्षात्कारः कैकेय्या सह कोपभवने सञ्जातस्तदा सर्वानपि मनोरथान् प्रतिज्ञाय तां सान्त्वयितुं निर्बद्धः सञ्जातः किन्त्वारम्भात्प्रभृति दशरथस्य मनोभावना दासस्येवासीदिति न निषेद्धुं शक्यते । निस्सीमाः प्रतिज्ञाः न कमपि धर्मे दृढनिष्ठं राजानं भूषयन्ति । दशरथस्य सान्त्वनारम्भ ईदृशैः प्रश्नैः कृतः

कस्य वापि प्रियं कार्यं
केन वा विप्रियं कृतम् ।
कः प्रियं लभतामद्य
को वा सुमहदप्रियम् ॥ (अ - X- 31)

न्यायप्रियो धर्मनिष्ठश्च को वा नृपतिस्तादृशान् प्रश्नान् विनोदार्थमपि कर्तुमीहेत ? पुनरप्येवं पृच्छति

अवध्यो वध्यतां को वा
वध्यः को वा विमुच्यताम् ।
दरिद्रः को भवेदाढ्यो
द्रव्यवान् वाप्यकिंचनः । (अ - X - 33)

ईदृशस्य व्यवहारविशेषस्यैकमेव कारणं यद्राजा कैकेय्यामत्यन्तासक्त आसीदिति । यतः स्वात्मानं नियन्त्रितुं न पारयते किन्त्वस्मिन् सन्दर्भेऽपि दशरथस्यैको गुणातिशयः अतिमात्रं प्रशंसनीयो यद्रामं सर्वेषामपि लौकिकजातानामुपरि स्वकीयेषु विषयेषु स्वाभिलाषादप्युन्नतेः प्रतिष्ठापयति ॥

अवलिप्ते न जानासि
त्वत्तः प्रियतरो मम ।
मनुजो मनुजव्याघ्राद्
रामादन्यो न विद्यते ॥ (अ - XI - 5)

पत्न्या वास्तविकं स्वभावविशेषमवगम्यापि दशरथस्यानुरोधबाहूल्यं तदवस्थमेव । कदाचित्स तां भर्त्सयति कदाचित्प्रार्थयते च ॥ तां प्रीणयितुं तस्याः पदयोः निर्लज्जः सन् पतति च ॥ वाल्मीकेस्तद्विषयकं वर्णनं पश्यत-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अञ्जलिं कुर्मि कैकेयि
पादौ चापि स्पृशामि ते।
शरणं भव रामस्य
माधर्मो मामिह स्पृशेत्।
इति दुःखाभिसंतप्तं
विलपन्तमचेतनम्।
घूर्णमानं महाराजं
शोकेन समभिप्लुतम्॥
पारं शोकार्णवस्याशु
प्रार्थयन्तं पुनः पुनः।
प्रत्युवाचाथ कैकेयी
रौद्रा रौद्रतरं वचः॥ (अ - XII- 36-38)

इक्ष्वाकुवंशप्रभवस्य कस्यापि कियति शोभाऽनेन वर्णनेन स्यात्। दशरथेन स्वयमेवमुक्तं यत् सर्वेऽपि जनाः तं बालिशं कामात्मानं च वदिष्यन्ति यः पत्नीं प्रीणयितुं स्वकीयं धर्मिष्ठं पुत्रं प्रवासयाञ्चकारेति॥

भरतेनैव कृता कैकेयीस्वभावनिन्दा इतोधिकमपि कर्कशतराऽनुभूतम्। यदाऽयोध्यां पुनराहूतः स मातुलगृह एव दूतं पृच्छति-

कच्चित् स कुशली राजा
पिता दशरथो मम।
कच्चिदारोग्यता रामे
लक्ष्मणे च महात्मनि॥
आर्या च धर्मनिरता
धर्मज्ञा धर्मवादिनी॥
अरोगा चापि कौसल्या।
माता रामस्य धीमतः॥
कच्चित् सुमित्रा धर्मज्ञा
जननी लक्ष्मणरय या।
शत्रुघ्नस्य च वीरस्य
अरोगा चापि मध्यमा॥

तदनन्तरं स्वमातरमुद्दिश्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मकामा सदा चण्डी
क्रोधना प्राज्ञमानिनी ।
अरोगा चापि मे माता
कैकेयी किमुवाच ह ॥ (अ - LXX-7-9)

एतुदवधेयं यद् भरतस्य प्रश्नो वाचिकं दौत्यमाहरतं दूतं प्रत्येव क्रियत इति ॥ किंचिद्विचारशीला विमर्शका एतादृशं प्रश्नं कुर्वतो भरतस्य स्वभावमपि विमृशन्ति यतः पर्याप्तं कारणं विनैव मातरं प्रति ईदृशं वाक्यं प्रयुङ्क्ते ।

भरतेन नैतदवगतं यद्रामस्य प्रवासः कैकेय्या स्वस्य पुत्रस्य कृते प्रेरित इति ॥ तथापि मातरमेवं किमर्थं विमृशति ? एतेनास्य तथ्यस्य व्यक्तीभावो यत् स्वमातुः स्वभावदौर्बल्यानि पुत्रेण भरतेन सम्यग् ज्ञातानीति ॥ कौसल्यासुमित्रयोः सौशील्यादिकं गुणविशेषमपि सम्यग् परिज्ञातवान् कैकेयीनन्दनः ।. प्रत्युत स्वमातुर्दौर्बल्यं तदपेक्षया दुस्सहः तेनानुभूतं स्यात् । एतेन शोकसंविग्नो भरत इत्यपि नूनं मन्तव्यं । कथं वा भरतो दीर्घेण कालेन स्वमातापित्रोर्वियोगमनुभवन् मातुल गेहे निवासं कर्तुमशक्नोत् ? दशरथेन स न कथमप्याज्ञान्तरं प्रतीक्ष्य प्रवासः क्रियतामिति न प्रेषितः । एतत्स्यान्नाम अयोध्यां प्रति तमाकृष्टुं पर्याप्तं कारणं नासीदथवाऽयोध्याः तं दूरीकर्तु किमपि कारणमासीत्। दशरथस्याऽन्तः पुराभ्यन्तरे अभिनीतस्य नाटकस्य मूकदर्शकत्वेनावस्थानं तस्य शोकावहमासीत् किं ? स्वपितुर्वैवश्यं तेनावगतम्। तन्नगरात् दूरे स्थातुं पर्याप्तोवसर अधिगतः तदनुसृत्य तेन सहर्षं स्वीकृतं स्यात् ? दूतः कश्चनापरिचितः। तं प्रति स्वमातर मधिकृत्य निन्दागर्भितैश्शब्दैः प्रश्नः कृतस्तस्य पृष्ठभूमित्वेन किमप्यवशिष्टं स्यात् ? एतेन स्वकीयां कथां स प्रश्न एव कथयतीति स्यात् । कैकेयीं प्रति दशरथस्य दौर्बल्यं तस्या अवलेपाधिक्यं च सर्वेरपि जनैः सम्यगवगतं चर्चाविषयीभूतं च स्यात् । यावान् विषयः अत्यथा गुणविशेषविशिष्टस्य दशरथस्य विषये तत्संभाषणमुपांशुकृतं वाऽनुच्चरितं वा स्यात् ॥ कैकेयी विषयेऽन्तः पुरकर्मचारिषु तादृशी नियन्त्रणा कदाचिन्नासीत्। नोचेदपरिचिते साधारणे दूते ईदृशान् प्रश्नान् कर्तुं भरतः कथं वोद्युक्तः स्यात् ? तथापि भरतविरुद्धो विमर्शः असमर्थनीय इति वक्तुं न शक्यते ।

दशरथ आदर्शनृपतिरादर्शपतिश्चेति वक्तुं न शक्यते ॥ तथापि भगवान् विष्णुस्तं स्वपितृत्वेन कथं वा स्वीचकार ? देवान् सान्त्वयन् भगवताऽहं दाशरथिर्भविष्यामीति प्रतिज्ञातं ॥किं वा भगवतो मनसि राजधर्मेषु पुरुषार्थेषु च पर्याप्तं प्रकाशं व्यापयितुमिच्छा आसीत् ?

यदा द्वावपि भ्रातरौ सीता च वनवासं धृत्वा कालं यापयामासुस्तदा यद्यपि कादाचित्करूपेण रामः क्षमायाः मूर्तिमद्रूपा सीताऽपि कैकेयीं प्रति टीकां टिप्पीणीं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न कृतवन्तौ इति न ॥परन्तु नान्यतरस्य हृदये दशरथं प्रति विद्वेषाभिभूतत्वं कदाप्यभूत् । स्वपिता धर्मार्थयोरपेक्षया कामस्याग्रिमत्वं दत्तवानित्यैतत् रामाय न रोचते स्म । रामस्य हृदये एतत्कारणमेव दुःखमासीद्यत् भाविपौराः स्वं पितरं कामात्मकत्वेन भर्त्सनं कुर्युः तथापि रामस्य हृदयं पितरं प्रति प्रीत्यतिशयतरंगितमादराप्लावितं चाभूदेव । जनकनन्दिनी तावत् श्वशुरं प्रति न कामपि दुरुक्तिमुच्चरितवती कदापि ॥ न केवल मेतत् अपि तु स्वात्मनः श्वशुरे ममताभिमाने सर्वदा प्रकट्यति च ॥ रावणेन सह संवादे जाते तं स्वभर्त्रा सह तुलयन्ती सा रामं दाशरथित्वेनैव वर्णयति । 'तदन्तरं दाशरथेस्त्वैव च' इत्यसकृत् रावणं चेतयन्ती सा वदत्येव ।

अन्तिमे घट्टे राजा दशरथः स्वकीयं स्खालित्यं इतरापेक्षया सम्यंक्तरमभ्यजानात् । अस्मिन् अन्तिमे रांमविषयके व्यवहारे धर्मस्थिरत्व मवश्यमेव प्रकटयितव्यमिति तस्य हृदये दृढ़निश्चयोभूत् यद्यपि तस्यानाुष्ठितेन स्वमृत्युरवश्यमेव भविता ॥ स्वजीवितस्यान्तिमेषु निमेषेषु रामं प्रति यः अन्याय्यो व्यवहारः प्राक् तेनानुष्ठितस्तमेव मनसा परिचिन्तयन्नवर्तत । रामस्य मात्रा सहैव वर्तितुमैच्छत्, रामस्य सीतायाश्च नामोच्चारणपूर्वं कालंगतिं च प्राप्तवान् राजा दशरथः । दुर्व्यवहारैर्जनितानां दुरितानामपनयेन प्रक्षालितात्मा चाभवत् स वात्सल्यवान् पिता । यः पश्चात्तापेनैव पापानामपनोदनं भवति पापानां पश्चात्तापः प्रायश्चित्त इति न केवलं क्रैस्तवीये धर्मग्रन्थे वरीवर्ति अपि तु सनातन धर्मग्रन्थेष्वपि निश्चप्रचम् ॥ एतेन कारणेन दशरथस्य स्वर्ग इन्द्रस्य देवानां च सम्मुखे च उन्नतं पदं प्राप्तमिति नैवाश्चर्यकृत् ॥ इन्द्रेण सहैव कृतकृत्यौ तनयौ द्रष्टुं स भूमाववतरति ॥

अस्मिन् सन्दर्भे दशरथं समुन्नतपदे पश्यामः । लक्ष्मणं सीतां च आचारव्यवहारेषु समुपदेष्टुमत्यन्त अर्ह एवासीत् सः ॥ अग्निपरीक्षा कारयितुं यद्रामेण सीता निर्बद्धा तद्धेतोः रामं प्रति मन्युः न कर्तव्य इति सीतामुपदिशति । जनतादृष्टौ तस्याः परिपावनत्वं प्रदर्शयितुमेव तेनेदमनुष्ठितमिति स्मारयति च ॥

कर्तव्यो न तु वैदेहि
मन्युस्त्यागमिमं प्रति ॥
रामेणेदं विशुद्ध्यर्थं
कृतं वे त्वद्धितैषिणा ॥ (यु - CXIX- 35)

उत्तरकाण्डे प्रतिपादितरीत्या अग्निपरीक्षाऽपि जनापवादं परिहर्तुं क्षमा नैवासीदिति प्रतिभाति । रामस्य सततं सेवनमनुष्ठातव्यमित्युपदेशं दशरथो लक्ष्मणाय प्रयच्छति ॥ एवमनुष्ठितः वैदेह्या सह रामं प्रसन्नं कुर्वतश्च तस्य स्वर्गप्राप्तिः सुनिश्चितैव ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामं शुश्रूष भद्रं ते
सुमित्रानन्दवर्धन।
रामः सर्वस्य लोकस्य
हितेष्वभिरतः सदा।
अवाप्तधर्माचरणं
यशश्चविपुलं त्वया
एवं शुश्रूषयत्यग्रं
वैदेह्य सह सीतया। (यु - CXIX-30-33)

रामः समस्तलोकहितैषीति च स विशदीकरोति ॥ त्रयोपि लोकाः सेन्द्रश्चे देवाः रामं पुरुषोत्तमं सादरमर्चयन्ति ॥

एते सेन्द्रास्त्रयो लोकाः
सिद्धाश्च परमर्षयः।
अभिवाद्य महात्मान
मर्चन्ति पुरुषोत्तमम्॥ (यु - CXIX-31)

अनन्तरे श्लोके दशरथस्तादृशं विषयं वर्णयति यो विचारोऽस्माभिः कर्तव्यः ॥

एतत् तदुक्तमव्यक्त
मक्षरं ब्रह्मसम्मितम् ।
देवानां हृदयं सौम्य
गुह्यं रामः परंतपः ॥ (यु - CXIX-32)

रामं देवानांहृदयं अव्यक्तं परंब्रह्म चेति स्फुटं प्रतिपादयति॥ श्रीरामहृदयमध्यात्मरामायणस्य प्रमुखं तात्विकं रहस्यात्मकं च तत्वंम्॥ अस्मिन् सन्दर्भे रामविषयको मन्त्रः दशरथेन साक्षादुच्चरितः। स्वात्मनः पुत्रत्वेनावतीर्णस्य रामस्याध्यात्मिकं तत्वमेव दशरथस्य औन्नत्यप्राप्तौ कारणभूतम्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ सह सीतासौमित्रे श्रीरामकथा ॥

नारदेनोपवर्णितस्यादर्शपुरुषस्य गुणातिशयाननुचिन्तयन् वाल्मीकिर्निषादं क्रौञ्चपतत्रिणं विघ्यन्तं ददर्श ॥ तत्क्षणादेव मनोभूतः शोकः श्लोकत्वेन बहिर्निर्गतः शीघ्रमेव तत्पुरतः प्रकटीभवन् ब्रह्म तद्रचितः श्लोकरूप एवेति तं बोधयामास । स च महर्षिमन्वरुध्यत-यच्चानुरोधो .वस्तुत. आदेशरूप आसीत्-नारदाच्छ्रुतं वृत्तमनुकृत्य काव्यरूपं प्रबन्धं विरचितुम् । वस्तुतो रामस्यासीत् कथा किन्तु ब्रह्मा तां कथां रामस्य सह सौमित्रे वैदेह्याश्च राक्षसानां च कथात्वेन स्पष्टीकृतवान्

रामस्य सहसौमित्रे
राक्षसानां च सर्वशः ।
वैदेह्याश्चैव यद्वृत्तं
प्रकाशं यदि वा रहः- इत्यादि (बा - II-94)

किमर्थं लक्ष्मणस्य सीतायाश्च शब्दतो निर्देशः कृतः? रामस्य कथाया आख्यानसमकालमेव लक्ष्मणस्य जनकात्मजायाश्च चरितं प्रमुखतयाऽख्यातमेव स्यात् । तथापि भगवान् विरिञ्चिः शब्दतस्तौ द्वौ निर्दिशति ॥ को वाऽत्र हेतुः ? । रामायणकथायाः प्रारम्भे सा पौलस्त्यवधनाम्ना निर्दिष्टा तस्याः कथायाः सीताया महश्चरितत्वेनापि निर्देशो वर्तते ॥ नृपकुमारौ कुशलवौ रामायणे वैदेह्याश्चरितं गायतः ॥

वस्तुस्थितिरियं यद् भ्रातरं लक्ष्मणं विना रामस्य पृथगस्तित्वमेव न वर्तते । अपि च तस्य व्यक्तित्वस्योन्नततमः स्तरः सीतया सह संपृक्तत्वेनैवावतिष्ठते । स्वाभाविकतया ब्रह्ममणोऽयं निर्देशो-रामस्य कथा लक्ष्मणेन वैदेह्याश्च संमिश्रिता एव प्रकटीभवतु इति ॥ रामस्यावतारो राक्षसानां वधायैव ॥ अत एव एवं वादमुखो यदियं कथा राक्षसानां चापीति ॥ रामस्य गुणातिशयान् परभागशोभात्वेनैव प्रदर्शयितुं राक्षसराजं प्रतिनिधित्वेन स्वीकरोति कविः । न केवलं तस्य विक्रमातिशयेन अपि च स्वतेजसो वैभवेन चात्युन्नतां पदवीं समवाप्नोति राक्षसराजः ॥ वस्तुत आधुनिकभारतीयभाषासु निर्मितानां रामायणकाव्यानां कानिचिद्रावणं बृहदाकारत्वेनोपवर्णयन्ति यतस्तादृशं महासत्त्वं पराजितवान् रामस्तस्मादपि वैभवातिशयोत्कर्षं . प्राप्नोति । किन्तु वाल्मीकिना स्ववर्णनेऽतिशयोक्तिर्नादृता ॥ सर्वेन्द्रियान् संयम्य तपांसि विधाय रावणः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परमौत्कृष्ट्यमवाप किल। स्वकीयं पराक्रमातिशयं रामस्य पुरतः प्रदर्शयन् रामं प्रतिद्वन्द्वित्वेन समाह्वयते राक्षसराजः॥ रामः सर्वथा समस्तकरणानां नियन्त्रकत्वेन स्थिरीभवन् धर्म्यान्याय्याच्च मार्गान्न व्यतिचलति॥ तस्मादेव कारणाद्रावणं जेतुं शशाक॥

रामात् पृथक् लक्ष्मणस्य न कदाप्यस्तित्वं प्रकटितमासीत्। बाल्यादारभ्य रामेण सह संपृथक्त्वेन स आत्मानं लभते॥ उत्तररामायणं यद्यनुसरामस्तर्हि यस्मिन् क्षणे रामात् लक्ष्मणो विरक्तो भवति तस्मिन्नेव समये तस्यास्तित्वस्याभावः॥ इदमपि सत्यं यद्रामः सीतयापि विमुक्तः स्यात् किन्तु लक्ष्मणेन नैव। रामायणकथायां रामावतारसर्ग एव लक्ष्मणं रामस्य वहिश्चरप्राणत्वेन वर्णयति कविः।

लक्ष्मणो लक्ष्मिसम्पन्नो
बहिः प्राण इवापरः॥
न च तेन विना निद्रां
लभते पुरुषोत्तमः॥ (बा - XVIII-30)

पाश्चात्यसाहित्ये व्यक्त्यन्तरमिति (alter ego) प्रयोगो विद्यते॥ केषाञ्चिद्विमर्शकानां कथानुगत्या लियर राजा King Lear इति नाम्नि नाटके प्रकटीभवन् विदूषको राज्ञो व्यक्त्यन्तरत्वेन ग्राह्यः। आदौ यो राजा महासत्त्वोऽतिगम्भीरश्चासीदिदानीं बालीशो बार्धक्यदुर्बलश्च संभूतः। राज्ञो विवेकव्यवस्थितं रूपं विदूषकेन प्रतिनिधीक्रियते राज्ञः श्रोत्रयोःसततं तद्वास्तविकरूपं बोधयति च। यदा वस्तुतत्त्वं राज्ञा स्वानुभवीक्रियते विदूषकस्तिरोभवति।

अर्थान्तरविधया लक्ष्मणो रामस्य व्यक्त्यन्तरं भवितुमर्हति। अस्य कथनेऽस्मभिः संकोचो न कर्तव्यः-यतः कविनैव लक्ष्मणो बहिश्चर प्राणत्वेनासकृदुपवर्णितः। शूर्पणखासदृशाः केचित् प्रथमत एवैतत्तत्त्वं बोधितवन्तः। सर्वदा स्वभ्रातृनिघ्नस्तदनुगामी च लक्ष्मणः॥ एतद्विषये भरतात्पृथक्त्वमावहति लक्ष्मणः। भरतः स्वभ्रातरमादरातिशयेन सर्वदाऽनुसरन्नासीत्तथापि रामेण सह विवादे न कदापि संकोचमनुभवति स्म यदा सा स्वात्मानमुपपन्नं समञ्जसं च मनुते स्म। लक्ष्मणस्तथाविधं विवादं कर्तुमसमर्थ एव। तथाऽपि स्वभ्रातृव्यति रिक्तमभि प्रायभेदं स्पष्टत्वेन प्रकटीकर्तुं स सज्जोऽप्यासीद्यदा कदाचित्। एतत्किं वा प्रदर्शयतीति बोद्धुं तादृशान् सन्दर्भान् विशकलीकृत्य एव पर्यवेक्षणं कार्यम्।

साधारणतया राममविचारयन्नेवानुसरति स्म लक्ष्मणः। स्वात्मनो वादमुखं परित्यक्तुं लक्ष्मणो निर्बद्ध इति न यतः द्वावपि समानाभिप्रायौ स्याताम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ताटकाभिभवसमये तादृशः कश्चन सन्दर्भः समभवत् ॥ विश्वामित्रेण द्वावपि प्रथमत एव केवलं स्त्रीत्वेन ताटका न मर्षयितव्या इत्येवोद्बोधितः किन्तु कर्तव्यमुहूर्ते समायाते रामेण निश्चयान्तरं स्वीकृतम् ॥ धर्मविरोधेन स्त्रीवधो न न्यायीकर्तव्य इत्येवं कृतनिश्चयो रामः लक्ष्मणमेवमवादीत्—

एतां पश्य दुराधर्षां
मायाबलसमन्विताम् ।
विनिवृत्तां करोम्यद्य
हृतकर्णाग्रनासिकाम् । (बा - XXVI-11)

यदा रामस्तस्याः करौ चिच्छेद तदा लक्ष्मणस्तां कृत्तकर्णनासिकामकरोत् ।

रामे वनवासायाज्ञप्ते कौसल्या तमनुसरामीति वदति ॥ एत तच्छ्रुत्वा लक्ष्मणः आत्मनो नियन्त्रणं कर्तुमशक्नुवन् प्रतिषेधं प्रकटयति ॥

तथा तु विलपन्तीं तां
कौसल्यां राममातरम् ।
उवाच लक्ष्मणो दीन-
स्तत्कालसदृशं वचः ॥

न रोचते ममाप्येत-
दार्ये यद् राघवो वनम् ।
त्यक्त्वा राज्यश्रियं गच्छेत्
स्त्रिया वाक्यवशंगतः ॥

विपरीतश्च वृद्धश्च
विषयैश्च प्रधर्षितः ।
नृपः किमिव न ब्रूया
च्चोद्यमानः स मन्मथः ॥ (अ - XXI 1-3)

अयमेव प्रथमोऽवसरः यदा लक्ष्मणः स्व भ्रातृविरुद्धं वदत्याचरति च ॥ दशरथं प्रति लक्ष्मण एवं वदति यद्राजा पुनरपि बाल्यावस्थः सन् व्यवहरति ॥ यदि कैकेयीवशगो भूत्वा स्वपुत्रं रामं राज्यादपनेतुमाज्ञापयति तर्हि तस्य वधोऽपि न्याय्य एव । भ्रातरं परिरक्षन् समस्तमपि लोकमभिभवितुं स्वात्मानं सज्जं प्रकटयति च लक्ष्मणः। यद्येष धर्म इति कथ्येत तर्हि स्वात्मानं धर्मविरुद्धं मन्तुमपि स न विचिकित्सेत ॥

लक्ष्मणः सुलभकोपस्तथैव सुलभशान्तश्चेति तस्य व्यवहारादधिगन्तुं शक्यते । तं स्वाभिप्रायानुकूलेनाधिगन्तुं रामो न कदापि कृच्छ्रतामन्वभवत् । नेदृशो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ममाभिप्रायो यद् भिन्नाभिप्राययोर्द्वयोरेकोऽपरं बलवत् स्वाभिप्रायविधेयं करोतीति। अभिप्रायद्वयस्य सामञ्जस्येन मिथो विलयनमित्येव मन्तव्यम् । रामस्य स्वाभाविकं प्रतिकरणं कदाचिद् बलेन नियम्यते किन्तु लक्ष्मणस्य मुखात्तन्निर्गच्छति। रामस्योन्नततरो भव्यतरश्च स्वात्मा सर्वदा प्रतिष्ठां लभते। प्रतिषेधप्रकटनं न चिरस्थायि सम्यग् दाम्यते च । यद्यपि स्वापितुर्व्यवहारैर्लक्ष्मणोऽतिमात्रं प्रकोपितो ऽभवत्तथाप्यन्येद्युरेव गुहेन साकं संवादकरणसमये स संवेदनाप्राकट्येन पितरं प्रति बहु वदति ॥ तेन मनसि एवमनुभूयते स्म यत्कौसल्या दशरथश्च रामेण वियुक्ता वेकमपि दिनं जीवन्तौ भवितुं न शक्नुयातामिति । कथं वा दरशथो रामेण विना जीवेत् ? कथं वा च कौसल्या दशरथं विना प्राणान् धारयेत् ?

चित्रकूटे यदा भरतो रामदर्शनार्थं सपरिवारश्चतुरङ्गसेनया च साकं समागच्छति तदा लक्ष्मणः क्रुद्धो भूत्वा भरतविरोधेन बहु प्रलपति । रामस्य हानिं कर्तुमिच्छन्नेव समागतो ऽयमित्येषा मिथ्या धारणा लक्ष्मणस्य सञ्जाता। सा च क्षणिका न कालान्तरस्थायिनी ॥ एकदा रामोऽपि भरतविषये मिथ्याधारणालवं प्रकटयामास किल। रामः स्वयं भरतागमनवेलायां समुद्भूतं महाघोषं श्रुत्वाऽद्भुतपरतन्त्रः समभवत् ।

भरतविषये तस्याऽशङ्का क्षणमात्रस्थायिनी क्षिप्रमेव तिरोऽभूत्। किमर्थं वा भरतस्य तदा तत्रागमनमिति विचिन्तयन् कदाचित्समयमन्वभवदिति तथ्यमेव । भरतं प्रति गहनतया विचिन्तयन् सर्वमपि विषयं सम्यक्तया स प्राबोधयत्। भरतागमनस्यैक एव उद्धेश्यः स्यादिति सुस्पष्टमासीत्तस्य मनसि। तस्मिन् विषये रामस्यानुमानमुपपन्नमेव समभवत्। स्वभ्रातुर्विषये सञ्चिन्त्यमाने लक्ष्मणस्य विकारविस्फोटा अनियान्त्रिताः सम्भवन्ति ।

विराधेन सह संघर्षे जाते जनकतनयां राक्षसाधमेनोत्क्षिप्तां दृष्ट्वा रामः क्षणमात्रमितिकर्तव्यतामुढः समजायत। अत्र सन्दर्भे लक्ष्मणो रामस्य नैसर्गिकमात्मानं प्रतिनिधीकरोति। एतत् सुस्पष्टं यद्रामो भरतेन कृताद्दीर्घादपि संवादानन्तरं मानसिकसन्तुलनं सम्पूर्णतया पुनर्लब्धुं सद्यो न प्रभवति। धार्मिकपन्थामनुसर्तुं प्रलोभनैः सह साफल्येन संघर्षं कृतवान् ननु । तथाप्येतेन तस्य मानसिकसन्तुलनमीषदपि बाधितमिति किंवा वकुंत शक्यं? वाल्मीकेः तत्रत्यं वर्णनमवलोकय-

तं मातरो बाष्पनिरीतकण्ठयो
दुःखेन नामन्त्रयितुं न शेकुः ।
स चापि भ्रातृरभिवाद्य सर्वा
रूदन् कुटीं स्वां प्रविवेश रामः ॥ (अ - CXII-31)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदा यदा पारवश्याक्रान्ता दशा रामस्य सञ्जायते तदा तदा लक्ष्मणः धीरतरो भूत्वा स्वाभिप्रायानुसारं कार्यकलापान् नियन्त्रयति ॥ मारीचस्य वधानन्तरं लक्ष्मणेन साकं प्रतिनिवर्तमाने रामे तस्य मनः शङ्का कुल आसीत् । सीता आश्रमे असन्निहितेति दृष्ट्वा राम आत्मनियन्त्रणं कर्तुमशक्तः समभवत् ।आदौ विपत्तिमनुचिन्त्य भग्नहृदयो विलापं कर्तुमारभत। इतस्ततो विकीर्णानि भूषणशकलानि दृष्ट्वा राक्षसेन केनचित् साऽपहृता इत्यनुमितिं चकार। तदनु तस्य क्रोधः शोकाभिभवेन प्रादुरभूत्। अतिक्रोधेन समविष्टस्य रामस्याकारः कालाग्निसदृशः क्रोधे-इति नारदेनोक्तं वर्णनं न्याय्यीकुरुते स्म ॥ रामः समस्तं जगत् समुच्छेदयितुमनाः यदि त्रिदौकपः सीतां प्रत्यर्पयितुं सज्जा न भवेयुः । अस्मिन् सन्दर्भे लक्ष्मण एव स्वभ्रातरं सान्त्वयति। "अद्यावधि भवान् मधुरस्वभावः सन् समस्तानां प्राणिनां कल्याणं जनयितुं सन्नद्ध एव दृष्टः । कस्यचिदपराधात् हेतोः समस्तमपि संसारं समुच्छेदयितुं नार्हति साम्प्रतम्" ॥ तदनन्तरं रामं याथार्थ्येन सुविदितं कर्तुं स्वाभाविकं मानसिक सामञ्जस्यं सन्तुलनं च प्रापयितुं प्रयतते- "एतत् सुव्यक्तमेव यत् केनचित् सीताऽपहृता दूरं नीता च । आवाभ्यां तदन्वेषणे समुद्यतौ भवितव्यौ" । एतस्य वचसः उद्दिष्टः प्रभावः समधिगतः रामः स्वाभाविकीं दशां प्रत्यानीतश्च । द्वावपि समुद्दिष्टं कार्यं निर्वोढुं प्रयतमानावभूताम् ॥

प्रत्युतः कबन्धेन सह संघर्षे संजाते लक्ष्मणः प्रथमतः प्रनष्टमानसिकसन्तुलनः सञ्जातः ॥ रामस्तं सान्त्वयति धैर्यं धारयति च। मिथः साहाय्येन प्रवर्तमानौः कार्यसिद्धिं प्रति प्राचलताम् ॥

सोपकर्तुः कार्यनिर्वहणे सुग्रीवमुदासीनं दृष्ट्वा रामे संक्रुद्धे लक्ष्मणः आत्मनियन्त्रणं कर्तुं न शशाक। यत्र यत्र ज्यायसो भ्रातर अभिमतस्य हानिलेशो भासते तत्र तत्र लक्ष्मणस्य विकारविस्फुरणमतिमात्रं सञ्जायते ॥

स पूर्वजं तीव्रविवृद्धकोपं
लालप्यमानं प्रसमीक्ष्य दीनम्।
चकारं तीव्रां मतिमुग्रतेजा
द्धरीश्वरे मानववंशवर्धनः ॥ (कि - XXX - 85)

कृतघ्नं भोगलालसं कपीन्द्रं हन्तुमेव कृतमतिर्वभूव स रामावरजः ।

मतिक्षयाद् ग्राम्यसुरवेषु सक्त
स्तवप्रसादात् प्रतिकारबुद्धिः ।.
हतोऽग्रजं पश्यतु वीरवालिनं
न राज्यमेवं विगुणस्य देयम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न धारये कोपमुदीर्णवेगं
निहन्मि सुग्रीवमसत्यमद्य।
हरिप्रवीरैः सह वालिपुत्रो
नरेन्द्रपुत्र्या विचयं करोतु॥ (कि - XXXI - 3,4)

इत्यादि स्वभ्रातृवचनानि श्रुत्वा रामस्तमुपदिशति

नहि वै त्वद्विधो लोके
पापमेवं समाचरेत्।
कोपमार्येण योहन्ति।
स वीरः पुरुषोत्तमः॥ (कि - XXXI - 6)

रामोऽवश्यं जानात्येव यत् क्रोधः मानवसहज एव॥ सः कदाचित् कोपं न कुरुत इति न किन्तु कदा वा कोपो नियन्त्रितव्य इत्यवश्यमेव रामो जानाति स्म॥

.यदा रामस्य शरणागतिं कांक्षन् विभीषणो रामस्य सकाशं प्राप्तस्तदा रामस्य लक्ष्मणस्य च प्रतिकरणं विभिन्नमेवाऽसीत्। विभीषणस्य व्यवहारं दृष्ट्वा लक्ष्मणेन नितान्तमुद्विग्नेनाऽभूयत॥ स्वभ्रातुर्विषये स्वकीयो य आदरातिशयोऽन्यस्यापि तादृशेनैव भवितव्यमिति लक्ष्मणेन निश्चितमासीद्वा? यवीयान् भ्राता ज्यायांसं कथं वा परित्यज्याऽऽपत्काले विशेषतश्शत्रुं शरणं गच्छेत् यद्यपि स ज्यायानतिमात्रं दुष्टः स्यात्? एतं विषयं प्रति रामोऽप्यवश्यं चिन्तितवानेव किन्तु सर्वेऽपि भ्रातरो भरतसदृशाः न भवेयुः॥ अपरं च रामेणैष्र विषयो विशदीकृतो रावणस्याऽपि शरणप्रदाने न काऽपि विचिकित्सा तस्येति-

सकृदेव प्रपन्नाय
तवास्मीति च याचते।
अभयं सर्व भूतेभ्यो
ददाम्येतद् व्रतं मम।
आनयैनं हरिश्रेष्ठ
दत्तमस्याऽभयं मया।
विभीषणो वा सुग्रीव
यदि वा रावणः स्वयम्॥ (यु - XVIII - 33, 34)

अत्र एका वीक्षणगतिः रामस्य वचनैः अपरा च लक्ष्मणस्य वचनैश्च व्यक्तीकृता॥ प्रबलेन रामस्य वचनेन कार्यस्य, निश्चयः सञ्जातः॥

न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः इत्येतद् रामस्य वचनमधिकृत्य विभिन्नाभिप्राया प्रकटीकृताः॥ लक्ष्मणः स्वात्मानमादर्शभूतं भ्रातरं मनुते स्म इति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लक्ष्मणस्याऽभिमानं निहन्तुमिच्छति स्म राम इति कञ्चन व्याख्याता सूचयति ॥ एष विचारो न्याय्यो वा सम्यग् निर्णीतो वा इति न प्रतिभाति । भरतेन सह या तुलना कृता सा सन्दर्भानुगुणा यतः लङ्काधिपत्यचर्चा तत्र सङ्गता । लङ्कायाः सिंहासनं विभीषणाय प्रदातव्यमिति रामेण पूर्वमेव संकल्पितं अभिषेकनिर्वहणमपि प्रतिश्रुतम् । विभीषणेन तदुपायनं सादरं स्वीकृतं च । यद्यपि पितुराज्ञाबलेनं भरतस्य सिंहासनेऽधिकृतत्वं सिद्धं तथापि तेन तत्परित्यक्तम् ॥ प्रत्युत जीवतो ज्यायसो भ्रातुः स्थाने विभीषणोऽभिषिच्यते । एतस्मात् कारणात् तेन स कुमानवः कुभ्राता वा भवतीति निर्णयो न करणीयः ॥

यदि धर्मो दुर्जनानामभिवृद्धिकारकः सज्जनानां हानिकारश्च भवेत्तदा लक्ष्मणस्तादृशं धर्ममतिमात्रं विमृशन् दृश्यते इति वयं पूर्वं दृष्टवन्तः । इदंप्रथमतया लक्ष्मणकृतस्तादृशो विमर्शः कौसल्याया निलयात् समभवदित्यपि वयमवलोकयामास । लङ्कायां मेघनादेन सीता निहतेति पश्चादतथ्येन स्थापिताऽपि सूचना यदा लक्ष्मणेन प्राप्यते तदा स धर्मं धर्माभिनिवेशं चातिमात्रं कठोरतया विमृशति । एतस्मिन् सन्दर्भे रामस्तेन सह विवादाय नैवोद्युक्तः यतः स स्वयमपि कर्णकठोरया सूचनयाऽतिवेलं बाधित आसीत् । तस्य करणानि च स्वस्वकृत्ये नैव प्रसरन्ति स्म ।

द्वावपि भ्रातरौ धर्मं प्रति विभिन्नाभिप्रायवन्ताविति निगमनं कुर्याम वा ? ग्धम् ममाभिप्राये एतस्य ? निगमनस्य नैवावकाशो रामकथावाचने लक्ष्मणसापेक्षत्वमसन्दिग्धम् ॥ अनवरतं धर्मानुसरणं सरलं कर्म नैव । मिथः संघर्षः स्यान्नाम । इतरविषयानविचार्यैव धर्मस्य प्रामुख्यमग्रगण्यता च निर्विवादा ॥ लक्ष्मणस्य स्तोभप्रकटनानि रामस्य बीक्षणगत्या अपि रूपान्तरं भवेन्नाम परन्तु रामे परमोच्चादर्शाः सदैव प्रबलतमाः ।

एतदप्यत्रावधेयं यल्लक्ष्मणोऽवश्यमेव जातविश्वासः सन् कार्यावसितिपर्यन्तं प्रवर्तते च ॥

लक्ष्मणस्य प्रेमदार्ढ्यं यथार्हं रामेणापि किं न प्रतिदीयते । न कोऽप्यस्मिन् विषये सन्देहं कुरुते स्म । अपि च सीतापेक्षयाऽसन्दिग्धतया न कोपि जानाति स्म ॥ बालकाण्डस्य समापनश्लोकेष्वादिकविरत्यन्तं हार्दिक्यवैशद्येन सीतारामयोर्मिथोर्बन्धं वर्णयति । यथा

प्रिया तु सीता रामस्य
दाराः पितृकृता इति
गुणादुपगुणाश्चापि
प्रीतिर्भूयोभिवर्धते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्याश्च भर्ता द्विगुणं
हृदये परिवर्तते।
अन्तर्गतमपि व्यक्त
माख्यति हृदयं सदा ॥ (बा - LXXVII-29)

एक अपरस्य मानसिकं प्रतिकरणं सुष्ठु एवं सम्यक्तया च जानाति स्मेति कविर्यथातथ्यं विशदयति ॥ तस्मादेव कारणात् स्वापेक्षया लक्ष्मणो रामस्य प्रेमपात्रत्वे न्यूनतां न भजत इत्यपि तयाऽवगतम् ॥ द्वौ सन्दर्भौ एनं विषयं निर्भरं रफुटयतः। इदंप्रथमतयाऽशोकवनिकायामाञ्जनेयं प्रति लक्ष्मणस्य स्वभावविशेषं वर्णयन्ती सा एतद् स्फुटयति-

मत्तः प्रियतरो नित्यं
भ्राता रामस्य लक्ष्मणः।
नियुक्तो धुरि यस्यां तु
तामुद्वहति वीर्यवान्। (सु - XXX-60)

द्वितीयः सन्दर्भस्तदा भवति यदा लक्ष्मणः शक्त्याघातेन निपातित इति सा जानीते स्म। यदि लक्ष्मणो मृतोऽभविप्यत् रामोपि लब्धजीवितो नाऽभविष्यत्।

द्वयोर्भ्रात्रोर्मिथो वन्धस्तादृशो यथा एकोपरं प्रति स्वविचारितमवश्यमेव वाचा प्रकटितं कुर्यदिति न। ज्येष्ठभ्राता तथा भ्रातृपत्नी किं किं काङ्क्षतः स्म अथवा तयोः कस्य कस्याऽवश्यकता वर्तते स्म तत्तदाज्ञां विनैव स्वेन करणीयमित्येतत् स्वस्यजीवनोद्देश्यं मनुते स्म लक्ष्मणः ॥ आज्ञां विना इति यदुक्तं तल्लधुतया प्रकटितम्। प्रत्युत स्वप्नेप्युभाभ्यामदृष्टमपि लक्ष्मणेन स्वकर्तव्यविषयीकृतम्। लक्ष्मणं प्रति स्ववात्सल्यस्य प्रकटनं नात्यन्तापेक्षितमिति जानन्नपि यदाकदाचिद्रामः करोत्येव। गोदावरीतीरे रामस्य कृते भवननिर्मितिविषये लक्ष्मणस्य स्थापत्यकलाचातुरी विश्वकर्मातिशयिनी समवर्तत इति प्रतिभाति। वन्यैर्विभवैर्साधनैश्च कतिपयघटिकान्तर एव स पर्णशालानिर्मितिं निरवहत्। सध्यावन्दनादिकं कृत्वा यदा रामः स्वनिवेशं प्रति निवृत्तस्तदा लक्ष्मणेन निर्मितां पर्णशालां दृष्ट्वाऽतिमात्रं मुमोद ॥ लक्ष्मणमालिङ्गन् तदेव लक्ष्मणस्य प्रीत्यु पायनमिति रामः प्रकटीचकार ॥

सुसंहृष्टः परिष्वज्य
बाहुभ्यां लक्ष्मणं तदा।
अतिस्निग्धं च गाढं च
वचनं चेदमव्रवीत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
BVBSSMV

प्रीतो स्मि ते महत् कर्म
त्वया कृतमिदं प्रभो ।
प्रदेयो यन्निमित्तं ते
परिष्वङ्गो मया कृतः । (आ - XV - 27, 28)

राम एवमपि विशदयति यल्लक्ष्मणस्य स्नेहातिशयेन कारणेन स्वपितुरसान्निध्यमपि नानुभूयत इति ॥

भावज्ञेन कृतज्ञेन
धर्मज्ञेन च लक्ष्मण ।
त्वया पुत्रेण धर्मात्मा
न संवृत्तः पिता मम ॥ (आ - XV - 29)

एतदपेक्षया प्रकटतरमादरातिशयं लक्ष्मणोऽपि कदाचिन्न प्रतीक्षते स्म ॥

अपरं च यदा लङ्काया अभिभवः समारभ्यते तदानीं मेघनादेन प्रयुक्तस्य नागपाशस्य प्रभावेन लक्ष्मणो न्यपतत् । तस्मिन्नवसरे रामेण कश्चिद् मर्मस्पृशा उक्तय आवष्कृिताः । यद्यप्युभावपि नागपाशबद्धावास्तां तथापि स्वस्मिन्नीश्वरांशस्य भूयसो विद्यमानत्वाद्धेतो राम एव प्रथमं लब्धबोधः समभवत् ॥ निर्जीव इव लक्ष्मणः स्वपार्श्वे शेत इति दृष्ट्वा रामो नितरां खिन्नोऽभवत् । सीतायाः पुनराप्तिः सुकरा स्यान्नाम परन्तु नष्टे लक्ष्मणे सीताप्राप्त्या किं फलम्? सीतासदृशी भार्या लक्ष्मणसदृशस्य भ्रातुरपेक्षया सुप्राप्यतरा इत्युक्त्वाऽन्त्ये राम एवं वदति लक्ष्मणः पुनर्न जीवतिचेदहमपि स्वयं मृत्युं प्राप्नुयामिति ।

परित्यक्ष्याम्यदे प्राणान्
वानराणां तु पश्यतां ।
यदि पञ्चत्वमापन्नः
सुमित्रानन्दवर्धनः । (यु - IXL - 7)

रावणेन सह युद्धे तीव्रतरे सञ्जाते विभीषणं प्रति प्रेषितं शूलं लक्ष्मणः स्वयमाधत्ते । दुस्सहया व्यथया राम एवं वक्ति

किं मे युदधेन किं प्राणै
र्युदधकार्ये न विद्यते ।
यत्रायं निहतः शेते
रणमूर्धति लक्ष्मणः ॥ (यु - CI - 12)

सकृदपि स पूर्वोक्तं पुनर्वचति यल्लक्ष्मणसदृशस्य भ्रातुरपेक्षया सीतासदृशी प्रेयसी भार्या सुलभाधिगमा इति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वभ्रातुः पराक्रमातिशयं हार्दिक्येन श्लाघते स्म रामः। सा श्लाघा भ्रातरं प्रत्यनुभूतस्य प्रेम्णो न न्यूनतरा। धैर्ये पराक्रमे च न कोपि स्वभ्रातरमतिशेत इति रामो जानीते स्म॥ कौसल्याया निलये संभूतानि लक्ष्मणस्य स्तोभप्रकटनानि श्रुत्वा रामः सर्वप्रथम एतं विषयं प्रकटीकरोति।

तव लक्ष्मण जानामि
मयि स्नेहमनुत्तमम्।
विक्रमं चैव सत्वं च
तेजश्च सुदुरासदम्। (अ - XXI-39)

पर्वताकारवपुषा अन्वर्थनाम्नोऽतिकायस्ययुद्धरङ्गप्रवेशे तं दृष्ट्वा रामोपि स्तिमितोऽभवत् क एष अश्वसहस्रैः कृष्यमाणे रथे समुपविष्टः सन् युद्धोद्युक्तो भवतीति विभीषणं पृच्छति। तस्य पराक्रमं सुविशदं वर्णयित्वा रामेण स्वयमेव स योदधव्य इति विभीषणो विज्ञापयति॥

तथाप्यतिकायस्य युदधाह्वनं स्वीकृत्य यदा लक्ष्मणो ज्याघोषं कुरुते स्म तदा रामः अतिकायलक्ष्मणयोःसमरस्य साक्षी भवतुमेव सज्जो भवति। लक्ष्मणः स्वेन स्वीकृतं कृत्यं यथावत् कर्तुं समर्थ इति रामेण विदितमेव। याथार्थ्यमपि तदभूत्।

इन्द्रजिद्विषयेऽपि तेन सह योद्धुं लक्ष्मणस्यावसरः प्रदातव्य इति रामेण निश्चयःकृतः। अन्तिम आयोधने रामो लक्ष्मणं पराक्रमशालिभिः हनूमतजाम्बवप्रभृतिस्साकमेव प्रेषयति। तच्चायोधनं दिनपञ्चकव्याप्यतिघो च समभवत्। अन्ते स्वभ्रातुर्नामग्राहं प्रेषितेन शस्त्रेण मेघनादं लक्ष्मणः संजघान चेति वयं सर्वे जानीमः। तावता लक्ष्मणः सहनशीलस्य पराक्रमविशेषस्य च परमां काष्ठां प्राप्तवान्। यदा स श्रीरामसमक्षमानीतः 'विभीषणमवष्टभ्य हनूमन्तं च लक्ष्मणः' इति वाल्मीकिना स्फुटं वर्ण्यते। अहं प्रीतोस्मीति कतिपयैः शब्दै प्रशंसावचनं प्रारभ्य लक्ष्मणानुष्ठितं महत् कर्मेति रामः स्पष्टीकरोति।

साधु लक्ष्मण तुष्टोस्मि
कर्म चासुकरं कृतम्।
रावणेर्द्धि विनाशेन
जितमित्युपधारय। (यु - XCI-8)

प्रशंसावचनानि श्रुत्वा लक्ष्मणः सव्रीडस्तत्र तिष्ठति स्म। व्रणैस्समाकीर्णं लक्ष्मणस्य शरीरं सप्रेम समालोक्य लक्ष्मणस्योऽपलब्धिं सविस्तरं प्रतिपादयति च। रावणस्य प्रमुख अवलम्बमासीदिद्रजित्, सर्वेषामुपोद्बलकानां स्रोतश्च। इदानीं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रावणेन सहाऽन्तिमः समरः समारभ्यमान आसीत् किन्तु रामस्तद्विषये चिन्ताकुलो नाभवत् ।

कृतं परमकल्याणं
कर्म दुष्करकर्मणा ।
अद्य मन्ये हते पुत्रे
रावणं निहतं युधि ॥

अद्याहं विजयी शत्रौ
हते तस्मिन् दुरात्मनि ।
रावणस्य नृशंसस्य
दिष्ट्या वीर त्वया रणे ।
छिन्नो हि दक्षिणो बाहुः
स हि तस्य न्यपाश्रयः । (यु-XCI-13,114)

यावदिन्द्रजिज्जीवन्नवर्तत रामो निश्चिन्तोऽभवदिति न ।

सविशेषस्य सुदृढस्य चास्य भ्रातृद्वयबन्धस्य विषयो सीताया विचारःये प्रतिकरणं च कीदृशमासीत्? असकृत्तयैवं सुष्ठु भणितं यल्लक्ष्मणं प्रति रामस्य वात्सल्यं स्वकीयापेक्षया श्रेष्ठतरमासीदिति । किं वा लक्ष्मणे साऽसूयति स्म? वैचित्र्यानुभूतिसंलग्नमेतत् सर्वासामपि स्त्रीणामुदारतमायां तस्यां तादृशोनुभूति-विशेषो न कदाप्यासीत् । यदि स्वकीयः पतिः तस्य मातरि पितरि भ्रातरि वा सुस्निग्धतम इति केचित् नार्यनुभवेत् साऽवश्यमेवाऽसूयाकलुषिता स्यात् । एष लोकसमाचारः । तां प्रति लक्ष्मणो रामापेक्षयाऽतितरं प्रियतरः । रामस्य लक्ष्मणं प्रति यादृशं वात्सल्यमासीत् तदपेक्षया न्यूनतरं तस्याः लक्ष्मणं प्रति वात्सल्यामिति वक्तुं न पार्यते । लक्ष्णमं स्वकीयस्य भ्रातुरुपरि सा मनुते स्म । एतदपि सा व्यजानाद्यत् रामं स्वं च लक्ष्मणः समानरीत्याऽनुसेवते स्म । जनकात्मजा स्वभ्रातुः कियन्मात्रं सुस्निग्धाऽसीदिति लक्ष्मणो जानाति स्म। स्वकीयावश्यकतां प्रति सूचनामात्रमप्यप्राप्यैव तस्याः सेवां कर्तुं स सदैव सन्नद्ध आसीत् । स्वपतिं प्रति लक्ष्मणस्य प्रीतिदार्ढ्यं तं तस्यै प्रीतिविषयं चकार । रामो लक्ष्मणेऽतीव स्निह्यति, स्वापेक्षयाऽपि स स्निग्धतर इत्यप्यसूयास्पर्शं विनैव सीता विवृणोति ।

सीतां विना को वा रामस्य गुणगणान् सम्यगभिनन्देत् सम्पूर्णतया जानीयाद्वा? अत्र भूमौ वा स्वर्गादिलोकान्तरे वा न कोपि रामं प्रतियुद्ध्येत इत्यपि तया सम्यग् विदितम् । तथापि स सर्वथा धर्मस्य परमोच्चकाष्ठायां स्थिरस्तिष्ठेत् नाणुमात्रमपि व्यतिचलेदित्यपि साऽभिलषति स्म। यत्र व्यतिचलन् सन्देहः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समजायत तत्र सा स्वाभिप्रायं प्रकटयितुं न कदापि सन्दिहानाऽऽसीत्। एकदा तु सा मनोदार्ढ्येण रामाय धार्मिकत्वस्वीकरणाय सविनयनिर्देशमपि प्रादात्। सुतारं आप्ते सौहार्दपूर्णे च मिथः संवादे विधीनां त्रैविध्येन नरः सत्पथात् व्यतिचलेन्नाम इति तया व्यक्तमेव निर्दिष्टम्। तत्र द्वयोर्विषये न काप्याशकङ्का तस्या आसीत्। द्वे तथ्ये रामायानर्घे सम्मते, सत्यनिष्ठा परदारवैमुख्यं च। सत्यनिष्ठाया हेतोरेव साम्राज्यं परित्यज्य वनवासं स्वीकृतवान् रामः। स्वदारनिरतत्वात् परस्त्रीणां मुखालोकनमपि स न कदाचित् कुर्यात्।

त्रिण्येव व्यसनान्यत्र
कामजानि भवन्त्युत।
मिथ्यावाक्यं तु परमं
तत्माद् गुरुतरावुभौ।
परदाराभिगमनं
विना वैरं च रौद्रता।
मिथ्यावाक्यं न ते भूतं
न भविष्यति राघव।
कुतोऽभिलाषणं स्त्रीणां
परेषां धर्मनाशनं
तव नास्ति मनुष्येन्द्र
न चा भूत्ते कदाचन॥
मनस्यपि तथा राम
न चैतद् विद्यते क्वचित्।
स्वदारनिरतश्चैव
नित्यमेव नृपात्मज।
धमिष्टः सत्यसन्धश्च
पितुर्निर्देशकारकः।
त्वयि धर्मश्च सत्यं च
त्वयि सर्वं प्रतिष्ठितम्। (आ - IX- 306)

किन्तु निर्वैरं परप्राणिहिंसनविषये सा तादृशं मनोदार्ढ्यं नाऽसादितवती। रामस्य गुणगणान् सीता नाऽभ्यनन्ददिति नैव। किन्तु रामः क्षत्रियः किल। नानाविधायुधानि तदायत्तानि च॥ क्षत्रियाणां सायुधत्वं अग्नेरिध्नमिव।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षत्रियाणामिदहधनु-
र्हुताशस्येध्मनानि च ।
समीपतस्थितां तेजो
बलमुछ्रयते भृशम् ॥ (आ- IX- 15)

न केवलं ऋषीणामभयप्रदानमपि तु राक्षसानामुच्छेदनश्च रामेण प्रतिश्रुतः ॥ गहने महारण्ये रामस्य प्रवेशात् साऽशङ्कग्रस्ताऽऽसीत् ।

नहि मे रोचते वीर
गमनं दण्डकान् प्रति ।
कारणं तत्र वक्ष्यामि
वदन्त्याः श्रूयतां मम ॥
त्वं हि बाणधनुष्पाणि
भ्रांत्रा सह वनं गतः ।
दृष्ट्वा वनचरान् सर्वान्
कच्चित् कुर्याः शरव्ययं ॥ (आ -IX -23, 24)

वने प्रयाणं कुर्वन् स आयुधानामनियन्त्रितप्रयोगं कुर्यान्नाम । तदनन्तरं सा कस्यचित् सत्यवतः शुचेश्च महर्षेः कथां श्रावयति ॥ तस्य तपोविघाताय तीक्ष्णः, कश्चिदसिः न्यासरूपेण इन्द्रेण प्रदत्तः । कालान्तरे खड्गस्य धारातैक्ष्ण्यं परीक्षितुं स ऋषिरुद्यक्तोऽभवत् ॥ इत्थं सत्पथात् स व्यतिचरति स्म ॥

अनेन सीतया एषोर्थः सूचितः यदायुधानां स्वायत्तीकरणं युद्धोत्सुकानां कृते हिंसाप्रेरकं सिद्धं स्यात् ॥ यथा तदानीं दण्डकारण्येऽस्य विषयस्यौचित्य-मासीत्तादृशमेवौचित्यं अद्यत्वेऽपि तदवस्थमेव ॥ ऐक्यराष्ट्रादिकाः संस्थाः किमर्थं निरस्त्रीकरणमधिकृत्य संभाषमाणा दृश्यन्ते ॥ एतदेवाऽत्यन्तापेक्षितं यद् द्वेषस्य सर्वेषां हृदयात् समुन्मूलनं क्रियताम् तद्वत् द्वेषस्य हेतवोऽप्यपसार्यन्ताम् ॥ द्वितीयमप्येतन्नाशकारिणां सर्वेषमप्यस्त्राणामपनयनमवश्यमेव कार्यम् ॥ आधुनिकाः क्षत्रियाःतान्यायुधानि नियन्त्रणं विना प्रयोगविषयीकुर्युः । शान्तेः निरस्त्रीकरणस्य द्वेषापनयनस्य च प्रवक्तृषु सीताऽदिमे स्थानमर्हतीति में प्रतिभाति ।

रामस्य नियन्त्रणस्थैर्यमादित एव सुस्पष्टमासीत् ॥ स्ववीर्यपराक्रमं नियन्त्रणसहचरं यद्रामः प्रकटयामास तेन तस्मै दिव्यास्त्रप्रदाने न कापि हानिरिति कौशिकेन निर्णयः कृतः ॥ सतर्कता परिपालनीया इति तं प्रति उपदेशप्रदाने सीता समाधिकृता इति रामेणाभ्युपगतं किन्तु ऋषिभ्यः सार्वत्रिकाभयप्रदानमपि स्वेन प्रतिश्रुतमिति रामस्तां स्मारयति ॥ ऋषिभिरसुराणामुपद्रवान् विनाशयितुं रामः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रार्थितः ॥ अवश्यमेव तेभ्योऽभयप्रदानं रामेण कार्यमेव ॥ एष तस्य क्षात्रधर्मः । तत्र न किमप्यसमीचीनम् ॥

सीताया एष उपदेशो रामस्य हृदये सर्वदा समुत्कीलितमिति स्फुटमेव ॥क्षिप्रमेवाऽनन्तरसर्गेषु, प्रतिपादितविधया रामेण दिव्यानि विशिष्टायुधानि प्राप्स्यन्ते । एकदा रामेण सर्वप्रकारकं नियन्त्रणं परित्यक्तमासीद्यदा तस्य प्राणप्रेयसी सीताऽपहृता तस्याः पुनप्रप्तिः दुश्शका इत्यपि तस्मै प्रतिभाति स्म ॥ निरपराधिनं कश्चित् प्रत्युच्छेदकस्यास्त्रस्य प्रयोगे भीषणिश्च तेन कृतः । अस्मिन् सन्दर्भे सीतायाः कर्तव्यमतिवैदग्ध्येन समीपर्विना लक्ष्मणेनैवानुष्ठितम् ॥ अस्मिन् प्रभावशालिनि वागुपन्यासे किं वा वयं सीतायाः मानवीयसिद्धान्तविन्यासस्य प्रतिध्वनिं न श्रृणुयामः ? ॥ एतद्विशेषतोऽवधेयं यदन्याय्यी करणविधया क्रोधप्रकटनं तत्पश्चात् नैव करोति रामः ॥ यत्सत्यं वरुणाय स नितरा क्रुध्यात् किन्तु दिनत्रयव्यापि प्रार्थनायां व्यर्थायां सत्यामेव स कोपो बहिर्निष्क्रान्तः ॥

लङ्कायां संग्रामस्यादावेव राक्षसानामैन्द्रजालिककुत्सितप्रयोगैः रामलक्ष्मणौ कपयश्च नितरामुपद्रुताः विशेषतो मेधनादस्य मायाप्रयोगेन । कूटप्रयोगे इद्रजित् सिद्धहस्त आसीत् ॥ एतेन लक्ष्मणोऽक्षमः सञ्जातः ब्रह्मास्त्रप्रयोगं चिकीर्षितवान् समस्तानां राक्षासानां निश्शेषतः समुन्मूलनमाकाङ्क्षयच्च ॥ रामस्तस्मै अनुमतिं न प्रदत्तवान् नियन्त्रच्स्याऽवश्यकतां प्रति लक्ष्मणमुद्बोधयच्च । एतस्मिनि् स्थितिविशेषे रामं समानयितुं गृहीता सीतायाः भूमिका सफला संवृत्ता ॥

रामायणमवश्यमेव रामस्य कथा किन्तु वस्तुतः सहसीतस्य सहसौमित्रिणश्च सा कथा इति वक्तव्यम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥अधिरोहण पदव्याम्॥

रामायणकथां मानविककथात्वेनानभ्युगम्य न कोपि तत्कथाया वास्तविकं माहात्म्यमवगन्तुं पारयेदित्येतादृशी ममाभिप्रायगतिस्सदैव । प्रत्युत तां कथामीश्वरावतारस्य दैविकपुरुषस्य लीलात्वेन चाङ्गीकारे यथातथ्यमस्माकं करगतं नैव स्यात् ॥ तथापि केवलं मानवीय कथात्वेन वीरपराक्रमकथा रूपत्वेन वाऽभ्युगता चेत् केवलं महाकाव्यात्मिकायं एपिद्व्य इति पाश्चात्यैः कथ्यमानायाः महाकाव्यत्मिकाया रूपमेवङ्गीकुर्यात्, न इतिहाससंज्ञा॥ अस्मिन्नितिहासे सर्वत्रानुस्यूतत्वेन वयमिदमनुभवामो यद् वाल्मीकेरादर्शपुरुषस्य श्रीरामस्य स्तरः क्रमेणोच्चतरत्वमधिगत्य वर्तमान इति। यदाकदाचित्तादृशादुन्नतपदाद् व्यतिचलनमपि नैवासीदिति न॥ मनुष्यकथायाः स्वाभाविकत्वमेवैतत्। इदमप्यवश्यमुपगन्तव्यं यत्तादृशाः सन्दर्भा नासकृत्प्रवर्तमानाः कादाचित्का एव॥ केवलं रूपरेखाङ्कनरूपेणैवैतत् प्रतिपादितं वर्तते यद्विष्णोर्भागानामांशिकत्वेनैव चतुर्षु भ्रातृषु संविधानमिति। रामस्यार्धांशं भरतस्य पादांशं इतरयो र्भ्रात्रोः समेत्य पादार्धश्चेति ॥ यद्यपि श्रीरामस्यांशावतारत्वेनाभ्युपगमस्तथापि विष्णुना महेश्वरेण वा यद्यत् कर्तुं शक्यते तत्तदखिलमपि रामेणैकेन साधितमिति पश्चाद्वयं द्रक्ष्यामः।

कथारम्भादेवावलोकयामस्तावत् वाल्मीकेः प्रश्नस्योत्तररूपेण नारद इक्ष्वाकुवंशप्रभवमयोध्याशासकं राजानमेवादर्शपुरुषत्वेन निर्दिशति ॥ ये ये गुणा वाल्मीकिना परिगणिताः तान् सर्वानपि गुणान् स्वस्मिन् स्थितान् प्रदर्शयन् कश्चन मानवोतिमात्रं दुर्लभः॥ नारदस्य स्मृतिमण्डले केवलं राम एक एव प्रतिभाति। पश्चादुपन्यस्ते विवरणे वाल्मीकिकथितानं गुणानामप्यपेक्षयाऽतिविशिष्टानां गुणविशेषानामप्युपन्यासीं दृश्यते।

इक्ष्वाकुवंशप्रभवस्य रामस्य गुणवर्णनावसरे नारदस्य वाक्कौशलं भूयो भूयोऽपि वर्धते ॥ कैश्चिदभ्यूह्यते यदेतस्य वाल्मीकिनारदसंवादस्य कालो रामस्य पट्टाभिषेकात् सद्यः पश्चादेव इति॥ यदि उत्तररामयणग्रन्थस्य वाल्मीकि रचितत्वमभ्युगम्यते तर्हि संवादकालः पट्टाभिषेकात्केषांचिद्दिनानामनुपदमेवैति वक्तव्यं स्यात्, यतः अयोध्या प्रत्यागमनात्कतिपयमासानन्तरं सीतायाः परित्यागः समजनि॥ संक्षिप्तरामयणकथाया नारदस्यान्वाख्यानशैलीं सूक्ष्मेक्षणिकया यद्यवलोकयाम तर्हि एतत् स्फुटीभवति यद्रामस्य प्रजापालनकौशलं सर्वेषां जनानां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शान्तिसुभिक्षकल्याणादीनां क्रमप्रवर्धनमिति। अनुस्यूतत्वेन प्रजक्षेमाभिवृद्धिः प्रवासात्प्रतिनिवृत्य मासद्वये त्रये वा रामेण संसाधित इति किं वक्तव्यं? उत्तररामायणकाव्यं केनचित्कव्यन्तरेण रचितं पश्चाद्रामायणकथाग्रन्थे प्रक्षिप्त इति केषाञ्चिद्वादमुखानामुपोद्बलकत्वेन स्वीकर्तु शक्यत एतत्।

रामायणग्रन्थस्य यादृच्छिकानुवाचकोप्येवं मन्येत यन्नारदस्य रामगुणानुवर्णनमतिमात्रमुपपन्नमिति॥ प्रस्तुत तद् गुणवर्णनमसमग्राख्यानमित्यपि परिकल्प्येत॥'रिपूणामपि वत्सल' इत्यादिकानि श्रीराम विशेषणानि रामस्यानुगुणानीति पश्चाद्रक्ष्यामः। त्रैलोक्यकण्टकस्य रक्षोराजस्य वधेन रामेणात्मानमप्रतिद्वन्द्विपराक्रमातिशयत्वेन प्रख्यापितं ननु॥ यदा शत्रुभिः। कूटायोधनमभ्युपेतं तेन पारवश्येऽनुभूतेऽपि स्वात्मनियन्त्रणं परिदर्श्य मानसिकसन्तुलनं प्रकटीकृतं रामेण॥ सर्वथाऽपि धार्मिकात्पथः स्वस्याव्यतिचलनं तेन सिद्धवत्कृतं सोपद्रवकारिणः प्रत्यपि रामचन्द्रस्य मनसि न काऽपि द्रोहबुद्धिरासीत्। यदा विभीषणो रावणस्य दाहसंस्कारादिकं कर्तुं विचिकित्सां प्रदर्शयति तदा रामस्तमेवमनुशास्ति मरणान्तानि वैराणि दुष्कर्म कलुषितस्यापि गुणान् न विस्मरेदिति। आशिषप्रदानायेन्द्रेण सह यदा स्वपिता दशरथः भूमाववातरत्तदा रामः केवलमेक एव प्रार्थनां करोति यत्

कुरु प्रसादं धर्मज्ञ
कैकेय्या भरतस्य च॥
सपुत्रां त्वां त्यजामीति
यदुक्ता केकयी त्वया।
स शापः केकयीं घोरः
सपुत्रां न स्पृशेत् प्रभो॥ (यु-119-25-26)

रामो न केवलं पराक्रमविषयेऽप्रतिशत्रुरतिमेधावी च, अपि त्वौदार्ये कारूण्येचासदृशोप्यासीत्। खरस्य चतुदर्शसहस्रपरिणितेसैन्ये एकमात्रोवशिष्टाकम्पनोसन्दिग्धं रावणस्य पुरतः

नहि रामो दशग्रीव
शक्यो जेतुं, रणे त्वया।
रक्षसां वापि लोकेन
स्वर्गः पापजनैरिव।

न तं वध्यमहंमन्ये।
सर्वैर्देवासुरैरपि। (आ-XXXI-27)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्येवं रीत्याऽवर्णयत् ॥ अस्मिन् वर्णने न काप्यतिशयोक्तिः ॥ यो रामं युद्धक्षेत्रे सक्रियमपश्यत् यच्च श्रीरामस्य पराक्रमं तेन सह युद्धे सक्षादन्वभवच्च तस्यैवेदं वर्णनम्। सकृद्रावणोऽकम्पनस्योपदेशं मारीचस्य निर्देशं चाश्रृणोत्। शूर्पणखया प्रचोदितोऽपि राक्षसराजोऽप्रतिद्वन्द्विनो रामेण सह सद्यस्सम्मुखीनत्वं परिहरति ॥ भीरुसदृशं तादृशं व्यवहारं कुर्वन् रावणो धैर्यहीन आसीद्वा न वेति विषयं पश्चात् चर्चाधीनं कुर्मः। अस्मिन्चर्चासन्दर्भे एतावदुक्त्वैवालं तावता रामः स्वकीयेन पराक्रमातिशयेनोत्कर्षस्य श्रियश्च परमोच्चकोटिं प्राप्तवानिति यदा वीरपराक्रमातिशयसम्पन्नेन बहुसहस्रसैन्यसम्पन्नेन च खरेण सह एक एव सन् प्रतियोद्धुं बुद्धिदार्ढ्यपूर्वमेव कृतनिश्चय आसीत्।

जनस्थाने स्वकीयं वीर्यातिशयं प्रदर्शयता रामेण स्वात्मनो देवादीनामप्यन्यूनत्वं स्फुटतयाऽविष्कृतं परन्तु स्वकीयस्य दैविकत्वस्य सूचनालवमपि तेन च प्रदीयते। असन्दिग्दधतया दैविकस्तरः तेनाऽसादितः । रामस्य पराक्रमस्य प्रत्यक्षानुभवकर्तुः परांक्रमविधेयस्य च वर्णनमनुसृत्य यदि वयं निगमनं कुर्मः तर्ह्यस्माकं न काप्यतिशयोक्तिः। लक्ष्मणस्यापि तथैव पराक्रमवर्णनं शूर्पणखयाऽ कम्पनेन च कृतमिति हेतोः राक्षसश्रेष्ठस्य सम्मुखीनत्वे लक्ष्मणस्यापि न काऽप्यूनताऽसीदिति स्फुटीभवति।

यद्यप्यमानुषिकं कृत्यविशेषं तेन स्वीकृतं तथापि वाल्मीकिवर्णितो रामोऽप्रतिद्वन्द्वः सन् मानवीयत्वं न विजहाति ॥ अनुमानं विना वाल्मीके रामो दैविकत्वसूचनां न कुत्रापि प्रयच्छति ॥ अवतारकाले श्रीकृष्णो देवक्यै वसुदेवाय च स्वकीयं वैष्णवं रूपमदीदृशत्। प्रेङ्खालिकास्थेनैव कृष्णेन शकटतृणावर्तयो-र्दुर्विषदूषितायः पूतनायाश्चवधो लीलयैव कृतः ॥ तस्य मुखोदरे माता यशोदा निखिलान्यपि भूवनान्यवालोकयत्, देवाद्विष्णोर्नातिरिक्तः स्वकीयार्भक इति तत्वधीरपि तस्याः समभवत् ॥ तादृशीं दैविकत्वसूचनाममानुषिक-कर्मनिर्वहणक्षमत्वं वा रामो बाल्यकाले न कदाचन प्रदर्शयामास।

शुभे शोभने मुहूर्ते यदा पञ्चग्रहा उच्चस्थाः समभवन् इन्दुना सह सुरगुरुः कर्कटे लग्ने उपस्थित आसीत् तदा रामस्य प्रादुर्भावः। गर्भस्थितिकालः षड्ऋतुर्व्याप्यधरणश्च बभूव ॥ प्रागपि सूर्यवंशे प्रमुखानां नृपतीनां प्रादुर्भावस्तादृशे शुभे मुहूर्ते कदाचित् सम्भूतः स्यात् ॥ कालिदासवर्णनानुरोधेन रामस्य पूर्वीको रघुरपि तादृशे शुभे मुहूर्ते एवाजनिष्ट । कालिदासः रघोराविर्भावमेवं वर्णयति

ग्रहैस्ततः पञ्चभिरुच्चसंश्रितै
रसूर्यगैः सूचितभाग्यसम्पदम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

असूत पुत्रं समये शचीसमा
त्रिसाधना शक्तिरिवार्थमक्षयम् । (र.वं-III-13)

चत्वारोऽपिभ्रातरो भाविमहत्वसूचनप्रदर्शका एवासन् यद्यपि रामः सर्वानपि भ्रातृनतिशेते स्म । तेषां कुमाराणां शिक्षायाः स्तरः क्रमश्च कुलगुरुणा वसिष्ठेनैव व्यवस्थापित इति मन्तव्यम् । सर्वेऽपि वेदेषु निष्णाताः रथगजादीनां चालने निपुणा अस्त्रशस्त्रप्रयोगे प्रधानतया धनुर्वेदे चातिनिपुणाः ॥ अस्त्रादीनामाचार्यः को वाऽसीदिति स्फुटतया निर्देशो न कृतः यथा रघोर्विषये तस्य पितुर्दिलीपस्याऽचार्यत्वं वाचैव वर्णितं कालिदासेन ॥

त्वचं च मेध्यां परिधाय रौरवी
मशिक्षितास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः
क्षितावभूदेकधनुर्धरोऽपि सः ॥ (र.वं-III-21)

बालकाण्डे कुमाराणां शिक्षादीक्षादिकस्य रूपरेखावर्णनमेव केवलं द्वादश श्लोकेषु दृश्यते । मखविघ्नानां विवारणार्थं रामलक्ष्मणयोस्साहाय्यमभिलषन् यदा विश्वामित्रमहर्षी राजकुलमागच्छति तावतिकालेन आचार्यो वा पिता दशरथो वा बालानामस्त्रशस्त्रादिप्रशिक्षणेन परिपूर्णतया तृप्त आसीदिति न प्रतिभाति । दशरथेन निश्चयदार्ढ्यंन वयसो न्यूनता अस्त्रदिप्रशिक्षणेऽपूर्णता च प्रकटीकृतम् ॥

ऊनषोडशवर्षो मे
रामो राजीवलोचनः ।
न युद्धयोग्यतामस्य
पश्यामि सह राक्षसैः ॥

बालोह्यकृतविद्यश्च
न च वेत्ति बलाबलम् ।
न चास्त्रबलसंयुक्तो
न च युद्धविशारदः ।
न चासो रक्षसां योग्यः
कूटयुद्धा हि राक्षसाः ॥ (बा-XX-7,1)

तेन कारणेन मायाचतुरै राक्षसैस्सह स कथं योद्धुं समर्थ, स्यादिति शंङ्कापि प्रकटीकृता ॥

अपरं च स्वप्रतिज्ञापालनार्थं दशरथः यदा वसिष्ठेन प्रेरितः रामस्य सामर्थ्यं प्रति वा युद्धवैदग्ध्यं प्रति वा महर्षिणा न किमप्युक्तं अपि तु विश्वामित्रेण समन्ततः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संरक्षितस्य रामस्य न किमपि भयकारणमित्येव सुस्पष्टं कथयते। वस्तुस्थित्या तद्दिनपर्यन्तं राम आयोधने न लब्धपरिचयः, धनुषामस्त्रादीनां च प्रयोगो लक्ष्मणेन साकं मृगयादि विनोदमात्रसीमितः ॥

किं वा दशरथः रामस्यावतारोद्दश्यविषये लब्धबोध आसीत्? देवकी वसुदेवौ निजतनयस्य जन्म कंसादीनां दुष्टदैत्यानां निग्रहार्थमेवेति सम्यग् जानीतः स्म ॥ महाविष्णोर्दिव्यरूपस्य दर्शनानन्तरं कथं वा तौ प्रापञ्चिकशोकसम्मूढौ स्यातां नाम? दशरथस्य विषये न तादृशी स्थितिः, पुत्रवियोगेन तेनार्तप्रलापः करणीयः हृदयभेदेन मरणप्राप्तिरपि लभ्या इत्येव तद्विषये विधिप्रचोदना । यदि स्वपुत्रस्य दैविकत्वेन लब्धज्ञानोऽभविष्यत् तर्हि तादृशी घटना नैवाभविष्यत् ॥ अध्यात्मरामायणादिग्रन्थेषु, कौसल्यायाः पुरतो रामस्य प्रकटीभावो विष्णुरूपेणाऽसीदिति वर्णितम् ॥ दशरथस्य शोकाभिभवेन मृत्युः स्यान्नाम किन्तु कौसल्याया लब्धविष्णुदर्शनायाः कथं वा शोकपर्याकुलत्वम्?

मन्त्रिवरः सुमन्त्रो दशरथमेवमसान्त्वयत्-यत् स राजा अनपत्यो न म्रियेत इति ॥ एवं सान्त्वनप्रदाने असन्दिग्द्धं किमप्युपोद्बलकं तेन मन्त्रिणाऽसादितमासीत्। ऋषीणां सन्निधौ भगवता सनत्कुमारेणैवं विदतितं यत्पुत्रकामेष्टिकरणेन दशरथस्यापत्यचतुष्टयं भविष्यतीति ॥

तं च राजा दशरथो
यष्टुकामः कृताञ्जलिः।
ऋष्यश्रृङ्ग द्विजश्रेष्ठं
वरयिष्यति धर्मवित् ॥

यज्ञार्थं प्रसवार्थं च
स्वर्गार्थं च नरेश्वरः
ल भेत च स तं कामं
द्विजमुख्याद्विशांपतिः ॥

पुत्राश्चास्य भविष्यन्ति
चत्वारोऽमित विक्रमाः
वंशप्रतिष्ठानकराः
सर्वलोकेषु विश्रुताः ॥ (बा-XI-9, 11)

कुमाराणां वीर्यातिशयं प्रतिपादयता तेन रावणादीनां दुष्टदैत्यानां वधः करिष्यत, इति न प्रतिपादितम्।

इक्ष्वाकुवंशप्रभवो दशरथः आसन्नश्रीमत्पुत्रचतुष्टयः। तस्मिन्नेन समये

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विष्णुर्देवैरेवं प्रार्थितो यद् भवानात्मानं चतुर्धा विभज्य तस्य पुत्रचतुष्टयरूपेणाऽवि र्भवत्विति। प्राजापत्यः पुरुषः, यदा सृष्टिकर्तुः प्रसादरूपं पायसं दशरथाय प्रायच्छत् तदैवमकथयत्-

इदं तु नृपशार्दूल
पायसं देवनिर्मितम्।
प्रजाकरं गृहाण त्वं
धन्यमारोग्यवर्धनम्।
भार्याणामनुरूपाणा-
मश्नीतेति प्रयच्छ वै॥
तासु त्वं लप्स्यते पुत्रान्
यदर्थं यजसे नृप॥ (बा-XVI-19, 20)

न कदापि केनाप्येतदकथयत यत् महाविष्णुरेव स्वयं पुत्रत्वेनावतरिष्यतीति॥

एवं सति यदा तपस्विवरः कौशिकः भवानात्मनः पुत्रेषु श्रेष्ठौ रामलक्ष्मणौ मखविघ्नकर्तृभिः राक्षसैस्सह योद्धुं प्रेषयेति प्रार्थितवान् तदा दशरथस्य विचिकित्सा न्याय्या एव॥ तथापि नृपतेर्वचनेषु पूर्वापरयोरसामञ्जस्यं न निषेद्धुं शक्यते। विश्वामित्रस्यागमनसमये दशरथो मन्त्रिभिर्बन्धुभिरुपाध्यायेन च साकं राजसभायां समुपविष्टो रामादीनामुद्वाहबन्धानधिकृत्य परामृशन्नासीत्॥ वर्णाश्रमधर्मानुष्ठान नियमाचारानुरोधेनासमाप्तशिक्षो गार्हस्थ्याश्रमे न प्रविशेदिति। महर्षिश्च रामस्य पाटवमखिलं सम्यग् जानन्नेवासीत्। तेन स्वाभाविकेन पयाथा विश्वामित्रः दशरथं सम्यगुद्बोधयति स्म यतः स तस्मिन् विषये निस्सन्देह एव स्यात्॥

न च पुत्रगतं स्नेहं
कर्तुमर्हसि पार्थिव॥
अहं ते प्रतिजानामि
हतौ तौ विद्धि राक्षसौ।
अहं वेद्मि महात्मानं
रामं सत्यपराक्रमम्।
वसिष्ठोऽपि महातेजा
ये चेमे तपसि स्थिताः।
यदि ते धर्मलाभं तु
यशश्च परमं भुवि।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थिरमिच्छसि राजेन्द्र
रामं मे दातुमर्हसि । (बा-XIX-13, 15)

विश्वामित्रवचने विचारशीलानां सम्यगवजानतां च लोकानां रामं प्रति पर्याप्ता सूचना वर्तते ॥अकथिता अप्यंशाः स्युर्नाम । एतत् ऋषिना स्पष्टीकृतं यत् साधारणा मानवाः सम्पूर्णतया राममवगन्तुं न शक्नोतीति ॥ साधारणास्तपस्विनश्च रामं समग्रतया न जानीयुः । विश्वामित्रेण वसिष्ठेन च रामस्य याथातथ्यं परिपूर्णतया विदितमेव । एतद्विषये आख्यातुः सन्देहः कथं वा स्यात् ? अगस्त्यनारदसदृशा द्वित्रा अपि तादृशाः स्युः । वाल्मीकेरपि नारदेन कृतस्योपदेशस्यावश्यकता समभवत् । अध्यात्मरामायणस्य रचयिता एभ्यो वाक्येभ्यो जातबोधः सन् श्रीरामहृदयप्रतिपाद्यं पारमार्थिकं तत्वमवगतवान् स्यात् ॥

मारीचः सुबाहुश्च रावणस्य परिकरकर्मिणावास्ताम् । तयोः प्रेषणे च राक्षसेन्द्रस्यैतदुद्दिष्टं यत्समस्तमानवसमाजस्य कल्याणहेतोः क्रियमाणानां यागादीनामाचरणे विघ्ना अवश्यमेव करणीयाः । अकृत्वा रावणवधं दुःखस्याभिभवाद्विश्वरक्षणोपायः कादाचित्क एव स्यात् नं तु स्थायी । रावणेन सह सम्मुखीनत्वमपि स्यादिति प्रस्तावेन दशरथो भयभीतः समभवत् । शम्बरादिभिरतिविक्रमपराक्रमान्वितैरसुरैः सह योद्धुमिन्द्रस्यापि स्वयं दशरथः साहाय्यप्रद आसीत् । किन्तु राक्षसेन्द्रस्य दशाननस्य सम्मुखेऽवस्थातुं स न प्रभवेत् ॥ रावणेन सह सम्मुखीभावे रामस्य क्षमत्वं न्यूनतां वाऽधिकृत्य विश्वामित्रेण न किञ्चित् कथितम् । विश्वामित्रस्य प्रमुखमागमनोद्देश्यं रामस्यावतारविषयकस्याऽचरणकलापस्य प्राथमिकं प्रशिक्षणं खलु । एतच्च तेन पर्याप्तरूपेण समग्रतया चानुष्ठीयते । एतत् पश्चाद्वयमालोकयामः ॥

विश्वामित्रेण दशरात्रसीमितस्य कालस्य रामस्य साहाय्यं यदि वसिष्ठप्रमुखानां मन्त्र्यादीनामनुज्ञाऽपि स्यात्तदा कार्यमिति याज्ञा ।

यद्यभ्यनुज्ञां काकुत्स्थ
ददते तव मन्त्रिणः ।
वसिष्ठप्रमुखाः सर्वे
ततो रामं विसर्जय ॥ (बा-XIX-16)

याचनस्य समुचितः पन्था एव । किं वा दशरथस्योपदेशकाः विश्वामित्रं कोपयितुमुद्युक्ताः स्युः ? वसिष्ठः स्वकीयं पारमार्थिकमुद्देश्यं सम्यग् जानात्येवेति विषये विश्वामित्रस्य न काऽपि शङ्काः । इक्ष्वाकूणां कुलगुरुरेतत् सम्यगवागच्छद्यद्विश्वामित्रस्यागमनप्रयोजनं राज्ञो वंशस्य कल्याणफलदं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्ततस्त्रयाणां भुवनानामपि क्षेमसिद्धिरप्यवश्यं भविष्यतीति च ॥ विश्वामित्रस्य प्रवेशनसमये राजोपाध्यायेन सचिवबन्धुभिश्च साकं स्वपुत्राणां दारक्रियां प्रति मन्त्रणां कुर्वन्नासीत्। नात्र विषये काकतालीयन्यायस्य प्रसक्तिः। कालिदासस्यं वर्णनरीत्यापीयमेव वस्तुस्थितिः यद्यपि सन्दर्भस्यान्तरं विद्यते।

अन्वियेष सदृशीं स च स्नुषां
प्राप चैनमनुकूलवाग् द्विजः।
सद्य एव सुकृतां हि पच्यते
कल्पवृक्षफलधर्मि काङ्क्षितम् ॥ (र.व-XIII-50)

एतदेवात्र विशिष्य स्मरणीयं यद्रामो लक्ष्मणेन सहाध्वरविघातशान्तये अयोध्यायाः प्रस्थित आसीत् तस्य प्रत्यागमनं स्वस्य स्वभ्राहणां च वधूभिस्साकमेव समभवदिति। विश्वामित्रस्योद्देश्येष्वन्यतमोऽयं यद्रामं भाविन्याः पत्न्यः निवासस्थानं मिथिलां प्रति नयेदिति। अपरं चेदमुद्देश्यं यद्रामस्यान्तर्निहितं वास्तविकं तत्वं समग्रतया परीक्ष्यान्तिमस्य परमोद्देश्यस्य कृते आवश्यकं प्रशिक्षणमपि दातुम्।

भाविविषयान् सूक्ष्मेक्षणिकया प्रथममेव परिद्रष्टुं क्षमः किल वसिष्ठो मुनिः। सर्वं मंगलान्तमिति जानन्नेतत्सर्व नियतिकृतमेवेति स. बोधति स्म। यावद्रामो विश्वामित्रस्य परिरक्षणेऽवस्थितस्तावन्नकाऽपि विपत्तिं बाधितुमर्हति॥ बुद्धिचातुर्योऽस्त्रविद्यायां च विश्वामित्रसदृशो न कोप्यन्यः॥ स स्वयमेव समग्रानपि राक्षसान्निरवशेषान् कर्तुं प्रभवतिस्म। रामद्वारेणैव राक्षसवधः करणीय इति विश्वामित्रेण किं वा निर्णीतम्? अनेन रामस्यैव शिवमिति निश्चयदार्ढ्येन स्यात्। स्वपुत्रो महत्यां विपद्याकृष्यत इति मनसि विचिन्त्य दशरथेनानुभूतः परिभवः सीमारहित एव॥ या विचिकित्साऽनुभूता। सा न चिरस्थायिनी। गुरूपदेशेन साकमेव तस्य तत्वावबोधः समजनि॥

महतः तपस्विनः पदचिह्नान्यनुसृत्य रामो विरहासहिष्णुना भ्रात्रा लक्ष्मणेन सह प्रस्थितः। एवं कुर्वता तेन स्वकीयावतारकार्यनिर्वहणार्थमवश्यकर्तव्यतायाः प्राथमिकः पादन्यास एव कृतः। स्वपितुश्शिक्षणात् यदा बहिर्भूतस्तदा राजकुमारो रघुः स्वकार्यनिर्वहणार्थं परिपूर्णतया सज्जीकृत एवासीत्। आयुषि षोडशस्याष्टादशस्य वा वर्षस्य परिसमाप्तौ इन्द्रस्य वज्रायुधमपि सोढुं सः समर्थ आसीत्। मन्त्रादिभिस्सह दिव्यानामस्त्राणामवगतिः पश्चादेव रामेण समासाद्यते॥

साहसिकानां कार्यकलापानां निर्वहणाय शरीरस्वास्थ्यस्यारोगदृढगात्रस्य च परिरक्षणमत्यन्तापेक्षितं खलु। वटुरूपिणा शिवेनाप्येतदुक्तं शरीरमाद्यं खलु धर्मसाधनमिति न स्वशिष्ययोः सार्वकालिकं शरीरदार्ढ्यं सम्पादयितव्यमिति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वकर्तव्येषु प्रमुखत्वेन निश्चितं महर्षिणा । रामस्याग्निपरीक्षा आसन्ना । स्वभ्रात्रा सह सम्पूर्णं सप्तरात्रं रक्षकत्वेनाश्रमद्वारे अवस्थातव्यमासीत्सद्य एव । निमेषमात्रस्यापि चक्षुनिमेषपरिहारस्ताभ्यां करणीय आसीद्यतो राक्षसाः परममायाविन आसन् ॥ एषा प्राथमिका परीक्षा एव ॥ भाविषु संवत्सरेषु पराक्रमातिशयसम्पन्नैः राक्षसैस्सह संग्रामः कर्तव्य आसीत्। युद्धानि दीर्घकालिकानि क्लिष्टानि चावश्यमेव भविष्यन्ति । मेघनादेन सह लक्ष्मणस्यान्तिमः समरः दिवसपञ्चकस्थाय्यासीदिति वयं जानीमः । रामेणापि सप्तवासरपर्यन्तं राक्षसराजेन रावणेन सह योद्धधव्यमासीत् । रणक्षेत्रे राक्षसाः विधिनियमपरतन्त्रा नाऽसन् कदाचित्। सूर्यास्तमनसमये समरसमापनं करणीयमित्यदि नियमानि नामन्यन्त। येन वीरेण दैत्यानां संमुखत्वमागामिषु संवत्सरेषु करणीयं धैर्येण वीर्येण ध्यांनेन मन्त्रसिद्ध्या च तेन तेषां बलविशेषविघटनार्थं श्रमः करणीयः ।

बलातिबलानामानौ मन्त्रौ स्रष्टुर्मुखादेवाविर्भूतौ । रामो मन्त्रावाप्तेस्सर्वथाऽर्ह इति ऋषिनाऽवगतमेव । अन्यथैतन्मन्त्रप्रदानायोद्युक्तः स नाभविष्यत् । लक्ष्मणेनापि ज्यायसा भ्रात्रा सह मन्त्रौ प्राप्तावित्यनुमीयते यद्यपि स्पष्टतया नोक्तम् ।

प्राथमिकमायोधनमपरेद्युरेव समभवत् । विश्वामित्र एतत्पर्यवेक्षक आसीत् । हस्तिसहस्रशक्तिसम्पन्ना ताटका पूर्वं यक्षकन्याा आसीत् ॥ मारीचस्य जननी सा गंगाया दाक्षिणात्ये प्रदेशे चरन्ती समस्तलोकोपद्रवकारिणी बभूव । फलसमृद्धो जनपदस्तया खिलीकृता। रामो विग्रहवान् धर्म इत्येव सर्वदा वर्णितः । सोल्लुण्ठनविधया रामस्य समरपरिपाटी स्त्रीवधेनैव समारब्धा ॥

रामः स्त्रीवधार्थमस्त्रं न विक्षिपेदिति विश्वामित्रेण शङ्कितम् । विग्रहवान् धर्मः श्रीरामचन्द्रो वसिष्ठस्य शिष्यश्च । अन्यत्किवा तस्मात्प्रतीक्ष्येत ? तेन कारणेन तादृश्याः स्त्रियो निग्रहः समस्तलोककल्याणार्थमवश्यं करणीय इति यथा वा रामलक्ष्मणौ विश्वसतस्तथा तयोर्बोधः करणीय आसीत्। रामो विश्वामित्रमेवं प्रतिवदति ऋषिवाक्यानुष्ठानं स्वपितुः कथनानुसारेण स्वेनावश्यं करणीयमिति ।

किन्तु कर्तव्यमुहूर्ते रामस्य बुद्धिभेदः सञ्जातः ॥ ज्यानिनादं श्रुण्वती तयोः सम्मुख आविर्भूता वृद्धा राक्षसी दर्शनि विकृता विकृतानना चाऽसीत् ॥तस्यै समुचितं दण्डं प्रदातुमेव कृतनिश्चयो रामः न मारयितुम् । सा च वृद्धा योषित् ।

तां दृष्ट्वा राघवः क्रुद्धां
विकृतां विकृताननाम् ।
प्रमाणेनातिवृद्धां च
लक्ष्मणं सोऽभ्यभाषत ॥ (बा-XXVI-9)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृद्धेति वर्णितायैअर्थगर्भं विशेषणं कविना दत्तम् । एवं कुर्वता महर्षेरादर्शाव्यतिचलनं पितुराज्ञाया भङ्गश्च क्रियेत । तथाऽपि यत्र यत्र धार्मिकस्य कर्मणः प्रसक्तिः तत्र तत्र रामेण स्वमेधया एव निर्णयः क्रियते सदापि । धर्माद्व्यतिचलनस्य शङ्का यत्र समजनि तत्र कुलगुरोर्वसिष्ठस्य निर्देशोपि तेन न स्वीकृतः यथा पश्चाद्रक्ष्यामः । रामस्य न्याय्यं कर्म विश्वामित्रेण किं नानुमोदनमर्हति ? कार्याण्यनियन्त्रितानि स्युः नाम । मेघान्तरितया ताटकया मायायुद्धं चिकीर्षितम् । ततो महर्षिः दाढर्येन तमनुयुङ्क्ते कालातिपातो न करणीय इति ॥ आसन्नास्तमया वेला ॥ दुर्गुणपरिपूर्णा राक्षसी रात्र्यागमनात्पूर्वमेव मारयितव्या, यतः

रक्षांसि सन्ध्याकाले तु
दुर्धर्षाणि भवन्ति हि ॥ (बा-XXVI-22)

निर्णये कृते तस्या मारणमनायासेनैव रामेनानुष्ठितम् ।

प्राथमिकेन रामकृतेनाज्ञाभङ्गेनाथवा सत्वरनिर्वहणाभावेन वा किमसन्तुष्ट आसीद्विश्वामित्रः ? अत्रैतदवधेयं यत्र कदाऽपि विश्वामित्रो दुर्वाससदृश आसीत् । परं च तच्छिष्येन पश्चात्कृताद्विश्वामित्रोपाख्यानाद्वयमवगच्छामो यद्ब्रह्मर्षिप्राप्तेः पूर्वं महर्षिणा त्यक्तेषु दुर्गुणेषु क्रोध एव अन्तिमोऽभवत् । वस्तुतः । विश्वामित्रो रामं तद् व्यवहारं च सूक्ष्मेक्षणिकया पर्यवेक्षमाण एवासीत् ॥ यतो गुरुतरे विकारहेतौ सत्यपि रामेण स्वात्मनियन्त्रणं प्रदर्शितमासीत्तेन स तपोधनो नितरां मुदित एवासीत् । इन्द्रादिदेवा ऊनषोडशस्य रामस्य विक्रमप्रदर्शनेनातीव तुष्टा अभवन् । देवाधिपति र्विश्वामित्राय एतत्स्पष्टीचकार यन्निखिलमपि दिव्यास्त्रसमूहं रामाय यदि प्रदीयते तत्र न कोपि हानिरिति । एष विधिचोदितः क्रमः यदयोध्याया राजकुमारो महन्ति कार्याणि देवहितार्थं करिष्यत्येवैति । नैतत् यत्स्वकर्तव्यनिर्वहणे कस्यचित् प्रेरणां विश्वमित्र अपेक्षत इति ॥ रामस्य मस्तिष्क प्रभवैर्हार्दिक्यैश्च गुणविशेषैः सुपरिचित एव स तपोधनः ।

अत्रेदमस्माभिरनुस्मरणीयं यद्विश्वामित्रो दशरथसभायामेव सर्वेषां पुरुत एतत्प्रख्यापयत यदात्मानं वर्यं वसिष्ठं चोरीकृत्य नितरां स्तोकसंख्याका एव रामस्य महत्वं सम्यग् जानीयुः । तथासत्यपि ताटकायां यदा रामेण स्वविक्रमातिशयः प्रदर्शितः तावत्कालावधि महर्षिणा सर्वाण्यपि दिव्यास्त्राणि न तस्मै प्रदत्तानि । यदा तेनैतदवगतं यद्रामे विक्रमातिशयेन साकं स्वात्मनियन्त्रणशक्तिरपि परिलसति स्म तदा सर्वाण्यपि दिव्यास्त्राणि तस्मै दातुं कालातिपातो न करणीय इति विरचिनोत् ॥ स्वात्मानुभवेन विश्वामित्रेण सम्यगवगतमेतत् यत्क्षत्रियजात आपत्काले लुप्तात्मनियन्त्रणो भूयादिति । तस्मात्करणात् महर्षिणा सावधानेनैव कार्यकलापनिर्वहणमकारि । पुनरप्येतद्वक्तुमुद्युक्ताः स्मः यद्रामः सुबाहुसुतया सह

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्मुखीनसमये ऋषेःपर्यवेक्षणविषय आसीदिति। अधुना स सम्यग् लब्धतृप्तिः स्वशिष्ययोः गुणसम्पद्विषये॥ कालातिपाते न किमपि न्याय्यं कारणमवशिष्टमासीत्। एतदेव तत्रावाशिष्टमासीत् यच्छुभे शोभने च मुहूर्ते एव दिव्यास्त्राणि प्रदेयानीति। तच्चापरेद्युः प्रत्युषे च संभविष्यति।

चक्रादितस्समारभ्य सर्वाण्यपि दिव्यास्त्राणि शोभने मुहूर्ते विश्वामित्रो रामाय प्रददौ। विश्वामित्रेणैतदपि सम्यगवगतं यत्तेषु दिव्यास्त्रेषु केषांचित् मारीचसुबाहुप्रभृतिभ्यो रावणानुयायिभ्यः साकमायोधनकरणे शीघ्रमेवावश्यकता भविष्यतीति दिव्यास्त्रेष्वेतान्यन्तर्गतान्यासन्- नाना प्रकाराणि चक्राणि नैकविधानि ब्रह्मविष्णुमहेशानामस्त्राणि पञ्चभूताधिष्ठितान्यतिविनाशक्ष- माण्यग्निवरुणवायु- प्रभृतिकदेवताकानि चेति॥ शत्रुषुमध्ये सम्मोहनकराणि स्तंम्भीकराणि चास्त्रशस्त्राण्यप्यासन् खलु॥ देवासुरप्रभृतीनां सकाशे यद्यदस्त्र जातमासीत् तेषां प्रायशः सर्वेषामपि स्वायत्तीकरणं रामेण कृतम्। विग्रहवन्ति तान्यस्त्राणि रामसेवायै सन्नद्धान्यवस्थितानि।दाक्षिण्याधिकतया तानि प्रतिगृह्य पाणिना समालभ्य मनसा मे भविष्यध्वमिति तान्यभ्यचोदयत्। सर्वेषामस्त्राणां समन्त्राणां हृदयेन धारणे मानसिक प्रभावो बौद्धिकं सामर्थ्यं चात्यन्तापेक्षितम् । रामस्य तादृशे स्तरे न काऽपि शङ्का।

अस्त्र प्रतिग्रहात् सद्यः सानन्तरं रामस्तपोधनं तत्संहारविधिमपि प्रार्थयामास। एतस्य प्राधान्यं सम्यगवगन्तुं शक्यते। निर्वन्धवशात् योधेनास्त्रस्य मन्त्रोच्चारणेनाह्वानं कृतं स्यात्। किन्तु रामस्य क्षमाकरुणादिमूर्तित्वेन संहारस्याप्यवगति दुर्निवारा। स्वात्मभूताल्लक्ष्मणाद्रामो न किमपि तिरोहित- मकरोत्। विलम्बं विनैव विश्वामित्राल्लब्धं सर्वमपि तस्मै दत्तवान् रामः।

सद्य एव भ्रात्रोः भारवत्कृत्यजातं पुरतः संजातम्। कतिपयदिवसानन्तरं तौ समसादितसिद्धाश्रमौ यत्र महर्षिणस्तपश्चर्या प्रारब्धा। अस्या राक्षसैर्विध्नोपस्थानं प्रतीक्षितमेवासीत्। विश्वामित्रेण कृत्याकृत्यविषये न कश्चिदप्युपदेशः कृतः। भयङ्कराणां शत्रूणां कदा वोपस्थितिः संम्भविष्यतीत्यस्य सूचना एव प्रदत्ता। राक्षसबले भयानकतमयोस्सुबाहुमरीचयोरागमनमबिलम्बेनैवाभवत। तौ तयोरनुचराश्च रक्तवर्षादिषु हेयकर्मसु तत्परा अभवन्ताम्। तथापि रामेण तान् दण्डयितुं कर्शनतमं कर्म न समारब्धम्। मानवास्त्रप्रयोगेण मारीचं सबहुदूरं समुद्रे समक्षिपत्। सुबाहुविषये गुरुतरो दण्डः प्रयुक्तः। अग्नेयास्त्रेण तस्य संहारः कृतः। शेषान् राक्षसान् वायव्यास्त्रेण विद्धान् कृत्वा विद्रावयामास च॥ अल्पेनैव क्षणेन कार्यनिर्वहणं सम्पूर्णमभवत्।

किं वा रामेण मारीचं प्रति कारुण्यं प्रदर्शितं? कदाचिदयं निर्मलो धार्मिकश्च भविष्यतीति मनसि कृताशः किल? एतत्स्यान्नाम । यद्यपि, पश्चात् दण्डकारण्ये तेन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैषम्यं समारब्धं तथापि रामः तस्मिन् कृपामेव पुनरपि प्रदर्शितवान् । एतस्योदिद्ष्टं फलं मारीचे सुस्पष्टं सञ्जातम् । तेन दुर्मतिः परित्यक्ता ॥ रावणय सदुपदेशोऽपि तेन दत्तः, यदनुरोधेन रावणः सकृत्सीतापहरणोद्देश्यं परित्यज्य लङ्कां प्रतिनिवृत्तः ।

यागस्य शुभपर्यवसानानन्तरं महर्षिः भ्रातरौ मिथिलाधिपस्य सभामानयत । महेश्वरचापभङ्गेन रामस्य वीर्यातिशयः समस्तस्य भुवनस्य पुरतः प्रख्यापयितव्यः किल । एतत्कर्म बलिष्ठानां राक्षसानां स्पर्धात्वेन गृहीतव्यमासीद्रावणेन, क्षत्रियाणां प्रभावो राक्षसानां विषये अवहेलनारूपत्वमप्युपक्षिप्तमिति । किन्तु रावणेनाह्वानं न स्वीकृतम् । अन्यत्रैतप्रदिपादितं यद्रावणस्य चाराः लाके सर्वत्र प्रचरन्त आसन्निति । तेन प्रतिकरणं किमर्थं नाचरितम् ? रावणस्य चरित्रस्य विश्लेषणे पश्चादेतस्य चर्चा कुर्मः ॥

शैवचापभङ्गो रामस्यत्यनायासं कर्म यथा कस्यचित् बालकस्य क्रीडानिर्वृतिः । एतेन रामाद्गरीयानपरो न कश्चिदित्यादि जनप्रवादः सम्यक् समर्थितः । न केवलमस्त्रादीनां प्रयोगे अपितु कायदार्ढ्यादिविषयेऽपि रामो निरतिशयमाहात्म्यवानासीत् ॥ यच्चापः सहस्राधिकैर्वाहकैरानीतः यं च बलिष्ठेनापि नापरेणोत्थापयितुमपि शक्य आसीत् स चापो रामस्य हस्तकमलेन शरकाण्ड इवात्रुष्यत ।एतद्विषये विचारं कुरुत कतिपयवर्षानन्तरं रामेण दुन्दुभेः पर्वताकारं शिरोस्थिः पादांगुष्ठाघातेन दशयोजनदुरं प्रक्षिप्तंम् ।

परशुरामेण सह सम्मुरवीनत्वस्यानुपदपरिणामः प्रतिद्वन्दिनो वाक्यैरेवैतां सूचनामस्मभ्यं प्रयच्छति यद्रामो महाविष्णोरेवावतार इति । तथाऽपि रामो दैविकीं भूमिकां तदा वा तत्पश्चाद्वा नाऽदत्ते । विनयाधिक्येन स दशरथमेवं वदति-

जामदग्न्यो गतो रामः
प्रयातु चतुरङ्गिणी ।
अयोध्यभिमुखी सेना ।
त्वया नाथेन पालिता (बा-77-6)

एवं बालकाण्डस्यान्तिमभागे एवात्मनः श्रेयसो विक्रमस्य च परमोच्चकोटिकल्पं स्थानमासादयति रामः । किन्त्वपरमपि किञ्चित्तेनासादयितुमवशिष्टमिति पश्चाद्रक्ष्यामः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥उच्चतरत्वेऽपि मानुष एव ॥

अयोध्याकाण्डस्यारम्भे रामं समस्तगुणसम्पन्नं धीरतमं तथाप्यवलेपलवरहितं पश्यामः। अस्त्रशस्त्रविद्यायां दशरथापेक्षयापि चतुरतर आसीद्रामः। दशरथस्य चरित्रे कां कां न्यूनतां दृष्ट्वा तद्विमर्शं कुर्मः किन्तु विक्रमपराक्रमादिविषये नितरामजय्य एवासीत्सः ॥ वाल्मीकिरामायणे शंम्बरेण सह समरस्य प्रस्तावोस्ति यस्मिन् दिलीपककुस्थादिभिरिव दशरथे नापि साहाय्यं देवेन्द्राय प्रदत्तम । अन्यत्र कम्परामयणादिग्रन्थेषु दशरथो दशास्वपि दिशासु रथं चालयन् शत्रुभिस्सह योद्धुं समर्थ आसीदिति वर्ण्यते । तादृशः शौर्यपराक्रमादिसम्पन्नो दशरथोपि रावणेन सह योद्धुं न प्रभवति स्म। एतत्परिस्फुटमेवं यद्दशरथादपि बलीयसा रामेण भवितव्यमिति नियतिः ॥

उत्तरकोसलस्था सर्वा अपि प्रजा रामस्य गुणविशेषान् सम्यग् ज्ञातवत्य आसन्। राज्यश्रीः रामेऽवतारयितव्येति दशरथस्य प्रस्तावः सद्य एव सर्वैरङ्गीकृतः। एतच्च यस्य कस्यापि मानवस्य प्रमोदास्पदमित्यत्र न काऽपि शङ्का। वाल्मीकेः रामः सर्वदाऽपि मानवत्वेनैवाङ्गीक्रियते। प्रथमं तेन समस्तमपि प्रीत्यास्पदं कार्यजातं मात्रा सह विभक्तमेवानुभूतं तत्पश्चात् लक्ष्मणेन सह संविभक्तमनुभूतं च ॥ वाल्मीकिनाऽत्र किमुच्यते इत्यवलोकयामः-

सौमित्रे भुङ्क्ष्व भोगांस्त्व-
मिष्टान् राज्यफलानि च।
जीवितं चापि राज्यं च
त्वदर्थमभिकामये ॥ (अ-IV-44)

पश्चाद्रामेणेतद्विव्रीयते ये च सुखभोगाः त्रिभिरपि भ्रातृभिस्संविभज्य नानुभवितुं शक्यते तादृशं सुखभोगं नैव वाञ्छामीति ॥

भ्रातृणां सङ्ग्रहार्थं च
सुखार्थं चापि लक्ष्मण।
राज्यमप्यहमिच्छामि
सत्येनायुधमालभे ॥
नेयं मम मही सौम्य
दुर्लभा सागराम्बरा।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नहीच्छेयमधर्मेण
शक्रत्वमपि लक्ष्मण ॥
यद् विना भरतं त्वां च
शत्रुघ्नं वापि मानद ।
भवेन्मम सुखं किंचिद्
भस्म तत् कुरुतां शिखि ॥ (अ-XCVII-6-8)

किं वा वनवासस्यादेशस्तेनाशनिपातसदृशो नानुभूतः? न कोप्येतन्निषेद्धुं पारयति। रामकथायः केचन ग्रत्था एतदन्यथा व्याख्यायन्ते। एतदपि कथितं यद्वनवासादेशस्तस्य प्रमोदकारणमेवासीदिति ॥ रघुवंशे कथमेतद्वर्णितमित्यवलोकयत-

पित्रा दत्तं रुदन् रामः
प्राङ् महीं प्रत्यपद्यत ।
पश्चाद्वनाय गच्छेति
तदाज्ञां मुदितो ग्रहीत् ॥ (र.व-XII-7)

वाल्मीकिना तादृशी सूचना नैव दीयते ॥ रामस्यैषः विशिष्य गुणातिशयः यत्सर्वस्यापि विकारस्तोभाधिक्यं विनाऽनुभवस्तेन कृत इति ॥

इतीव तस्यां परुषां वदन्त्यां
न चैव रामः प्रविवेश शोकम् ।
प्रविव्यथे चापि महानुभावो
राजा स पुत्रव्यसनाभितप्तः ॥ (अ-XVIII-41)

तदप्रियममित्रघ्नो
वचनं मरणोपमम् ।
श्रुत्वा न विव्यथे रामः
कैकेयीं चेदमब्रवीत् ॥

एवमस्तु गमिष्यामि
वनं वस्तुमहं त्वितः ।
जटाचीरधरो राज्ञः
प्रतिज्ञामनुपालयन् ॥ (अ-XIX-1, 2)

सः कैकेय्यै स्पष्टतया प्रतिपादयति यत्पितुरेवादेश आवश्यक इति न ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मातुराज्ञाऽपि तेन परिपालयितव्या ॥ धर्मार्थं न केवलं राज्यं अपि तु स्वजीवितमपि पत्नीं सीतामपि परित्यक्तं सन्नद्ध एव सः ।

अहं हि सीतां राज्यं च
प्राणानिष्टान् धनानि च ।
हृष्टो भ्रात्रे स्वयं दद्यां
भरताय प्रचोदितः ॥
किं पुनर्मनुजेन्द्रेण
स्वयं पित्रा प्रचोदितः
तव च प्रियकामार्थं
प्रतिज्ञामनुपालयन् ॥ (बा-XIX-7, 8)

धर्म विषये ऋषिभिः सममनासक्त इति च सुस्पष्टं वदति-

नाहमर्थ परो देवि
लोकमावस्तुमुत्सहे ।
विद्धिमामृषिभिस्तुल्यं
विमलं धर्ममास्थितम् ॥ (बा-XIX-20)

निखिलाया अपि विपत्तेर्मूलकारणभूतया कैकेय्या सह घटिते सूर्दीर्घे संवादे रामः स्वात्मनः स्थिरतां धैर्येण प्रकटीकरोत्येव ॥ मानवदशायां सर्वदाऽपि तेन तादृशेण नियन्त्रणान्वितेन भवितव्यमिति न कोपि शाठ्यं कर्तुं शक्नोति ॥ यदा यात्रानुवादप्रार्थनार्थं मातृसकाशं स गच्छति विकारक्षोभं परिपूर्णतया नियन्तुमशक्तोऽपि श्रमाधिकं विनैव मात्रे निवेदयति स्म । अनुमतिप्रदानाय विघ्नो नोपस्थायितव्य इति मातरं प्रार्थयन् तदर्थं मातुः पुरतः उचतानि कारणान्यपि प्रतिपादयति ॥ मातुरनुमतिराशीर्वादश्च द्वावपि तेन ईप्साविषयीकृतौ । रामस्तामनायासेनैवानुकूलयितुं शक्तोऽभवत् । प्रवयसः स्वपतेः शुश्रूषा तया करणीया इत्येवं वदता ॥ तदानीमेवादर्शनार्याः पत्न्याश्च स्थितिः तयाऽसादिता स्यात् ॥

लक्ष्मणं सीतां च स्वानुगमनान्निवारयितुमपि रामो यतते स्म ॥ लक्ष्मणस्य विषये एतादृशी निवारणप्रस्तावः औपचारिक एव न सर्वथाऽभीप्सितः । न कस्याऽपि क्रियायाः करणं जीवितव्ये वा मर्तव्ये वा स्वभ्रातरं लक्ष्मणं विना योजनाऽपि संकल्पीविषयो न क्रियते रामेणेति वस्तुस्थितिः ॥ सीतांया विषये अन्यथा स्यात्राम यद्यप्यन्ते स तां वदति यात्रानुवादं निषेधयता मया तव परीक्षा एव कृता इति । सीतां विना रामेण न कदाप्यवस्थीयते । विवादविषये रामो हार्दिक्यरहित आसीदिति न

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्तुं शक्नुमः ॥ वनवासकालेऽवश्यानुभवितव्यानि क्लेशानि सुकुमारशरीरया सीतया कथं सोढव्यानीत्येव तेन विचारितं स्यात् ॥ किन्तु ईदृशा वादमुखाः तामनुकूलयिष्यन्तीति रामेण न प्रतीक्षितम् ॥

यदा चतुर्दश वर्षपर्यन्तं वनवासः करणीय इति निश्चितस्तदाप्रभृति तदर्थिकाः सर्वा अपि व्यवस्थाः सम्बद्धानां व्यक्तिविशेषाणां स्वल्पमात्रवेदनाजनकत्वं करणीयमिति कृत्वा तथैव रामेण कार्यकलापानि कृतानि । तान् वनवासाय प्रेषयितुं कैकेय्यत्यन्तं समुत्सुका आसीत् सीतायै वत्कलादीनपि प्रदातुं सा विचिकित्सां न कृतवती ॥ एतद्दृष्ट्वा वसिष्ठेनाऽपि सा विमर्शविषयीकृता ॥ शीघ्रगमनार्थं पित्रातिसृष्टं रथयानं स्वीकर्तुं रामेण विचारो न कृतः ॥ पितृविषये रामः चिन्तामग्न एव । मां विना पित्रा दीर्घकालं सजीवेन भवितुं शक्यं वा ? कैकेय्याः प्रभुत्वकारणात् स्वमाताऽपि क्लेशमनुभवेदित्यपि स व्यथितहृदयोऽभवत् ॥ तां प्रवयसः पितुः सविशेषश्रद्धाविषयीभूतां करोति च ।

इयं धार्मिक कौसल्या
मम माता यशस्विनी ।
वृद्धा चाक्षुद्रशीला च
न च त्वां देव गर्हते ॥
मया विहीनं वरद
प्रपन्नां शोकसागरम् ।
अदृष्टपूर्वव्यसनां
भूयस्सम्मन्तुमर्हसि ॥
पुत्रशोकं यथा नर्च्छेत्
त्वया पूज्येन पूजिता ।
मां हि सञ्चिन्तयन्ती सा
त्वयि जीवेत् तपस्विनी ॥ (अ-XXXVIII-17)

इतः परं वत्सलस्य पुत्रस्य सेवामप्राप्नुवन् स जनकः तप्तहृदयः स्यात् तदर्थं कौसल्यया तस्य विशिष्ट सेवाऽनुष्ठातव्या इत्यपि मातरमुद्बोधयामास रामः ।

स्निग्धहृदयाः पौरा राममनुगन्तुं निश्चितमतय आसन् ॥ अतः रात्रावेव तानुत्सृज्य गन्तुं निर्बद्धः । तान् सन्दिग्धमतीन् कर्तुं रथ चक्रमार्गानयोध्यां प्रति गतान् प्रदर्श्य मार्गान्तिरेण यानं चालयितुमपि व्यवस्था कारिता ॥ पौराणां सम्मोहनार्थं यच्छलात्मकं कर्म स्वेनानुष्ठितं तत्कारणं हृदयस्पर्शकरीत्या रामेणोपन्यस्तं-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मद्व्यपेक्षान् सौमित्रे
निर्व्यपेक्षान् गृहेष्वपि ।
वृक्षमूलेषु संसक्तान्
पश्य लक्ष्मण साम्प्रतम् ॥
अतो भूयोऽपि नेदानी
मिक्ष्वाकुपुरवासिनः ।
स्वपेयुरनुक्ता मा
वृक्षमूलेषु संश्रिताः ।
पौराह्यात्म कृताद् दुःखाद्
विप्रमोच्या नृपात्मजैः ।
न तु खल्वात्मना योज्या
दुखेन पुरवासिनः ॥ (अ-XLVI-19, 22, 23)

सरय्वाः पारं गच्छता तेन स्वानुभूतां व्यथां गुप्तां कर्तुं न शशाक ॥

कदाहं पुनरागम्य
सरय्वाः पुष्पिते वने ।
मृगयां पर्यटिष्यामि
मात्रा पित्रा च सङ्गतः ॥
नात्यर्थमभिकाङ्क्षामि
मृगयां सरयूवने ।
रतिहर्येषातुला लोके
राजर्षिगण सम्मता ॥ (अ-XLVI-15, 16)

मृगयायामत्यासक्त इति न ॥ विनोदार्थमेव स मृगयां कर्तुमुत्सुकोऽदृश्यत ॥ वस्तुतः प्रवासं गतस्य यत्गेहौत्सुक्यं तदेव रामेण हृदयेऽनुभूयत ॥

यदा वयं रामस्य स्तरोन्नतिः क्रमिकेति वदामस्तदा लक्ष्मणविषयेऽपि तस्यौचित्यं तदवस्थमेव ॥ भूतले शयानयोःसीतारामयो रक्षकत्वेन स्थितो लक्ष्मणः यदात्मगतं करोति तेन तस्य मानसान्तरं व्यक्तीभवति । वनवासप्रस्थानवेलायां व्यथितहृदयेन तेन पितरं प्रत्युपालम्भं कृत्वा तं कारागृहे वा स्थापयाम्यथवा वधं वा करिष्यामीत्यविचारितेन कथितम् । इदानीं पुनः पितरं प्रति मृदुलहृदयः कदाचित्समभवत् ॥ रामेण स्वे च विना नातिचिरं स्वपिता जीवितुं शक्नोतीति यन्मनसि तेनानुभूतं तत्तथ्यमेव संम्भूतम् ॥ एतत्सौभाग्यकरमासीत् यल्लक्ष्मणेन स्वमतिसन्तुलनमासादितं किमिति चेत् सद्य एवैतावत्कालं स्वात्मानमितरांश्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नियमतो रामस्य सक्रोधोच्चोरितानि श्रोतुं स निर्वद्धो भवति ॥ यदि लक्ष्मणेन सामर्षव्यवहारस्तदवस्थः कृतः तदा ततोपिकिलष्टतरा स्थितिः समभविष्यत् ॥ एतस्या सर्वस्यापि वर्णने वाल्मीकिनाऽत्युत्कृष्टां कलाचातुरीं प्रदर्शिता इति मन्ये ॥

रामः सुमन्त्रं तत्पश्चात् गुहं चापृच्छति ॥ तदा च गुहाय राष्ट्रतन्त्रविषये कांश्चिदुपदेशानपि प्रयच्छति ॥ सोत्यन्तं शान्त आसीत् मुखे अमर्षादीनां विकाराणां लवमात्रमपि चिह्नं नाऽदृश्यत ॥ तथाऽपि रामस्य हृदये संक्षोभः प्रज्वलन्नासीदेवेति पश्चात् सुस्पष्टं बभूव । सीतया सह वृक्षाधः स्थिते रामे तस्य मनसि एतावत्पर्यन्तं सम्यङ्नियन्त्रितस्य विक्षोभस्य बहिस्फुरणं समजनि ॥ स भ्रातरं स्मारयति यत्ततः परं तैः स्वस्वकृत्येषु दत्तचित्तैः भवितव्यमिति ॥ ताभ्यां प्राथमिककर्तव्यत्वेन सीता संरक्षणं कार्यम् ।

अथाब्रवीन्महाबाहुः
सुमित्रानन्दवर्धनम् ।
भव संरक्षणार्थाय
सजने विजनेऽपि वा ॥

अवश्यं रक्षणं कार्यं
मद्विधैर्विजने वने ।
अग्रतो गच्छ सौमित्रे
सीता त्वामनुगच्छतु ॥
पृष्टतो नुगमिष्यामि
सीतां त्वां चानुपालयन् ।
अन्योन्यस्य हि नो रक्षा
कर्तव्या पुरुषर्षभ ॥ (आ.-52-94-96)

स्वविचारानप्रकटयन् स्थातुं रामो न शशाक ॥ लक्ष्मणमुद्दिश्य स आत्मगतं कुर्वन्नासीत् यत्सीताऽपि श्रुण्वती समवर्तत ॥ यदि लक्ष्मणं रामस्य बहिश्चरान् प्राणान् मन्यामहे तर्ह्येतदात्मगतमेव ॥

रामो मानवीयतां नात्यवर्तत यद्यपि सर्वेष्वपि मानवेषु तस्य श्रेष्ठत्वं तदवस्थमेवासीत् । तत्समये कैकेय्या प्रीत्यनुभवः क्रियमाणः स्यादित्येव- ममर्षानुभवेन साकमस्मृत्वा स्थातुं न शशाक ॥ स्वपुत्रार्थमेतावता लब्धेन सन्तुष्टा स्यान्नवा तृप्त्यपूर्त्य दशरथमपि हन्येत वा ॥

ध्रुवमद्य महाराजो
दुःखं स्वपिति लक्ष्मण ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतकामा तु कैकेयी
तुष्टा भवितुमर्हति ॥
सा हि देवी महाराजं
कैकेयी राज्यकारणात् ।
अपि न च्यावयेत् प्राणान्
दृष्ट्वा भरतमागतम् ॥

स्वपिता दशरथोऽप्रदर्शितपौरुषः कैकेयीवशगश्च ॥

अनाथश्च हि वृद्धश्च
मया चैव विना कृतः ।
किं करिष्यति कामात्मा
कैकेय्या वशमागतः ॥

इदं व्यसनमालोक्य
राज्ञश्च मतिविभ्रमम् ।
काम एवार्थ धर्माभ्यां
गरीयानिति मे मतिः ॥ (आ.-53. 6-9)

एतादृशी घटना कथं वा समजनि? रामं प्रति दशरथस्य वात्सल्ये न काचिद्विचिकित्सा ॥ तथाप्यन्याय्यमाचरितुं स किमर्थं व्यवसितः? केवलं कामस्य प्रबलत्वेनैव। अन्ततो राम एतादृशं निर्णयं करोति केवलं विषयतृष्णाया नियन्त्रणाभावेनैव स्वपिता स्वेयां दशामापन्न इति भविष्यत्काले जनास्तं प्रति कठोराणि वचनान्येव वदेयुः

अर्थधर्मौ परित्यज्य
यः काममनुवर्तते ।
एवमापद्यते क्षिप्रं
राजा दशरथो यथा ॥

मन्ये दशरथान्ताय
मम प्रव्राजनाय च ।
कैकयी सौम्य सम्प्राप्ता
राज्याय भरतस्य च ॥ (आ.-53. 13, 14)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामस्तत्र न विरमति ॥ मनोनुभूते विचारकलापे भरतं प्रत्यपि शङ्का तेन प्रकटीक्रियते । इदानीं तेन सर्वेऽपि राजभोगानुभवा भार्ययासहानुभूताः स्युः ॥ स्वस्य भ्रातुर्भरतस्य चावस्थान्तरं रामेणानुभूयमानमेव । स वृक्षाध उपविष्टः मैथिली भूतले शयाना चावर्तत । प्रवयसः पितृचरणाः अहं त्वरण्ये विप्रकृष्टोस्मि भरताधीनं निखिलं साम्राज्यं चेति रामः बहु कथयन्नवर्तत ॥

सुखी बत सुभार्यश्च
भरतः केकयीसुखः
मुदितान् कोसलानेको
यो भोक्ष्यत्यधिराजवत् ॥ (आ.-53. 11)

किं वा कैकेयी न करिष्यति? अकार्यकरणे चापि तस्य मनो न विचिकित्सेत ॥ कौसल्यां सुमित्रां च रोषरुष्टा दाहयेत्?

अपीदानीं तु कैकेयी
सौभाग्यमदमोहिता ।
कौसल्यां च सुमित्रां च
सा प्रबाधेत मत्कृते ॥

मातास्मत्कारणात् देवी
सुमित्रा दुःखमावसेत् ।
अयोध्यामित एवत्वं
काले प्रविश लक्ष्मण ॥ (आ.-53. 15-16)

किं वैतादृशीं दशां परिवर्तयितुं स स्वयं समर्थो नाऽसीत्? नैव ॥ अतितरं विक्रमातिशयसम्पन्नं तं को वा निवारयितुं शक्तः? समस्तेऽपि भुवने ॥ परन्त्वधर्मभीरूरकार्य करणे न प्रावर्तत ॥

एको ह्यहमयोध्यां च
पृथिवीं चापि लक्ष्मण ।
तरेयमिषुभिः क्रुद्धो
ननु वीर्यमकारणम् ।
अधर्मभयभीतश्च
परलोकस्य/चानघ ।
तेन लक्ष्मण नाद्याह
मात्मानमभिषेचये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतदन्यश्च करुणं
विलप्य विजने वहु।
अश्रुपूर्णमुखो दीनो
निशि तूष्णीमुपाविशत्॥ (आ. 25-27)

लक्ष्मणो मध्ये न कामपि टिप्पणीमकरोत्॥ शृण्वन्नेवावर्तत। किन्तु रामं सोस्मारयद् यत्सीता वा स स्वयं वा अश्रुप्रवाहं तस्य नयनयोः सोढुं नैव क्षमेतेति॥

ध्रुवमद्य पुरी राम
अयोध्याऽयुधिनां वर।
निष्प्रभा त्वयि निषक्रान्ते
गतचन्द्रेव शर्वरी॥
नैतदौपायिकं राम
यदिदं परितप्यसे।
विषादयसि सीतां च
मां चैव पुरुषर्षभ॥ (आ. 54)

तं विना तयोः कतरोऽपि जीवितुं न समुत्सहेत॥ लक्ष्मणस्य राम एव जीवितसर्वस्वं मातृपितृभ्यां शत्रुघ्नाच्चाप्युपरितर तस्य स्थानं लक्ष्मणस्य हृदये-

न च सीता त्वया हीना
न चाहमपि राघव॥
मुहूर्तमपि जीवावो
जलान्मत्स्याविवोद्धृतौ॥
नहि तातं न शत्रुघ्नं
न सुमित्रां परंतप।
द्रष्टुमिच्छेयमद्याहं
स्वर्गं चापि त्वया विना॥ (अ. 54-31, 32)

तदनन्तरं लक्ष्मणेन सादरं सप्रेम सज्जीकृतां शय्यां सीतया साकं रामः भेजे॥

ततस्तत्र समासीनौ
नातिदूरे निरीक्ष्य ताम्।
न्यग्रोधे सुकृतां शय्यां
भेजाते धर्मवत्सलौ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स लक्ष्मणस्योत्तमपुष्कलं वचो
निशम्य चैवं वनवासमादरात् ॥
समाः समस्ता विदधे परंतपः
प्रपद्य धर्मं सुचिराय राघवः ॥ (अ-54-33, 34)

इदानीं रामः भ्रातुरर्थगर्भस्य वचनस्य श्रोता संवृत्तः। एवं लक्ष्मणवाक्यं श्रुत्वाऽवशिष्टाः सर्वा अपि समाः परमं तपोनुतिष्ठन् सीतालक्ष्मणाभ्यां सह कालं व्यपनेतुं कृतमतिरासीत् ॥

रामस्य मानसस्य नैतिकस्य च धैर्यं दाढ्यं च सद्य एव परीक्षाविषयीकृते ॥ राज्यस्वीकरणार्थमाभ्यन्तरप्रेरणाः पूर्वमेव सफलो न्यरुणत् ॥ स्वाधिकारस्थापनाय विक्रमपौरुषे तस्याभूताम् ॥ न केवलं पितादशरथस्तस्मै अनुमतिमयच्छदपि तु तत्करणाय तमादिष्टवांश्च। एतस्मिन् कार्ये पितुरादेशपरिपालनार्थं स नैवोद्युक्तः । पितरं सत्यरय धर्मस्य चोल्लङ्घनार्थमवसरमपि दातुं रामो नैवैच्छत् ॥ यथा स धर्माचरणोत्सुकस्तथा लौकिकसुखानुभवं प्रति तस्य नैवाभिलाष इति समस्तस्य भुवनस्य पुरतो रामः प्रादर्शयत् ॥ किन्तु सत्वरमेव राज्यश्रीः तमन्विष्य तत्सकाशमुपासर्पत् ॥ भरतस्य स्वभावविषये याकाचिद्विचिकित्सा रामस्य मनस्यवर्तत साऽचिरेणैव तिरोहिता समभवत् ॥ मातुरपराधे भरतस्य न किमपि भागभाक्त्वं भवितुमर्हतीति यस्तावदूहो रामस्य चित्ते संजातः स यथार्थ एव समभवत् ॥ विपुलं सौन्यमादाय भरतस्य चित्रकूटागमने किमपि दुरुद्देश्यं स्यादिति लक्ष्मणस्य शङ्का राम अपानयत् ॥ स्व भ्रातृष्वन्यतमेन सह विरोधं सम्पाद्य याश्रीः प्राप्ता भवेत्तां श्रियं रामो नैव वाञ्छति स्म ।

भ्रातृणां सङ्ग्रहार्थं च
सुखार्थं चापि लक्ष्मण ।
राज्यमप्यहमिच्छामि
सत्येनायुधमालभे ॥
नेयं मम मही सौम्य
दुर्लभा सागराम्बरा ।
नहीच्छेयमधर्मेण
शक्रत्वमपि लक्ष्मण ।
यद् विना भरतं त्वां च
शत्रुघ्नं वापि मानद ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवेन्मम सुखं किंचिद्-
भस्म तत् कुरूतां शिखि ॥ (अ.-97-6-8)

यदि स्वेनाऽदिष्टः स्यत्तर्हि राज्यश्रियो लक्ष्मणस्य प्रदानेऽपि भरतो विमुखो न स्यात् ॥

उच्यमानो हि भरतो
मया लक्ष्मण तद्वचः ।
राज्यमस्मै प्रयच्छेति
बाढमित्येव मंस्यते ॥ (अ.-97-18)

स्वभ्रातृविषये यस्य कस्याप्यकार्यसमा योजनां परिशङ्क्यापि लक्ष्मणोद्विग्न स्यात्परन्तु स आत्मनो विचिकित्सां सद्यएवावधूय लज्जितः सन् पश्चात्तापमपि कुर्तुमारभत ।

तथोक्तो धर्मशीलेन
भ्रात्रा तस्य हिते रतः ।
लक्ष्मणः प्रविवेशेव
स्वानि गात्राणि लज्जया ॥ (अ.-97.19)

यथाप्रतीक्षं भरतो राज्यश्रियमुचितानि कारणान्युपन्यस्य रामे प्रत्यर्पयितुं सज्जो भवति ॥ स च प्रस्तावः कुलगुरुणा वसिस्ष्ठेनाऽनुमोदितः ॥ प्रत्यर्पिताया राज्यश्रियः स्वीकरणादन्यत् किमपि स्वर्गस्थं पितरं प्रीणयितुं समर्थं भवेत् ? भरते यौवराज्यं समर्प्यतामिति यया कैकेय्या वरप्रार्थना कृता साऽपि वनमागत्य रामाय प्रत्यर्पणप्रस्तावं समर्थयति स्म ॥ तर्हि रामस्य राजश्रियोङ्गीकारे को वा विघ्नोऽतिष्ठत् ?

भीष्मवत् साधुत्वासाधुत्वविषये पूर्वाभिसम्मतः कश्चिद् दृढंनिश्चया रामस्याऽपि विद्यन्ते स्म । तस्मिन् विषये कृत्यलोपस्याऽवसरं न कदापि स यच्छति स्म । चार्वाकानुमतरीत्या लौकिकसुखभोगमुत्कृष्टमभिमत्य च जाबालिनोपन्यस्तान् वादमुरवान् रामः साधिक्षेपमेव खण्डशः करोति ॥ वसिष्ठस्तावत् किंचित् समधिकबलोपस्कृतेन नयोपायेन कार्यनिर्वहणं कर्तुं यतत ॥ इक्षवाकुवंश उपलभ्यमानस्य धर्मनिष्ठस्याचारविशेषस्योल्लंधनं न करणीयमित्युक्वा रामं राजत्वस्वीकारं कर्तुं प्रेरयति ॥ राज्यस्वीकारादेशं कुर्वतो गुरोरप्यनुसरणं रामेणावश्यकर्तव्यमिति च स्मारयति ॥ अपि च वृद्धाया धर्माभिज्ञायाश्च स्वमातुराज्ञापरिपालनमपि रामेण कर्तव्यम् ॥ पौराणां सामन्तानां विदुषां ब्राह्मणानां चाभिलाषितस्यास्वीकारोपि न न्यायः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वशास्त्रनिष्णातस्य बुद्धिमतः स्वकुलगुरोस्तादृशेन वादमुखेन समर्थितान्मार्गाद् व्यतिचलितुं रामः कथं वा सज्जः, स्यात्? तस्य प्रत्युत्तरं दार्ढ्र्ययुक्तमन्तिमं चाऽसीत् ॥

स हि राजा दशरथः
पिता जनयिता मम।
आज्ञापयन्मां यत् तस्य
न तन्मिथ्या भविष्यति ॥ (अ.-101-11)

अर्वाचीनैः सत्याग्रहरूपेणाभिमतं कञ्चन मार्गं स्वीकृत्य तत्पश्चात् भरतो राममनुकूलयितुं प्रयतते ॥ स्वसमर्थकं कञ्चन समवेक्षितुं भरतः सर्वत्र लोचनानि व्यापारयामास किन्तु कमपि तादृशं नाविन्दत्। "स्वदृढ़ान्निश्चयादन्यत् प्रेरणासमर्थं न भवितुमर्हति रामविषये ॥ धार्मिकपथात् रामं व्यतिचालयितुं न कोपि शक्त इति सर्वैर्विदितमासीत् । अन्ते च भरतस्यापि सहमतिः सञ्जातः। किन्तु सुखानुभवार्थं तस्य प्रेरणां कर्तुं न कोपि प्राभवत्। तपोधनाचारितां रीतिमनुसृत्य विषयवैमुख्येन स्वकर्तव्यानुष्ठाने स्वात्मानं भरतो नियोजयामास ॥ प्रतीकविधया रामस्य प्रतिनिधित्वेन च पादुकद्वयमयोध्यां प्रति नेतुं निरचिनोच्च ॥

अवश्यमेवैषाऽत्युच्चकोटिका वेला द्वावप्येतौ भ्रातरौ श्रेष्ठानां मानवीयादर्शानां निदर्शनं दत्तवन्तौ ॥ रामः केवलं तत्र न विरमति। कैकेयीं प्रति स्वात्मनि न कोपि कलुषभावनाऽस्तीत्यपि तेन स्पष्टीकृतम् ॥ स भरतमेवमवादीत्-तव माता कामाद्वा लोभाद्वा एतदनुष्ठितं स्यात्, त्वया तन्मनसि न कर्तव्यं पूर्ववन्मातरि सादरों व्यवहारः कर्तव्य इति ॥

कामाद् वा तात लोभाद् वा
मात्रा तुभ्यामिदं कृतम्।
न तन्मनसि कर्तव्यं
वर्तितव्यं च मातृवत् ॥ (अ.-112-14)

भरतः प्रकृत्यैवोन्नतादर्शवान् सुयोग्यश्च, परन्तु घटितैः, कार्यविशेषैः कदाचित् क्षुब्धोऽवश्यमेव भवति सः ॥ रामस्योपदेशं प्रतिवचनोक्तिं विना सः स्वीचक्रे ॥

यद्यपि कैकेयीं प्रति स्वमनसि सकलुषा भावना नैवासीदीति रामेण सर्वेषां पुरतः प्रकटितमासीत् तथाप्येतत् सर्वथा साधु याथातथ्यं चेति वयं वक्तुं न प्रभवामः ॥ स्वाभाविकी मानवीया मानसी प्रवृत्तिरवश्यमेव स्वप्रकृतिं तदवस्थां करोत्येव। यथा पश्चाद्वयं द्रक्ष्यामस्तथा विराधेन सीतापहरणे कृते मनोन्तर्लीना कैकेयीं प्रति सकुलषा भावना सद्य एव विस्फोटवत् प्रकटीक्रियते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुबाहुमारीचयोस्सघर्षे बाल्ये वयस्येवानायासेनैव तद्विद्रावणं रामेण कृतं। उच्छिन्नसमस्तक्षत्रियस्यापि भार्गवरामस्याभिभवः स्मेराननेन रामेण निष्फलीकृतः। तादृशस्य रामस्य विराधेन सह संघर्षे धैर्यलोपः कथमासीदिति विस्मयमावहत्येव। पश्चाद्विरचितरामायणग्रन्थेषु, वहव एतं घट्टं लघूकृत्य वर्णयन्ति ॥ अध्यात्मरामायणे तावदेवं वर्णितम् ॥ विराधमायान्तं दृष्ट्वा, रामो मैथिलीं सान्त्वयित्वा सशरं धनुरुत्थायाऽयोधनार्थं शैल इव निश्चलस्तिष्ठतीति। सीतायाः बलवद् ग्रहणे यदा राक्षस उद्युक्त आसीत्तदा स रामेण छिन्नबाहुः कृतः। तदा तस्य मुखं स्मिताञ्चितमेवाऽसीत्। स्मेराननत्व रामस्य प्रकृत्या सिद्धम्। वाल्मीकिवर्णने तावदेतस्य संघर्षस्य समये रामो लुप्तधैर्य आसीदिति दृश्यते ॥ पूर्वापरयोर्विपरिणयोः सद्यः संभूतत्वाद्रामेण स्थितिभेदेन सह सामञ्जस्यं कर्तु क्लेशोनुभूयतनाम ॥ प्रारम्भे विराधः सीतामादाय तां स्कध्नस्थां कृत्वा पुरतः प्रचलितुं शशाक ॥ रामो भग्नाशः संवृत्तः कैकेयीकुत्सने च व्यापृतः ॥ रामेणानुभूतानां समस्तानां क्लेशानां सा एव मूलकारणम् ॥ इदानीं तु क्लिष्टतमा दशा सम्पन्ना यद्वैदेह्या परस्पर्शदुःखमपि सम्भूतम् ॥

अत्यन्तसुख संवृद्धां
राजपुत्रीं यसस्विनीम्।
यदाभिप्रेतमस्मासु
प्रियं वरवृतं च यत् ॥

कैकेय्यास्तु सुसंवृत्तं
क्षिप्रमद्यैव लक्ष्मण।
या न तुष्यति राज्येन
पुत्रार्थे दीर्घदर्शिनी ॥

ययाहं सर्वभूतानां
प्रियः प्रस्थापितो वनम्।
अद्येदानीं सकामा सा
या माता मध्यमा मम ॥

परस्पर्शात् तु वैदेह्या
न दुःखतरमास्ति मे।
पितुर्विनाशात् सौमित्रे
स्वराज्यहरणात् तथा। (आ.- II-18-22)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वदा रामनिध्नस्य लक्ष्मणस्येदानीं रोषो निस्सीमः समवर्तत। भ्रातुर्धैर्यमभिवर्धयन् स एवं वदति।

अनाथ इव भूतानां
नाथस्त्वं वासवोपमः।
मया प्रेष्येण काकुत्स्थ
किमर्थं परितप्यसे।
शरेण निहतस्याद्य
मया क्रुद्धेन रक्षसः।
विराधस्य गतासोर्हि
मही पास्यति शोणितम् ॥ (आ.- II-23-24)

निस्सन्देहं रामः पुनरपि प्रकृतिस्थः इत्यादि समभवन् विराधेन सह सम्भापणे संलग्नः। यदा वा विराधो दुर्धर्षः समभवत्तदा तं जघान च ।

अत्र सन्दर्भे कश्चन प्रश्न उत्तिष्ठति॥ प्रथमतो विराध आयासं विनोभावपि भ्रातरौ गृहीत्वा यथेच्छं गछतिस्म । रामरावणयोर्युद्धसमये दशाननशक्ति विद्धो लक्ष्मणो भूमौ निपतत्॥ तमुत्थातुं राक्षसेन्द्रेण यत्नः कृतः, तस्मिन्नेव क्षणे लक्ष्मणः स्ववैष्णवांशत्वमनुस्मरन् शेते स्म॥

हिमवान् मन्दरो मेरु
स्त्रैलोक्यं वा सहामरैः।
शक्यं भुजाभ्यामुद्धर्तुं
न शक्यो भरतानुजः।
शक्त्या ब्राहम्या तु सौमित्रि
स्ताडितोऽपि स्तनान्तरे।
विष्णोरमीमांस्यभाग-
मात्मानं प्रत्यनुस्मरत्॥
ततो दानवदर्पघ्नं
सौमित्रिं देवकण्टकः।
तं पीडयित्वा बाहुभ्यां
न प्रभुर्लङ्घनेऽभवत्॥ (यु.- 59-111-113)

कैलासोद्धारकोऽपि पङ्क्तिकन्धरस्तमुत्थापयितुमसमर्थः समभूत्। अस्मिन् सन्दर्भे न्यूनसत्वेनापि राक्षसेन उभावपि भ्रातरौ विना प्रयत्नमुत्थापितौ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बाल्मीकिनैतत्प्रदर्शितं स्यात्तस्यां मुग्धावस्थायां स्वकीयं वैष्णवं मूलं रामेणापि विस्मृतम्? तथैव परममद्वैतं तत्वं रामस्य बोधात्तिरोभूत-मित्यस्याऽध्यात्मिकमर्थकल्पनं स्याद्वा?

विराधवधानन्तरं गहने दण्डकारण्येऽपरेष्वपि क्रूरसत्वैः क्रूरतरै-राक्षसैश्चाध्युषितेषु स्थानेषु रामः प्राविशत्॥ त्रयोदशवर्षपर्यन्तं पवित्रतमानां मतिमतां च तपोधनानां सहवासो रामेण लब्धः। महातपस्वी भरद्वाजस्तेषु प्रथम स्तदनन्तरमत्रिः शरभङ्गः सुतीक्ष्ण इत्यादयः। अरण्यनिवासस्योद्देश्यद्वयं, एकं च महद्भिस्सह सङ्गमेन ज्ञानावाप्तिरपरं च क्षत्रियकर्तव्यरूपं महात्मनां संरक्षणम् तैस्तादृशं संरक्षणमत्यन्तापेक्षितमेवासीत्॥ विविधेषु तपश्चर्याविशेषेषु, परिनिष्ठितानां तपस्विनामत्यन्तोपद्रवकारिणस्ते राक्षसाधमाः। तत्र तत्र परिदृश्यमानान्यस्थीनि तेषां क्रूरकर्माणां साक्षित्वमावहन्ति स्म। यदा तानि रामाय प्रदर्शितानि तेभ्यः संरक्षणं रामात् संप्रार्थितं च तदा रामेण सम्पूर्णं परिरक्षणं प्रतिश्रुतम्॥ भ्रात्रा सह तादृशं परिरक्षणं प्रदातुं स्वयं शक्तश्चेति विशेषतस्ते स्मरिताश्च॥

भवतामर्थसिद्ध्यर्थ
मागतोऽहं यदृच्छया।
तस्य मेऽयं वने वासो
भविष्यति महाफलः।

तपस्विनां रणे शत्रून्
हन्तुमिच्छामि राक्षसान्।
पश्यन्तु वीर्यमृषयः।
सभ्रातुर्मे तपोधनाः। (आ.- VI-24-25)

असन्दिग्धमेव तपस्विन आश्वस्ताः। किन्तु जनकनन्दिनी किंचिदुद्विग्ना समभवत्, अद्यापि सामञ्जस्यं वहतः कस्य चिदाचारविशेष विषये प्रकाशं समर्पयन् कश्चन सीतारामयोः संवादोऽवधेयः। स्वकृतं राक्षसवधरूपं समाश्वसनं पुनःप र्यवेक्षितव्यं यथार्थतो दुष्टा एव मारयितव्या इति मैथिल्या रामः प्रार्थितः। पूर्वं समुचितेऽध्याये अस्माभिश्चर्चारीत्या सीतासान्निध्ये एव रामः स्वप्रकृतिवैशिष्ट्यं धारयन् दृश्यते न त्वन्यथा॥ स्वपत्न्या उपदेशं रामोऽवधानेन श्रुतवान्। यद्यपि तस्य सविधेसर्वाण्यपि दिव्यास्त्राण्यासन् तथापि रामस्तेष्वतिमात्रं नाशसमर्थानि प्रबलानि च कदचिदेवोपयुक्तवान्।

रामस्य प्राथमिकः संघर्षः खरप्रेपितैश्चतुदर्शराक्षसैस्सहासीत्। तच्चायोधनं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नितरामसौ विध्यपरिपूर्णश्चाऽसीत् यतः सीतायाः परिरक्षणमेकत्र कर्तव्यमासीत्तस्मिन्नेव समये बहुभीराक्षसैः सह योद्धव्यमप्यासीत्। रामेण ते सर्वे क्षिप्रमेव यमालयं प्रेषिताः। तदनन्तरं शीघ्रमेव देवादीनामपि विजेतृभिः खरदूषणत्रिशिरोभिरपि सह समरः कर्तव्यः समभूत्। सर्वैरपि स्वेनैव योद्धव्यमिति निश्चित्य लक्ष्मणं सीतायाः परिरक्षणे न्ययोजयत्। यथाऽस्माभिः पूर्वमेव चर्चितं तथा एभिः पराक्रमशालिभि। राक्षसैरपि सह युद्धवेलायां विजयश्रीपरिलालितः। अत्युच्चं प्राभवं च तस्य परिस्फुटीकृतम्।

एतावत्पर्यन्ते समये श्रियः पराकाष्ठायामागतो रामः। विद्याधिगमे नैतिकत्वपरिशीलन आचारविशेषे चारित्रे च परेषां निदर्शनभूतः सञ्जातश्च सः। सङ्ग्रामे इतरैरजय्यश्च। काञ्चनमृगानुसरणे तेन चापल्यं प्रकटीकृतं वायद्द्विधिना विहितं तत्तदवश्यमेव सम्भवतीति बहुभिरेतदितिवृत्तं व्याख्यातं अथवा रामसदृशो मतिमान् मायामयस्य काञ्चनमृगस्यानुसरणं किमर्थं कृतवान्। किन्तु वाल्मीकिनैषा वीक्षणगतिर्न समर्थितेति प्रतिभाति। काञ्चनमृगस्य स्वायत्तीकरणे सीताऽत्यन्तं लोभमकरोत्॥ यदि जीवतो मृगस्य प्राप्तिर्न संभवेत्तर्हि मृगस्य तस्य काञ्चनमयं चर्म करगतं कर्तव्यमिति सा इयेष। साधारणतया न किञ्चिद्वस्तुनः कृते सीतया प्रार्थना कृता यतस्तस्य सन्दर्भान्येव नाऽसन्। सर्वमपि वैदेह्या ईपसितं लक्ष्मणेन सुसम्पद्यमानं कृतं अस्मिन् पुनः सन्दर्भे लक्ष्मणस्तदिच्छानुरोधेन कार्यनिर्वहण उत्सुको नाऽसीत् यतः सो निष्टमाशङ्कते स्म। मायाविनो मारीचस्य छलकर्मैतदिति तेन सम्यग भ्यूहः कृतः एतद्विषये रामः स्वयमेव तन्निर्वहणायोद्युक्त समभवत्॥ पूर्वमवसरद्वये दण्डितः पश्चात्क्षमाविषयः कृतश्च स यदि पुनरपि द्रोहं कर्तुं सज्जीभविष्यति चेत् स हन्तव्य एवेति रामेण निश्चयः कृतः स्यात्।

यद्यपि रामस्य मृगानुसरणोद्योगो नैसर्गिकस्तथाऽपि पश्चाल्लक्ष्मणेन सह तस्य व्यवहारःकिंचिन्निष्कारुण्यप्रभवमिति प्रतिभाति। लक्ष्मणः सीतायाः कठोराणि दुर्वचनानि श्रुत्वाऽपि क्षमावानेवाऽसीत्। किन्तु यदा सीताऽऽत्महत्यां कर्तुमुद्यक्ताभवत् कथं वा तेन मर्षयितव्यं मनोबले लब्धप्रतिष्ठस्यापि कदाचिद्व्य-तिचलनं स्यान्नामेति सूचयितुमेवाऽदिकविना यत्नंः कृतः स्यात्। पश्चाद्रामो न केवलं नष्टमनस्सन्तुलनो अपि तु नष्टविवेकमतिरप्यासीद्यदा सीता रावणेनाऽपहृतेति तेन विदितम्। रामस्य व्यवहारान् विस्तरशः कविः किमर्थं वर्णितवान्? अत्र कविभावनायाः सम्पूर्णं विलसितं कदाचित्प्रयुक्तव्यमासीत्। एतदपि स्यान्नाम रामो नष्टसन्तुलन इत्यनुवाचकान् बोधयिष्यामीति कविना संकल्पः कृतः। सकृत् विरहिष्वतिमात्रं दयनीयां दशां राम आपन्न आसीत्। सद्यः सो न्यां कोटिमुपेत्य देवानामपि नाशयिष्यामीति साहसपूर्वं प्रवक्ति। तादृशेषु सन्दर्भेषु लक्ष्मणः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिपूर्णतया संप्राप्तनियन्त्रणः स्व भ्रातरं नैसर्गिक्यामवस्थायां पुनरानयति स्वाभाविकं कर्मजातं निर्वोढुमुद्युक्तश्च करोति। तच्च कार्यजातं राक्षसराजमनुद्रुत्य सीताप्रत्यानयनरूपमेव।

सक्रियो नरः शोकजातं भूयसा विस्मरति। शोकस्य दुस्सहत्वं न्यूनीकृत मवश्यमेव स्यात्। यदाप्रभृति जटायुषःसकाशाद्रावणविषयी वार्ता प्राप्ता तत आरभ्य द्वावपि भ्रातरौ कार्यनिर्वहणेऽग्रेसरावेवाभवताम्। यदा कबन्धस्य सुदीर्घबाहुश्रृंखलया निगडितौ तदारामोऽविचलितमतिरेवाऽभवत्। यद्यप्यविचारितमेव गृहीतस्तथाऽपि विराधसंघर्षकाले यादृशो व्यवहारः कृतस्तादृशादन्यमेव व्यवहारं करोति रामः। अत्र लक्ष्मण एव संभ्रान्तोऽभवत् रामेण कृतसान्त्वनश्च। लक्ष्मणस्य प्रतिकरणं सद्यः समनुकूलमासीत्। श्रृंखलायितौ बाहू कर्त्रयितव्याविति लक्ष्मणेन रामाय निर्देशः कृतः। कबन्धन सह सञ्जातः संघर्षः सुग्रीवसख्यं प्रति रामं समनयत्॥

वियोगावसरे रामेण स्वकीया भव्यावस्था सर्वदादृतेऽति न वक्तुं शक्यते॥यदाकदापि शोकाभिभूत एवासीत्। निसर्गसुन्दरस्य पम्पासरसो दर्शनं वियोगावस्थायामरुन्तुदमन्वभूयत॥ रामेण कृतं पम्पावर्णनं रत्युत्पादकशोभातिशयोद्गारश्च रामस्य मनसः सौकुमार्येण सह सामञ्जस्यं च भजति। सुग्रीवेण सह सख्यं प्रार्थयता हनुमता साकं यदा रामस्य सम्पर्कः समभवत्तदा स संप्राप्तनैसर्गिकावस्थ एव सम्भूतः। सुग्रीवे रामः समान दुःखं कञ्चन सुहृदमदर्शयत्॥ रामस्य प्राणप्रिया राक्षसराजेनापहृता आसीत् सुग्रीवस्य पत्नी तु तस्य भ्रात्रा बलात्स्वायत्तीकृता। सुग्रीवानुभूतं विरहदुःखमिक्ष्वाकुवंशप्रभवस्य सुयोग्यस्य राजकुमारस्य वियोगदुःखेनौपम्यं न भजति। समुदायत्रयस्य वर्णनं वाल्मीकिना रामायणे कृतं तत्तत्समुदायेषु प्रचलिता अचारविशेषा भिन्नभिन्नाः सन्ति।

सुग्रीवस्य दुःखे रामः सहानुभूतिं हार्दिक्येनानुभूय प्रकटयति। यदा कपिश्रेष्ठस्य एकमात्रसुहृदभूद्रामस्तदा तेन तच्छत्रोर्दण्डोऽवश्यमेव करणीयः। बालिनो वधो निरतिशयआसीत्। सुग्रीवस्तल्लघुनाऽमन्यत॥ तस्माद्धेतो रामेण पुनः पुनः समाश्वनं करणीयमासीत्। रामस्य सांयुगीनः पराक्रमातिशयः खरादिराक्षसैस्सह सञ्जातसघर्षे प्रकटितः सुग्रीवेण साक्षान्न दृष्टः खलु। बलिष्ठस्तस्य भ्राता पराक्रमसम्पन्नं रावणं बन्दीकृत्य निस्तेजस्कं कृतवान् यदा रामस्य प्रभावविषये पर्याप्तं प्रमाणमावश्यकमिति निर्बन्धस्य सूचना सुग्रीवेण दत्ता तदा रामस्तेनासन्तुष्टो नाभवत्। प्रमाण प्रकटनं रामेण पद्धतिद्वयेन निर्व्यूढं।दुन्दुभेः पर्वताकारस्य शीर्षास्थिस्वण्डस्य पदाङ्गुष्ठेन दशयोजनपर्यन्तं प्रक्षेपोऽनितरसाधारणं महनीयं कर्म एव। परन्तु स आतपशुष्क एवासीत्। वालिना तु जीवतो राक्षसस्यार्द्रं शिरो हस्तेन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लुलितमासीत्। सप्तसालानामेकशरप्रयोगेन निपातनमेतस्मात् साधीयः प्रमाणप्राप्त्या सुग्रीवः सन्तृप्तोऽभवत्। नान्यदमार्गयच्च तदनन्तरं रामस्तस्मै भिन्नया रीत्या संपूर्णं सान्त्वनं यच्छति स्म। पूर्वं रामेणैवमुक्तमासीद्यत् वालि बलिष्ठानां स्वशराणां सम्मुखे स्थातुं न शक्नोतीति। अस्मिन् सन्दर्भे एकेनैव शरेण वालिनं निपातयितुं समर्थो भविष्यामीति सान्त्वयति। राम एतत्कर्म सत्वरं कर्तुमैच्छदिति प्रतिभाति। पक्षादस्य चर्चां करिष्यामः।

अत्र कस्यचिद्रामायणकथानकस्य विस्तृता चर्चा विधातव्या एनं वालिवधसम्बन्धिनं कथानकमधिकृत्य रामायणकथाचर्चकैः परस्परविरुद्धा अभिप्रायाः उन्नीताः। व्याख्यानानां रामव्यवहारसमर्थकानां वादमुखानां सत्वेऽप्येतद्विषये कलङ्कास्पृष्टः स इति वक्तुं न पार्यते। कस्यचिद्रुमस्य पश्चादन्तर्हितः सन् किमर्थं रामो वालिवधार्थं शरं मुक्तवान्? किं वा वालिनं सम्मुखे युद्धायाहूय तस्य दोषस्य परिहारार्थं पश्चात्तापं कर्तुं निर्बद्धं नाऽकरोत्? स्वपत्नीमपहृतवतो रावणस्य विषये सीतां प्रतिप्रदाय क्षमायाचनायां कृतायां तस्य दोषो रामेण मर्षितः स्यादिति करुणामयो व्यवहारः कृतः। वालिना सह नियताय युद्धाय रामः सज्जीभवन् एवं विश्वसति स्म यद्बाली युद्धे स्वसमानः कदापि न भविष्यतीति। अत्रायं प्रश्नः समुत्तिष्ठति प्रारम्भे रामो युद्धाय सज्जीभवन्नासीत् पश्चात्तन्निश्चयमन्यथा चकार वेति।

साक्षाद्युद्धे वाली न केनाऽपि जेतुं शक्य इति केषाञ्चिद्रामायणकृतामाशयो वाल्मीकिना न स्वीकृतः॥ एकोप्ययमभिप्रायो वालिना सह साक्षाद्युद्धं कुर्वता शक्तेरर्धं वालिनमुपतिष्ठेदिति॥ तादृशः कश्चन वरो वालिना प्राप्त इत्यादिकविर्नकुत्रापि वर्णयति। तर्हि किमर्थं छलेन वालिनं व्यापादयितुं रामः कृतसङ्कल्पोऽभवत्? न कस्यापि प्रतिद्वन्दिनो विषय ईदृशी रीतिस्तत्पूर्वं वा तत्पश्चाद्वा रामेण स्वीकृता।

सन्दर्भसाकल्येनैवात्र विषये निर्णयोऽस्माभिः कर्तव्यः॥ वालिनो वधः सुग्रीवस्य पट्टाभिषेकश्च स्वेनाऽवश्यमनुष्ठातव्य इति पूर्वनिश्चयं रामः कृतवान्। चरित्रे राम ईदृशः सुयोग्यो यत्स्वकर्तव्यमादावेवनुष्ठाय तदनन्तरमेव स्वाधिकारप्राप्तौ मनो ददाति। अपि च राज्यप्राप्त्यनन्तरमेव सीतामार्गणाय चतसृषु दिक्षु वानरयूथान् प्रेषयितुं सुग्रीवः समर्थोऽभवेत्। साक्षाद्युद्धं बलिनो विषये दीर्घकालव्यापृतमभविष्यत्। रावणेन सह समरः सप्ताहककालव्यापी समभवत् यतः वाली दशाननादपि बलवत्तर आसीत्ततःत्तेन सह साक्षात्समरस्य कालावधिः तदधिको भवेदेव।

किं वा वालिना स्वदोषं स्वीकृत्य क्षमायाचना कृता स्यात्? तथा सति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुग्रीवस्य पट्टाभिषेकाय रामेण कृतायाः, प्रतिज्ञायाः का गतिः स्यात्? वाली सीतान्वेषणे साधीयान् सखाऽभविष्यत्? ॥ वस्तुतो रामेण सह वाग्वादे क्रियमाणे वालिनाप्येतत्स्पष्टीकृतमासीत्। एष वादमुखो यथार्थतो विश्वाससमुत्पादको नैव। स्वात्मनः कथने वालिना हार्दिकत्वं परिपालितमिति न वर्त्तु शक्यम्। शत्रोः सुहृद्रातित्वेनैव गणनीयो न तु स्वाभाविक सुहृत्वेन। अपि च पराक्रमशाली वालीसदृशो वीराग्रेसरो रामस्य युद्धाह्वानसमये भीरुर्नैव भविष्यति ॥

रामविषयेऽपराधं नैव कृतवान् वाली ॥ तं मारयितुं रामस्य सहमतिः साधुर्वा न वेति प्रश्नान्तरमत्र समुत्तिष्ठेत् ॥ केवलमस्मात्कारणात् यत्सुग्रीवेण सह सख्यं रामेण कृतमिति स्वात्मविषये निरपराधं कञ्चन हन्तुं समुद्यमो धार्मिकः स्याद्वा? राम एतद्विषयकस्य वालिनो वादमुखस्यैवमुत्तरं प्रयच्छति।

इक्ष्वाकूणामियं भूमिः
सशैलवनकानना।
मृगपक्षिमनुष्याणां
निग्रहानुग्रहेष्वपि ॥
तां पालयति धर्मात्मा
भरतः सत्यवानृजुः।
धर्मार्थकामतत्वज्ञो
निग्रहानुग्रहे रतः ॥
नयश्च विनयश्चोभौ
यस्मिन् सत्यं च सुस्थितम्।
विक्रमश्च यथा दृष्टः
स राजा देशकालवित् ॥
तस्य धर्मकृतादेशा
वयमन्ये च पार्थिवाः
चरामो वसुधां कृत्स्नां
धर्मसंतानमिच्छवः ॥ (कि.- XVIII-6-8)

इत्यादि। आर्तर् संज्ञकस्य नृपस्यानुयायिषु योद्धृणामिव सर्वेषामपि क्षत्रियाणां अपराद्धानां विषये दण्डनीतिरेव प्रयोक्तुमुचिता । राज्यसिंहासनं उपवेष्टकामेन सुग्रीवेण रहोमार्गेण वालिनो वधः करिष्यमाण आसीदिति विश्वासदार्ढ्येन प्रेरित एव वाली सुग्रीवं निष्क्रामयामास । एतद्विषये वालिना धर्मपथान्नव्यतिचलितम् ॥ क्षमाकरणं दैविकं कर्म परन्तु सर्वैरपि देवैर्नभूयते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कनीयसः भ्रातुः पत्नी दुहितृत्वेन मन्तव्या तथापि सुग्रीवपत्नीं रूमां हठात् स्वायत्तीकुर्वन् वाली महान्तमपराधं कृतवानेव । तस्मादेतत् सुष्ठु याद्रामेण सोपराधीमतो दण्डितः । किन्तु छलकर्मणा तादृशो वधो न्याय्यो वा ?

एतत् प्रतिभाति यद् वालीरामयोर्मिथो विवादे वाली एव साधीयान् इति ॥ वालिः स्खालित्यरहित इति न, किन्तु तस्य चरित्रे एक एव कलङ्क समुत्पादकः । यदि तेन सुग्रीवविषये कारुण्यं प्रदर्शितं तर्हि तत् साधु स्यात् किन्तु सुग्रीवं प्रति वालिनोऽमर्षोवगमनविषय एव। एकमेव तस्य स्खालित्यं यत दुहितृत्वेन गणनीयायाः भ्रातुः पत्न्या अभिमर्शः ॥

रामं कठोरेण कृत्येन समन्वितमुक्वा यदाऽभियोगो वालिना क्रियते तदा तस्य शब्दप्रयोगः संयतरूपेणैव क्रियते ॥ युद्धे निपतितस्य वीररय विषये एतेन किञ्चित् साधुत्वविशेषमपि सम्पादयति। रामो धर्माद् व्यतिचलित इति समर्थयितुं समुचितानि कारणानि प्रदाय वाली एतां प्रतीक्षां कृतवान् यद्रामेणाऽपि स्वनिर्णयसमर्थनविषये समुचितानि कारणानि प्रदर्शितव्यानिति। वाालिनो दोषारोपणविषये रामः साधुत्वं सम्यग् परिरक्षन् व्यवहरत्येतद्रामे योग्यताविशेषमापातयति। वालिन उपरि रामेण कृता अभियोगा अनुरोधरुपत्वमावहन्तीति प्रतिभाति ॥

आरम्भे एव रामस्य वादमुखाः दुर्बला शासकेन भरतेनारण्येऽपि विधिनियमानां प्रतिष्ठापनं कारयितुं रामो नियुक्त इति प्राग् कुत्रापि न प्रतिपादितः । सत्यस्य स्थितिरन्यथैव ॥ सर्वाण्यपि राजकीयकार्याणि रामेण संत्यक्तानि । नैतावतो रामः क्षत्रियकर्मेभ्यो विरतोऽभवेत्। यद्यत् क्षत्रियेणावश्यमनुष्ठातव्यं तत्तद्रामेणाप्यनु, ष्ठातव्यमेव । क्षत्रियस्य परमं कर्तव्यं क्षतात् सर्वेषां त्राणनम् ।

क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रुढः ।
राज्येन किं तद् विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्वा ॥ (रधुवंशः- II-53)

रघुवंशे दिलीपस्य वचनेष्वेतत् सुस्पष्टतया प्रदर्शितम् । एतावदवधि सुग्रीवं प्रत्यभयदानं रामेणाऽचरितं न्याय्यमेव। किन्तु पश्चादुपन्यस्ता रामस्य वादमुखा दौर्बल्यव्यञ्जकाः । एकत्र रामो वालिनं मानवसदृशं धर्मशास्त्रेषु निष्णातं च मन्यमानो व्यवहरति । अन्यत्र स्वकृतस्य तस्य वधस्य न्याय्यीकरणमेवं निर्वहति यत्सकेवलं वन्यमृग एव। मृगयार्थं तस्योपर्यस्त्रप्रयोगश्च न्याय्य एवेति वदति॥ पञ्जरे मृगयुर्यदिकमपि पशुं वध्नीयादथवा तिरोहितस्सन्नपि निहन्यात् को वा तं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृगयुपमराधिनं मन्येत? एतद्रीत्या उपन्यस्ता वादमुखा रामं संशयापन्नं स्फुटीकरोति। तेनोपन्यस्यमाना वादा अनाय्यं न्यायीकर्तुमुपन्यस्ता एव इत्यप्याविष्करोति।

यदा यदा धर्मात्स व्यतिचलति तदा तदा व्यवहारोऽस्थिरः तत्समर्थनवादाश्च दुर्वला इत्येतद्रामस्य योग्यतापादकं किं वा? एषा मम सुदृढा मतिरेतत्तदवस्थमेव। योऽधर्मभीरुरिति कथ्यते तस्य स्वाभाविकं चरितं समग्रतयाऽवगन्तुं एकस्मादपरमिति कृत्वा घटिकानां पूर्ववृत्तानां सिंहावलोकनं कुर्मः। पश्चाद्वाल्मीकिना एष महासत्वः कपीनां राजा वाली महात्मेति भण्यते । यथा पूर्वमस्माभिर्वर्णितं तथा वालिना सह साक्षाद्युदधं कर्तुमेव रामः कृतनिश्चय आसीदिति भासते। तादृशं युद्धं दीर्घकालिकं संवृत्तमभविष्यत् तमेकेनैव शरेण निहन्तुमुदितो विचारः पश्चात्कालिकः। वालिनोऽपेक्षया स्वस्य पराक्रमे ज्यायस्त्वं प्रदर्श्य तत्र सुग्रीवस्य विश्वासं जनयितुं परिपूर्णतया क्षमाणि प्रमाणानि प्रदर्शयन् रामः सुग्रीवं वालिनो युद्धे समाह्वानं कर्तुं प्रेरयति। द्वन्द्वयुद्धे प्रवर्तमाने कदाचित्स्खालित्येन सुग्रीवंमिषुणा प्रहन्यादिति कृत्वा शरप्रयोगं न कृतवानित्येव रामः स्वयं सुग्रीवं वदति। कविना तत्सन्दर्भस्य वर्णनमेवं कृतं-

ततो रामो धनुष्पाणि-
स्तावुभौ समुदैक्षत।
अन्योन्यसदृशौ वीरा-
वुभौ देवाविवाश्विनौ। (कि.- XII-19)

यदि सुग्रीवः शरेण निहतोऽभविष्यत् तत्र मूलाधातो महान् अभविष्यदेवमुक्त्वा रामः सुग्रीवं समाश्वसयति॥ वनपुष्पैर्विशिष्टं हारं ग्रथयितुं लक्ष्मणमादिशति। एतेन हारेण भ्रात्रोर्विविच्य प्रत्यभिज्ञानं सम्भवितुं शक्यते। पूर्वमतिमात्रं यः सम्भ्रान्तचित्तोऽभवत् तस्य सुग्रीवस्य मनसि प्रसन्नता श्रद्धा च समजनि॥

वाक्यार्थादतिरिक्तमेषु वाल्मीकिवचनेषु, सूचितोऽप्यर्थः संभवितुमर्हति वा? अत्र सूक्ष्मतया विवेचनस्य विचिन्तनस्य च सभाव्यता विद्यते॥ भ्रात्रोः कंपिवीरयोर्मिथः सादृश्यं कदाचित्सादृश्यं स्यात् यथा मिथो विवेकः कृच्छ्रसाद्ध्याऽऽभविष्यत् किन्तु द्वन्द्वयुद्धस्य परिणामे काऽपि शङ्का नाऽसीत्। केवलं दर्शनेनैव वालिनं प्रतिज्ञातुं रामोऽशक्तः स्यान्नाम, परन्तु विक्रमातिशयत्वादनुमातुं किं न शक्नोति स्म? वालिनाऽनुद्रूयमानाः सुग्रीवः पर्वतोपरि स्वरक्षां प्राप्तुं यतते॥ वालीपश्चात्समीप एव कञ्चित्कालं धावन्नासीत्। तादृशे समुचिते सन्दर्भे किमिति रामेण शरो न क्षिप्तः? किमेतत् संभवति रामस्य धर्मिष्ठा विविक्तमतिस्तमेवं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बोधितवती किं शत्रुं पश्चात्तिरोहितः सन् यदि शरः प्रयुज्येत तदशिष्टं भीरूकर्माभविष्यत् ? पूर्वं विश्वामित्रेण सह यात्रासमये ताटकाविषयेऽपि राम ईदृशी धार्मिकी विचिकित्सा दृष्टचरा। द्वितीयेऽपि सन्दर्भे निश्चयकरणे रामस्य भूयान् विलम्ब आसीत्। युदधस्य विवरणानुरोधेनादौ एव सुग्रीवस्य देहावसादो प्रवर्धमान आसीत्-

परस्परममित्रघ्नौ
छिद्रान्वषणतत्परौ।
ततोऽवर्धत बाली तु
बलवीर्यसमन्वितः॥
सूर्यपुत्रो महावीर्यः
सुग्रीवः परिहीयत। (कि XVI -25, 26)

तथाऽपि युद्धान्न विरराम रामस्येषुणा सर्वस्याप्यर्थस्यन्तिमो निर्णियः सद्य एव एव स्यादित्याशया।

बालिंना भग्नदर्पस्तु
सुग्रीवो मन्दविक्रमः।
बालिनं प्रति सामर्षो
दर्शयामास राघवम्॥ (कि XVI-27)

क्रमेण परिहीयमानः सन् रामं प्रति दयनीयमानाभ्यां नयनाभ्यामपेक्षमाणः प्रार्थयमानश्च परमां दुरवस्थामन्वभवत्-

तौ शोणिताक्षौ युध्येतां
वानरौ वनचारिणौ।
मेघाविव महाशब्दै-
स्तर्जमानौ परस्परम्॥

हीयमानमथापश्यत्
सुग्रीवं वानरेश्वरम्
प्रेक्षमाणं दिशैव
राघवं स मुहुर्मुहुः॥ (कि- XVI-30,31)

अस्मिन्नेव सन्दर्भे स्वक्रियां प्रति रामो निश्चयमकरोत्। कविना स्फुटमेव तद्वर्णितं।

ततो धनुषि संधाय
शरमाशीविषोपमम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूरयामास तच्चापं
कालचक्रमिवान्तकः ॥ (कि- XVI-33)

पश्चात् सर्वं शीघ्रमेव संवृत्तम्। रामस्याजय्यः शरो वालिनो हृदयेऽतिगाढं प्रविश्य तं निपातयामास अप्रतिद्वन्द्कमहिमाऽपि वाली अवस्थातुं न पारयामास।

ततस्तेन महातेजा
वीर्ययुक्तः कपीश्वरः।
वेगेनाभिहतो बाली
निपपात महीतले ॥ (कि XVI-36)

अतः परं कविना रामस्य शरो विस्तरेण वर्ण्यते।

नरोत्तमः कालयुगान्तकोपमं
शरोत्तमं काञ्चनरूप्यभूषितम्।
ससर्ज दीप्तं तममित्रमर्दनं
सधूममग्निं मुखतो यथा हरः ॥ (कि. XVI-38)

एभर्विाल्मीकिप्रतिपादित वाक्य निचयैः प्रेरितः सन् एव कम्पसंज्ञितेन तमिल् महाकविना रामस्य शरं स्वशरीरादुत्पाटयितुं वालिना कृतो मोघप्रयत्नो वर्ण्यते। केन वा शरः प्रहित इति ज्ञातुं सायकपुंखे अङ्कितं नाम वाचयितुं वाली यत्नमकरोत्। अन्नतो राम इत्यक्षरद्वयं तेनाऽवलोकितं च। बाणं बहिर्निष्क्रामयितुं दशाननजेताऽपि वाली न शशाक ॥

अस्मिन् विषये रामेण कृतो विलम्बो नापेक्षित आसीत्। लक्ष्मणेन ग्रथितस्य हारस्य साहाय्येन सुग्रीवः शीघ्रमेव प्रत्यभिज्ञातः स्यादिति वाली तदानीमेव न्यहन्यत चेत् तत् सुष्ठु स्यात्॥ तथाऽपि सुग्रीवस्य पराजयस्य परमां काष्ठां यावद्रामेण विलम्बः कृतः। अध्यात्मरामायणस्य केरलभाषापरिवर्तने तुञ्चन् नाम महाकविः रामस्य विचिकित्सां विलम्बं च भ्रात्रोर्द्वयोरपि ग्रीवयोः माले रामेण दृष्टे इति वर्णयन् समर्थयति। सुग्रीवस्य कण्ठस्था मालाऽच्युतेन (रामात्मना) प्रदत्ता वालिनः कण्ठे इन्द्रप्रदत्ता च। एते द्वे माले कथं मिथः सादृश्यमावहतः स्म ? अशक्यसम्भवमिति प्रतिभाति। लक्ष्मणेन ग्रथिता माला वनकुसुमैर्गजपुष्पैः निर्मितेति कविना वर्णिता।

ततो गिरितटे जाता
मुत्पाट्य कुसुमायुताम्।
लक्ष्मणो गजपुष्पीं तां
तस्य कण्ठे व्यसर्जयत् ॥ (कि- XII-40)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदेवं निश्चयं कुर्मः अधर्म इति संभवन् व्याख्यानस्य करणे रामो दीर्घकालिकां विचिकित्सामकरोत्। रामो मूर्तिमान् धर्म इत्यस्माकं भावना।

एवं चर्चासमाप्तिं कुर्मः, अस्मात् कर्मणो रामचन्द्र कलङ्काऽस्पृष्टो न निर्गच्छति। एषः कथासन्दर्भो द्वे तथ्ये व्यनक्ति रामे मानविकानि कतिपयानि दौर्बल्यानि यदाकदाचिदासन् रामो धर्मस्य परमादर्शात् नैव व्यतिचलति स्मेति वक्तुं न शक्यते। एतदत्रावधेयं यत् सीतापहरणानन्तरं वाल्मीकिकृतं रामस्य चित्रीकरणं परमाच्छ्रीमयत्वात् किञ्चिद्विमुक्तमिति वस्तुतत्वम्। सीतापहरण-कृताद्वियोगदुःखाद्रामेणानुभूता व्यथाऽविचारिताऽतिदुस्सहा चाऽसीत्। रामेण स्वात्मनियन्त्रणं परिपूर्णतया कर्तुं दुश्शकमेवाऽसीत्। सीतासान्निदध्येऽपि रामेण परिपालितमात्मसंयमनमत्युच्चमासीत्। तत्र हेतुश्च तपस्विनां सङ्गमो यमनियमादीनां सततानुष्ठानं चेत्यवश्यमेव वक्तव्यम् अत्युकृष्टेऽपि मानवे ईदृशा बहव सन्दर्भा भवत्येव यत्राऽर्थकामौ धर्मादपि प्रबलतरौ दृश्येते। रामस्य विषये तावदेतवधेयं अपहृतायाः स्वपत्न्या अन्वेषणे पुनः प्राप्तौ च कस्यचित् सख्युरपेक्षा न कालातिपातसहा। तेन कारणेन कथमपि शत्रुसंहार एष्टव्य इति रामः कृतनिश्चयः स्यात्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥देवानामपि दुष्करम् ॥

यथा शूर्पणखाऽकम्पनश्च स्वयमपश्यतां तथा देवैरप्यजय्यत्वेन उन्नतामवस्थामवाप किल दाशरथिः। परन्तु शीघ्रमेव तदनुपदं सः प्रियायाः वियोगेन मानवीं दशामेव पुनरपि समवाप। सीताया अपहरणानन्तरं ये दिवसा अपगतास्ते रामस्य जीवने श्रीमत्वे शोभनत्वे च नात्यन्तश्लाघनीया आसन्। वालिनो वधानन्तरं ये मासा व्यतीता यदा तौ भ्रातरौ प्रस्रवणगिरिगह्वरे वर्षावारिभ्यो रक्षां प्राप्तवन्तौ रामस्य श्रीमत्वादौ सम्यक्तया न प्रदर्शयन्ति ऋते कविभावनाद्योतनाद्यदा कदाचित्। अनुभावकहृदयेषु वियोगव्यथा कवित्वं भावनाविष्कारं चोत्तेजयतीति प्रायोवाचः। कविर्वाल्मीकिरेतस्य सन्दर्भस्योपयोगमतितरां नैपुण्येनोपयोगं करोति। एतस्मादेव कारणात् वैषयिकानुभूतिप्रकटनपरं प्रकृतेः विवरणं सुग्रीवसख्यात्पूर्वमस्माभिरुपलभ्यते पम्पासरसः वर्णनादौ॥ पश्चाद्वर्षर्तोः शरत्कालस्य च शोभनत्वोत्कटं वर्णनं च सहृदयैकवेद्यम्। प्राकृतिकानि वस्तुजातानि सीतायाः शोकमयस्मृतिजनकनि रामेणाऽनुभूयते॥ रामगिर्याश्रमेषु विरहतापेन यक्षेन सन्तुष्ट्याद्यनुभवराहित्येन यथा नियन्ते स्म तथा रामेणाऽपि कृतमिति स्फुटतया व्यक्तीकृतं कविना। तस्मिन् सन्दर्भे नष्टपल्याः पुनः प्राप्ति विषयोपभोगार्थं साधनान्तराणि च प्राप्तवता सुग्रीवेण सह स्वात्मनो या विसदृशता वर्तते पुनः पुनः तामेवानुस्मृत्य यथानुभरं नियन्त्रयितुं न पारयति स्म। स्वकृतं वाग्दत्तं परिपालयितुं न कोपि यत्नः सुग्रीवेण कृत इति स्फुटं दृश्यमानं कार्तध्न्यं स्मृत्वा रामः क्रोधाविष्टः सम्बभूव च। आसु कोपविस्फोटनवेलास्वपि रामस्य महासत्वता दाक्षिण्यसम्पन्नता च लुप्ता न भवति। सुग्रीवं सिंहासनादपनीय तत्स्थाने अंगदोऽभिषेचनीय इति लक्ष्मणस्य विज्ञापनं रामो नाऽनुमोदते। लक्ष्मणस्यामर्षणं नियन्त्रयन् सर्वमपि स्खालित्यं दण्डेन न प्रमथनार्हमिति तमुपदिदेश। रामस्य स्वात्मनियन्त्रणं पर्याप्त विधया साफल्यभूषितम्। सुग्रीवसम्बन्धेनैव निरतिशयपराक्रमसम्पन्नमतिमात्र मेधाशक्तिविशिष्टं भक्ताग्रेसरं हनुमन्तं रामोऽविलम्बेन लेभे। रामस्यापरोक्षानुभूतिक्षमत्वं यथापूर्वं प्रस्फुटं भवति। सुग्रीवो हनूमते श्रद्धाविशेषं विश्वासदार्ढ्यं च निदधाति स्मेति कारणात् रामस्तस्मात् फलानुभवमवश्यप्राप्यं मनुते स्म। रामस्यैष विश्वासोऽचिरेण न्याय्यीकृतः। दुष्पारं समुद्रं लंघायित्वा सीतायाः सकाशे रामस्य सन्देशमंगुलीय प्रदानसहितं प्रापयितुमन्यः को वा शक्नुयात्? आज्ञप्तादधिकं श्रेयावहं च हनूमता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिद्धवत्कृतम्। रावणं प्रति समराह्वानमुपन्यस्य लङ्कापुर्या अर्धभस्मीकरणरूपं रामस्य प्रभावातिशयव्यञ्जकत्वरूपेण साक्षात् प्रदाय च रामदूतः स्वकर्तव्यं सम्यक्तया निर्वहति स्म। उद्दिष्टफलप्राप्त्या संप्रीतमना रामो विस्तृतमकूपारं महान्तं विघ्नमवगम्य ईषद् भग्नाशयः समवर्तत्। मारुतिना सागरः तीर्णः परन्तु किंवाऽहं वा लक्ष्मणो वाऽन्येपि.वानरा वा लंघने समर्थाः स्युः ? इति संशयाविष्टं रामस्य चेतः। एषा विचिकित्सा क्षणमात्रस्थायिनी सुग्रीवेणाऽनायासेनापनीता च । मानवस्वभावः एषः कदाचित् सन्तुष्टमनाः कादचिदुद्विग्रमनाश्च भवतीति एवं रीत्या वाल्मीकिः रामं मानवीयतापुरस्कृतं वर्णयति । श्रेष्ठोऽपि नरः समर्थस्य सुहृदः साहाय्येन सहकारेण च श्रीमत्वस्य परमां काष्ठां प्राप्नोति। एकः श्रेष्ठः सुहृद् सुग्रीवरुपेण किष्किन्धायं प्राप्तः। अचिरेणैव विभीषणरूपोऽन्यः लंङ्कायां प्राप्स्यते ॥

अवश्यकर्तव्यस्य कर्मण उत्पतिष्णोः निकटीभवन्नवर्तत। त्रिभुवनविषमं रावणं तस्य दुर्जनभूयिष्ठं परिवारं च निर्मूलयितुमेव रामो दाशरथित्वेनाऽवतीर्णः। सागरो विघ्नीभवन् मध्ये तिष्ठतिस्म परन्तु सागरमात्रः। आराधितः सन् स मार्गादपसारयितव्यो भंवितुमर्हति ॥ नाति विलम्बः करणीय इति कृत्वा रामः क्रुदद्धवद् व्यवहरति स्म उद्दिष्टफलस्य प्राप्तिः सम्पन्ना भवति च । उचितं कर्मकरमुचिते कार्ये उपयुज्य तद् सुप्रख्यातः सेतुः दिनपञ्चकाभ्यन्तरार्न्निर्व्यूढः। विश्वकर्मणस्तनयो नल एवाऽस्मिन् कर्मणि प्रधानतया नियुक्तः।

अस्मिन्नेव समये नयतन्त्रज्ञरूपेणाऽपि रामेण कार्यनिर्वहणं कृतम्। शत्रोर्विद्विष्टा यः सख्यमासादयति स सर्वथा स्वागतार्ह एव, वञ्चकं विना। यथा नयतन्त्रज्ञेन नृपेण सैन्याधिपेन च करणीयं तथा रामोऽपि सुग्रीवादीन् तत्तदाभिमतं पृच्छति परन्त्वन्ते स्वविचारानुरोधेनैव कार्यनिर्वहणं करोति। हूनुमतोऽन्येभ्यश्च रामेणैषा सूचना प्राप्ता यद्विभीषणो निसर्गविष्णुभक्तिसम्पन्नः ॥ अस्मिन् न किञ्चिदस्वाभाविकं यत्स दशाननेन विद्विष्टो निष्कास्येत इति । यतो विभीषणो रामस्य पटंकुटीरे सन्निहितस्ततो रावणस्य सेनानिवेशनादिविषये सूचना उपलब्धुं चाराणां प्रेषणस्याऽवश्यकता न भवति। अपरं च रावणस्य स्पशानां शुकसारणप्रभृतीनां रामस्य शिबिरे स्वच्छातो यातायातानुमतिः प्रदत्ता येन ते प्रतिनिवृत्य रामस्य सैन्यप्राबल्यस्य विषये राक्षसेभ्य सूचनाः प्रदाय तेषां हृदये भयांकुरमुत्पाद्य मनोविभ्रान्तिं कर्तुं पारयेयुः।

इतःपरं रामः सर्वेषां कार्यजातानां नियन्त्रणं प्राप्य श्रीमत्वस्य परमां काष्ठामुपलभ्य स्थितः। परं च सुग्रीवस्यात्युत्साहभरितस्य साहसिकत्वं कर्म वानरभटेषु धैर्यं युद्धोद्यमे भूयसीं तृष्णां चोऽत्पादयामास यत्स कपिवर-स्त्रिकूटपर्वतशिखरोपर्युत्प्लुत्य रावणं तलाघातेन ताडयामास । यद्यपि रामस्तस्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साहसिककार्यं विमृश्य समुत्पत्यमानान्यनिष्टफलानि कथयन् तं चेतयामास तथाप्यात्मनः सहचराः कीदृशीं समग्रशक्तीं वहन्तीति परिपूर्णतया बोधति स्म । न केवलमेक आञ्जनेय एव अतिमानुषीं शक्तिं रामस्य परिवारेष्वावहतीति रावणोऽपि सम्यग् बुबोध । दौर्भाग्यवशान्मेघनादस्य मायासहकृतं छद्मकृत्यं रामे दुःखोत्पादकं वैपरीत्यमकरोत्. यतः भ्रात्रा सह रामोऽपि नागपाशेन बद्धोऽभवत्। अदृष्टवशाद्वैनतेय स्तत्रागत्य उभावपि नागपाशान्मोचितवान् एतेन यद्यप्यनुयायि वर्गेषु, रामस्य दिव्यत्वावबोधः समुत्पन्नो भवेत्तथापि रावणापेक्षया स्वप्रभावातिशयं प्रकटयितुं रामो न शशाकैव । स्वयं स किं किं कर्तुं प्रभावेदिति प्राकट्येन प्रदर्शयितुं समुचितः समयः समागतः । नागपाशबन्धनाद्विमोचान्तरं समुत्पन्न आयोधने स्वात्मना जय्यत्वस्य प्रकटावबोधं मित्रेभ्यो रिपुभ्यश्च तुल्यरूपेण जनयामास दाशरथिः। रावणेन सह जाते प्राथमिके द्वन्द्वयुद्धे त्रिभुवन विजेता राक्षसराजः पराजितो ऽवमतश्च बभूव । प्रतिनिवृत्य पुनः प्राप्तोत्साहो युद्धाय प्रत्यागच्छेति निर्दिश्य स विमुक्तः ।

अतः परं सर्वमप्युदर्कजाते सोढुं सज्जीभवन् राम एवममन्यत यत्सर्वस्याऽपि श्रियः श्रेयः स्वात्मन्येव न सीमितव्यमिति । वियजश्रीलालितत्वं प्राप्तुं कपिवरा अपि उत्कटेच्छव इत्येवं तथ्यं रामो जानाति स्म। अपरं च ते सर्वे राक्षसातिशायिप्रभावभूषिता इत्यपि न तस्य तिरोहितमासीत् यद्यपि कतिपये वानरातिशायी पराक्रमवन्त एव ॥ केवलं तेषां विषय एव रामेण वा भ्रात्रा वा शस्त्रग्रहणं कार्यम् ।

बृहच्छरीरस्य कुम्भकर्णस्य विषये हनुमान् अथवा सुग्रीवो न किमपि कर्तुमपारयत् तस्य कायस्य स्थूलत्वाद्धेतोः । सन्दर्भस्योपरि नियन्त्रणप्राप्तौ रामो भ्रात्रा सह तत्र समागतः । तत्कर्म रामस्य विषये केवलं बालक्रीडावत् सरलमासीत् । अतिकाय मेघनादश्च वानरापेक्षया महाप्रभावावास्तां न् तु स्वात्मसदृशस्य लक्ष्मणापेक्षया ।

यदा रावणस्य सर्वेऽपि बान्धवाः सचिवाः सैन्याधिपाश्च निरवशेषीकृतास्तदा रामो रावणेन सह साम्मुखीनं युद्धं कर्तुं निश्चयमकरोत् । तत्कर्मण्यन्यं कमपि नियोक्तुं नैच्छत, तस्य संहारः स्वयमेव कर्तव्य इती हेतोः । एतत्कार्य निर्वहणार्थमेव मनुष्यरूपेण कृतावतारः। रिपोः पराक्रमं रामः सम्यग् बहुमन्यते स्म इति हेतोः स सर्वदा सतर्कतां परिपालयामास। अन्तिमे युद्धे शक्रेण प्रेषितं सारथिं रथं च साहाय्येन स्वीकृते रामे न कापि विचिकित्सा आसीत् । तादृशस्य साहाय्यस्य स्वीकरणे महावीरस्याऽपि रामस्याभिमानविक्षतेः न कापि प्रसक्ति । आत्मानं प्रबलेन युद्धसन्नद्धेनातिमात्रं सज्जेन राक्षसराजेत सह युदध्यमानं मानुषमात्रममन्यत । तपस्वी अगस्त्यः उचितसमये समागत्याऽदित्यहृदयसंज्ञितं महामन्त्रं रामायोपदिष्टवान्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उभाभ्यामपि सम्यक् क्रियमाणं द्वन्द्वयुद्धं दीर्घकालव्यापि समभवत्। अन्ते चैतदर्थं राज्जीकृतेन दिव्यशरेण सीताहर्तारं त्रिलोककण्टकं दशवदनं रामो निपातयामास च।

निहतेन शत्रुणा सह रामस्य मनस्यणुमात्रमपि विद्वेषकालुष्यं न प्रावर्तत। दुष्टस्य स्वभ्रातुर्दाहसंस्कारादि कर्मणि विभीषणेन यदा वैमनस्यं प्रकटितं तदा रामस्तं सावमर्शमेवं कथितवान् यदवश्यकतायां संजातायां स स्वयमपि तत्क्रियाकलापं कर्तुं नैव विचिकित्सेत इतयुक्त्वा।

भ्रातृरुपो हि मे शत्रु-
रेष सर्वहिते रतः।
रावणो नार्हते पूजां
पूज्योऽपि गुरु गौरवात ॥
नृशंस इति मां राम
वक्ष्यन्ति मनुजा भुवि।
श्रुत्वा तस्यागुणान् सर्वे
वक्ष्यन्ति सुकृतं पुनः ॥
तच्छ्रुत्वा परमप्रीतो
रामो धर्म भृतां वरः
विभीषणमुवाचेदं
वाक्यज्ञं वाक्यकोविदः ॥
तवापि मे प्रियं कार्यं
त्वत्प्रभावान्मया जितम् ॥
अवश्यं तु क्षमं वाच्यो
मया त्वं राक्षसेश्वर ॥
अधर्मानृतसंयुक्तः
कामं त्वेष निशाचरः
तेजस्वी वलवाञ्छूरः
संग्रामेषु च नित्यशः ॥
शतक्रतुमुरवैर्देवैः
श्रूयते न पराजितः।
महात्मा बलसम्पन्नो
रावणो लोकरावणः ॥(यु-CXI-94-99)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मरणान्तमेव वैरमित्यादृशं सन्देश विशेषं भाविपौराणां विषये रामः प्रदत्तवान् ।

मरणान्तानि वैराणि
निर्वृत्तं न प्रयोजनम् ।
क्रियतामस्य संस्कारो
ममाप्येष यथा तथा ॥ (यु-CXI-100)

ताबद्राम आत्मनः श्लाघावति शोभनत्वस्त अत्युच्चतमां कोटिं समासंसादैव ।

सीताया अग्निप्रवेशपरीक्षारुपः सन्दर्भो नितरां चर्चाविषयोस्ति। एतावत्पर्यन्तकाले रामः सीतां द्रष्टुं तस्याः पुनः प्राप्तिं कर्तुमथवा तद्विषयिनीं सूचनां लब्धुं चातितरामुत्सुक आसीत् । आख्यायिकासु नायकाः शत्रुभ्यः त्राताः पत्नीः प्रति धावन्तः तत्प्राप्ति सन्तुष्टमानसाश्च भवन्ति। रामस्तादृशं प्रीति विशेषं न प्रकटीकृतवान्। धार्मिकी भावना तस्य मनसि विशेषतः प्रवर्तमाना समभवत् । अत्र समुत्पद्यमानः प्रश्नः एषः किं रामस्य मनसि वंशस्य कीर्तिविषयेऽथवा धर्मस्य स्थिरीकरणविषये वा कस्मिन्नधिकौत्सुक्यमासीदिति। एतं विषयं पश्चात् चर्चयिष्यामः। विभीषणस्य राज्याभिषेककर्मणः प्राथमिकत्वं प्रधानत्वं च तेन प्रदत्तं, न तु सीतासंबन्धिनो विषयस्य ॥ एतन्न विस्मर्तव्यं यत्पूर्वमेव कृताभिषेको राक्षसराजः केवलं प्रशासनारम्भ एवावशिष्टः । रामः सीतायाः सकाशं न गच्छति कुशलसूचनयाा सह हनूमन्तं प्रेषयति ।

किं वा रामस्य मनसि सीतायाः चारित्र्यशुद्धिमधिकृत्य सन्देहाविष्टमासीत्? अन्यथा हनूमते प्रदत्ता एते निर्देशाः कथंवा न्याय्यीक्रियेरन्?

अनुज्ञाप्य महाराज-
मिमं सौम्य विभीषणम् ।
प्रविश्य नगरीं लङ्कां
कौशलं ब्रूहि मैथिलीम् ॥

वैदेह्यै मां च कुशलं
सुग्रीवं च सलक्ष्मणम् ।
आचक्ष्व वदतां श्रेष्ठ
रावणं च हतं रणे ॥

प्रियमेतदिहाख्याहि
वैदाह्यास्त्वं हरीश्वर ।
प्रतिगृह्यतु संदेश
मुपावर्तितुमहसि ॥ (.यु-CXI-14-16)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्देहाविष्टमासीत् संभवतः किं वाऽत्र करणीयमितिविषये रामो विविध विचाराधीनं समवर्तत एतावति समये रावणवधानन्तरं किं वा करणीयमिति विषये तस्य मनो न प्रवर्तते स्म । कथं वा शत्रु समीपं प्राप्नुमः कथं वा तस्योन्मूलनं कुर्म इति चिन्तयन्नेवावर्तत किल । तस्मिन् कार्ये निर्व्यूढे अनन्तरकरणीयानि प्रति विचारः सञ्जातः सर्वमपि वस्तुजातं नूतनया दृष्ट्या अवलोकनीयमासीन् ।

कस्यचिन्निश्चयस्य सद्यः कृतस्याऽवश्यकताऽसन्ना । यद्यत् क्रियते तत्तत् नानासामाजिकस्तरवता जीवतामुपरिष्टात् नभसः प्रेक्ष्यमाणानां देवानां च समक्षमेव करणीयम् । धर्मस्योन्नतादर्शानां निदर्शभूतानामिक्ष्वाकुवंशस्थानां स प्रतिनिधिरासीत् । राक्षससमुदाये चारित्र्यादि विषय आचारविचारादिकमन्यदेव । कपीनां विषयेऽपि तथैव । भ्रातृप्रेमविषये पितुराज्ञानुरोधविषये च रामः स्वयमेव निदर्शनभूतः । सर्वेषामपि राक्षसानां वानराणां चेदं सम्यगवगतम् । इदानीं पतिरूपेण रामस्याचरणं प्रति सहानुभूतिरसन्दिग्धा । यदि सीता पत्नीत्वेन रामेण पुनर्गृहीता न कोपि विप्रतिपद्येत । तथापि रामस्य एष निश्चय आसीत् यत् स आदर्शनृपतित्वेन आदर्शमानवत्वेन च व्यवहारं कुर्यामिति ।

एकदा पुनरप्येतत्- विचिन्तयामः यद्वाल्मीकेः वर्णनामाधारं कृत्वा परिचिन्त्यमाने किं तदानीं रामस्य मनसि सीतायाश्चारित्र्यशुद्धिं प्रति कापि विचिकित्सा आसीत् ? केषांचिद्व्याख्याकाराणामायिप्रायेण रामस्य मनस्यवश्यमेवासीदितिभि प्रतिभाति । रामेणैतत् स्पष्टमेवोक्तं यद्रावणः स्वात्मनियन्त्रणे अशक्त एव स्यादिति ।

नहि त्वां रावणो दृष्ट्वा
दिव्यरूपां मनोहराम् ।
मर्षयेत चिरं सीते
स्वगृहे पर्यवस्थिताम् ।। (यु-115-24)

स्वगृहे पर्यवस्थितामिति विशेषणस्य विशेषतः काप्यभिसन्धिर्वर्तते किल । रामस्य मनसि सीतायाश्चारित्र्यशुद्धिमधिकृत्य न कदापि सन्देहो वर्तत इति मे सुदृढा मतिः । अग्निपरीक्षाया अनन्तरं इन्द्रं प्रति रामस्य वचनादुपरिष्टात् एतत् स्फुटं प्रतिभात्येव । रामस्यायं दृढो विश्वासः यत्त्रैलोक्येऽप्येकमात्रा निष्कलङ्का स्वात्मनः प्रेयसी सीता एवेति । तथापि परीक्षां विना यदि सीता पुनः स्वीक्रियते तर्हि लोकाभिमतः रामस्य प्रतिकूलः स्यात् अपि च रामं प्रत्यन्यथा चिन्तितमपि जनतामध्ये प्रचलेच्च । एनं विषयं सीतायै रामः पश्चात् स्पष्टीकृतवान् ।

बालिशो बत कामात्मा
रामो दशरथात्मजः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति वक्ष्यति मां लोको
जानकीमविशोध्य हि ॥ (यु-CXV-14)

अत्र रामः स्वात्मानं दशरथात्मजमिति वर्णयति ॥

सीता पवित्रा निष्कलङ्का चाऽसीदिति लोके सर्वत्र ख्यापयितुमेवैवमाचरतीति स्पष्टतया भाषते ।

प्रत्ययार्थं तु लोकानां
त्रयाणां सत्यसंश्रयः ।
उपेक्षे चापि वैदाहीं
प्रविशन्तीं हुताशनम् ॥ (यु-118-17)

स्वकीयाः पातिव्रत्यशुध्याः प्रभावेनैव सीता स्वत्मानं परिरक्षितुमवश्यमेव समर्था ।

इमामपि विशालाक्षीं
रक्षितां स्वेन तेजसा ।
रावणो नातिवर्तेत
वेलामिव महोदधिः ॥

न शक्तः स तु दुष्टात्मा
मनसापि हि मैथिलीम् ।
प्रधर्षयितुमप्राप्यां
दीप्तामग्निशिखामिव ॥ (यु -118-16,18)

समाजमध्ये पुरुषस्य स्त्रियश्च स्वभावशुद्धिमधिकृत्य जनसमुदाये मानदण्डद्वयं प्रावर्तत इति वाल्मीकिः व्यनक्ति । एतादृशो विमर्श उपाख्यानानां व्यैविध्ये रामायणे सर्वत्र दृश्यते । यदि कश्चन पुरुषः चारित्रशुद्ध्या व्यतिचलेत स केवलेन कुत्समात्रेण परिमुच्येत । कदाचिन्मनो नियन्त्रणां दुश्शकमेवेति तात्विक टिप्पण्यासाकं तस्यापराधं विस्मरेयुः । यदि केचित् रेणुका अथवाऽहल्या तादृशे विषमघट्टे निपतेत् तर्हि तस्याः शिरच्छेदोऽथवा शिलारूपेण परिवर्तनो वा दण्डरूपेण प्राप्तं स्यात् । यत्सीता वर्षपर्यन्तस्य वन्घनस्यानन्तरं पत्नीत्वेन स्वीक्रियेत जनः मुखं परावृत्य प्रतिषेधमस्वीकारं वा स्फुटीकुर्युः । एतदेव वाल्मीकिनाऽनेन कथासन्दर्भेन विवक्षितं कृतम् ।

अवश्यमेव रामस्य मनसि कर्तव्यव्यामोहलेशः कदाचिदभूत् । भूयांसः तस्य शब्दाः परुषतरा आसन् तस्य प्रख्याते दाक्षिण्य विषये दुर्घटाः नात्यनुकूलाश्च । यदि मानवे मानसिकसंतुलनं भ्रश्येत्तर्हि स कथं वा व्यवहरेदित्यमुं स्पष्टीकर्तुमेव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यवस्यति वाल्मीकिः। तादृशो नरो वाग्व्यवहार आचरणे च सीमानमतीत्य क्रियां कुर्यात्। एतदेव रामस्य विषयेऽपि समभवत्। दुर्विचारकलुषात्रतिकूलरसनादिक्ष्वाकुवंशस्य पवित्रं यशः परिरक्षणीयमिति यद्रामेण विवक्षितमासीत् तदेव सौकुमार्येण नाऽविष्करोति रामः। कस्मिंश्चिदाश्रमे व्रतानुष्ठानं कर्तुं सीतामुपदेष्टुं, स शक्त आसीत्। प्रत्युत परगृहोषितां पत्नीं कुलीनः न कोऽपि स्वीकुर्यादिति परुषतरमेष वदति॥ मानकाङ्क्षी स रावणं हत्वा कलङ्कं परिमार्ष्टि।

यत् कर्तव्यं मनुष्येण
धर्षणां प्रतिमार्जता।
तत् कृतं रावणं हत्वा
मयेदं मानकाङ्क्षिणा॥
विदितश्चास्तु भद्रं ते
योऽयं रणपरिश्रमः।
सुतीर्णः सुहृदां वीर्या
न्त्वदर्थं मया कृतः॥
रक्षता तु मया वृत्त-
मपवादं च सर्वतः।
प्रख्यातस्यात्मवंशस्य
न्यङ्गं च परिमार्जता॥ (यु-CXV-13, 15, 16)

तया न किमपि कार्यमित्यपि निर्दयमुक्त्वा यथेच्छं कुत्रापि गच्छेति वदति च

तद् गच्छत्वानुजानेऽद्य
यथेष्टं जनकात्मजे।
एता दश दिशो भद्रे
कार्यमस्ति न मे त्वया॥
कः पुमांस्तु कुले जातः
स्त्रियं परगृहोषिताम्।
तेजस्वी पुनरादद्यात्
सुहृल्लोभेन चेतसा॥
रावणाङ्कपरिक्लिष्टां
दृष्टां दुष्टेन चक्षुषा।
कथं त्वां पुनरादद्यात्
कुलं व्यपदिशन्महत्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदर्थं निर्जिता मे त्वं
सोऽय मासादितो मया ।
नास्ति मेत्वय्यभिष्वङ्गो
यथेष्टं गम्यतामिति ॥

तदद्य व्याहृतं भद्रे
मयैतत् कृतबुद्धिना ।
लक्ष्मणे वाथ भरते
कुरु बुद्धिं यथासुखं ।
शत्रुघ्ने वाथ सुग्रीवे
राक्षसे वा विभीषणे ।
निवेशय मनः सीते ।
यथा वा सुखेमात्मना ॥ (यु-115-19-23)

नेत्रातुरस्य दीप इव सीताया दर्शने तस्य प्रतिकूलमभवत् ।

प्राप्तचारित्रसंदेहा
मम प्रतिमुखं स्थिता ।
दीपो नेत्रातुरस्येव
प्रतिकूलासि मे दृढ़ा ॥ (यु-116-17)

एवं वदता रामेण सीता दीपशिखेव निष्कल्मषा अपि नेत्रातुरस्यारुन्तुदेति सीतायाः स्वभावशुद्धिः सूचिता भवेत् । कालिदासस्य रघुवंशे लक्ष्मणं प्रत्येवं वदता रामेणैष विषयः सुस्पष्टीकृतः ।

अवैमि चैनामनघेति किन्तु
लोकापवादो बलवान् मतो मे ।
छाया हि भूमेः शशिनो मलत्वे-
नारोपिता शुद्धिमतः प्रजाभिः ॥ (रघु - 14-40)

दौर्भाग्यवशतो रामः स्वात्मानं चिन्तादुर्विदग्धेन साधारणमानवेनाऽभिन्नं कुरुते ॥

श्रियोऽत्युन्नतां कोटिमवाप्याऽपि रामो मानव एवेति वाल्मीकेरभिप्राय आसीद्वा ? धर्माभिसन्धिरिक्ष्वाकुवंशस्य पवित्रं यश इति द्वयोर्विषये रामस्य मनसि व्यामोहलेशः समजायत वा ? इक्षवाकूणां यशः परिरक्षणविषये रामः सदैव सतर्कः सचेतनश्चाऽसीत् । यशोधनानां यशः गरीयत्वमप्रतिषेध्यं कालिदासेनाप्येतदुक्तम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निश्चित्य चानन्य निवृत्ति वाच्यं
त्यागेन पत्न्याः परिमार्ष्टुमैच्छात् ।
अपि स्व देहात्किमुतेन्द्रियार्थात्
यशोधनानां हि यशो गरीयः ॥ (र. रं. XIV-35)

अस्मिन् सन्दर्भे न कोप्येतद्वक्तुं पारयेद्यत् सीतायाः परित्यागे रामो धर्मदार्ढ्यं प्रकाशयतीति । प्रत्युत वानराणां राक्षसाणामितरेषां च साम्मुख्ये सीतां पीडाधिक्य-विधेयां कुरुते । स्वकीयमिक्ष्वाकूणां च यश एव रामस्य चिन्ताकुलत्वे विषयो भवति ॥ अस्मिन् कार्ये विनिगमना स्वीकृतिः यशस आसीत् न तु धर्मस्य ।

पश्चात्संभूतेन कार्यजातविकासेन रामस्योद्देश्यः परिपावनमुदात्तं चाऽसीदिति वाल्मीकिना स्पष्टीकृतम् । आत्मनः प्रेयसी स्वयमुदात्तत्वेनात्युत्कृष्टेति रामो जानात्येव । अग्निपरीक्षायां कृतायां तस्याः न कापि हानिः स्यादिति च जानाति स्म । अग्नेरपि पवित्रतरा सा ।

स्वस्य क्रियाविशेषे सीताया मनस्यपि न किमप्यन्यथाचिन्तितमवशिष्टं स्यादित्यपि रामोऽजानात् । तस्या यशसः परिरक्षणार्थमेव तेनेदमनुष्ठितं । दशरथः सीतां प्रत्येवं विशिष्य प्रतिबोधयति यत् सीताहितैषिणैव रामेणैवं कृतं अतः रामे मन्युः न कर्तव्य इति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥रामस्य युद्धनयः तत्ररावणस्य प्रतिकरणं च ॥

त्रैलोक्यकण्टकं रावणं 'सपुत्रपौत्रं सामात्यं समन्त्रिज्ञातिबान्धवं उत्मूलयितुमेव दाशरथित्वेन कृतावतारः किल विष्णुः॥ हिरण्यकशिपुहिरण्याक्षयोर्विषये भगवतः केवलमेकस्य धर्मद्वेषिणो वधार्थमेवावतारः समभवत्। न तादृशो रावणस्य विषये। अत्र पुनर्दुराचारो न केवलमगाधरूढमूलः अपि तु सर्वत्र व्याप्तस्तस्य दुष्प्रभावः। पापस्य बलीयसः समष्टिसमुच्छेद एव भगवता समायोजित। एवं तेन देवेभ्यः प्रतिश्रुतम्।

भयं त्यजस्व भद्रं वो
हितार्थं युधि रावणम्।
सपुत्रपुत्रं सामात्यं
समत्रिज्ञातिबान्धवम्॥

हत्वा क्रूरं दुराधर्षं
देवर्षीणां भयावहम्।
दशवसहस्राणि
दशवर्षशतानि च॥

वत्स्यामि मानुषे लोके
पालयन् पृथिवीमिमाम्। (बा- XV-28-29)

अद्भुतावहं कञ्चन कर्मविशेषं निर्वर्त्य स्वकीयं धाम पुनः प्राप्स्यामि इति सीमिता प्रतिज्ञा नासीद् देवस्य । दुष्कृतां विनाशानन्तरं शिष्टजनपरिपालनेऽपि कृतमतिरासीत् स भगवान् । दशवर्षसहस्राधिकं कालं प्रजापालनमपि करिष्यन्नासीत् सः॥ मानवीयायाः श्रेयः प्राप्तेः कृते कतिपयान् मानदण्डविशेषान् परिकल्पयितुं च भगवता सङ्कल्पः कृतः। अत्युच्यत्वेऽपि तेषामादर्शानां मानवसाध्यत्वं न परिहीयते। तस्मादेव कारणात् समुच्छेदकसमरार्थं प्रयुज्यमानेन नयेन मानवीयेनैव भवितव्यम्॥

ताटकया सह संघर्षात् समारभ्य दशाननवधे समाप्यमानः समरः षड्विंशतिवर्षव्याप्यासीत्। यदा अवियुज्यमानेन स्वभ्रात्रा सह रामो विश्वामित्रमनुगम्य वनाय प्रस्थितस्तदा रावणेन तस्य दौरात्म्यभूयिष्ठानुयायिभिश्च साकं क्रियमाणस्य संघर्षस्य प्राथमिकं पदं तेन विन्यस्तम्। यागविघ्नानि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रावणप्रेरितैस्तस्य ज्ञातिबाघ्नवैः क्रियमाणान्यासाान्निति विश्वामित्रेण स्पष्टतयोपन्यस्तमासीत्। यदि रामेण युद्धाह्वानं स्वीकार्यमिति निर्णयः कृतः तर्हि वस्तुतो रावण एव शरव्यः कृतः॥ सन्दर्भविशेषैः सह नापरिचितः स तपस्वी। तस्मादेव कारणात् कमप्यापद्विशेषं सफलं प्रतिकारयितुमावश्यकानि औपयिकानि रामाय प्रदातुं ऋषिणा संकल्पः कृतः। यथा वा घटना संजाताः रावणेन रामकृतं युद्धाह्वानं सद्यो न स्वीकृतम्। संघर्षं ठगायितुमेव निर्णयं कृतवान् रावणः।

अत्रैतदवधेयं-किं वा रामः सन्दर्भानुगुण्येन शत्रुभिः सह यथायथमयुद्ध्यत अथवा सुसम्पन्ने दुर्गे सम्यगवस्थितेन शत्रुणा सह समरं कर्तुं समुचितमावश्यकं च युद्धनयमुपकल्प्य तदनुसारेण प्रवर्तते स्मेऽति॥ कैश्चित् पराक्रमशालिभिः शत्रुभिः सह यदाकदा रामेण समरः करणीय आसीदिति तथ्यम्। किन्तु तेन सुनिर्णितः कश्चन समरनयः विशेषतोऽन्तिमघट्टे समायोजित एवेति विषयं कविपुंगवो वाल्मीरस्माकं पुरत उपन्यसत्येव। रामस्य बहिश्चराः प्राणा इत्यसकृद्वर्णितः सौमित्रिः अवश्यमेव तं नयमजानात् तदनुसारेण स्वात्मनो भूमिकां निसर्गत उपाकल्पयच्चेति वक्तव्यम् यदा यदा वा तस्य नयस्य परिपोषः समभवत्तदा सा परिपुष्टिस्तस्यावश्यं प्रत्यानुभवदिति च मन्तव्यंम्।

प्राथमिके संघट्टने मारीच एव क्षमाप्रदानेन रामेण विमुक्तः न पुनः सुबाहुरन्येऽनुचराश्च। कदाचिदेवं प्रत्युद्येत मारीचः सम्पूर्णतया दुरात्मा नासीत् तस्य संशोधनं कर्तुं पार्यत इति रामेण विचारः कृतः स्यात्। तस्मादेव कारणात् मानवास्त्रं प्रयुज्य स केवलं समुद्रान्तः प्रक्षिप्तः।

सुबाहुमारीचयोर्मध्ये रामेण विनिगमना विचारः कृत इति न मे प्रतिभाति। दुरात्मनोऽनुयायिन उन्मूलयन् एकं नेतारं जघान अन्यं च क्षमां प्रदाय [illegible]मोचितवान्। असन्दिग्धमेतेन व्यवहारेण सन्देशद्वितयं राक्षसनेतृसकाशं विशेषतो रावणाय प्रेषितम्। सुचिरं धर्मस्य परिरक्षकत्वेन स्थितवन्त इक्ष्वाकवः नातः परमनीतिमधर्मं वा मर्षयेयुः। स्वात्मनः संशोधनं कुरुध्वं नो चेद्विनाशं प्राप्नुत। सत्पथं स्वीकुर्वतां सकरूणो व्यवहारः, सन्देशमश्रृण्वतां मृत्युदण्डश्चेति तस्य सन्देशस्याभिसन्धिः।

मारीचो रावणस्य मातुल आसीत्। तेन कारणेन रामप्रेषितः सन्देशः राक्षसराजनिकटं अवश्यमेव तेन प्रापयितव्य इति किमर्थं वयं प्रतीक्षां न कुर्महे? कश्चन शत्रुः स्वस्यानुयायिनो निजघान मातुलं समुद्रे पातयामास च स्वेन दूयमानानां तपोधनानामभयं प्रादाच्च एतादृशमुत्तेजनं प्राप्य तेन राक्षसराजेन युद्धरङ्गे पदन्यासः किं न करणीय आसीत्? किन्तु यथा वयं पश्चाद्रक्ष्यामः रावणो धात्वन्तरविनिर्मित इति मन्तव्यम्। रामेण प्रेषितं युद्धाह्वानं न श्रृणुयामित्येव तेन निर्णीतं यद्यपि तथाकरणेन समस्ते त्रैलक्यो जाज्वल्यमाने स्वकीर्तितेजसि कलङ्कोऽभविष्यत्। यदि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रावणेन नैसर्गिकः पन्थाः स्वीकृतोऽभविष्यद्रामोऽपि तदर्थं सन्नद्धोऽभविष्यत् । तथा कृते सति रामेण स्वस्मिन्नेव क्षेत्रे स्वकीयैः सैन्यैः भ्रातृभिश्च सहायभूतैः कृतोऽभविष्यत् ।

राक्षसराजस्य समर्थका एवं वादमुपस्थापयेयुः रावणस्य दृष्टौ मानवाः कीटसदृशा एवाभवन् । रामस्य विक्रमातिशयं कृमिव्यवहारवदेवावहेलना विषयं कृतवान् राक्षसराज इति। परिवाराणां समुच्छेदस्य मारीचे निहितस्य दण्डस्य चानन्तरमेताहशस्य वादस्योपनिबन्धनं श्रद्धां न जनयेत् ।

महेशचापस्य भङ्गो भार्गवरामस्य प्रह्वीकरणं च रामस्य व्यक्तिनिष्ठौ विक्रमातिशयावेव। तदनन्तरं द्वादशवर्षाणि व्यतीतानि यदा द्वावपि भ्रातरौ युद्धविषये न किमपि कृतवन्तौ । अनुपदं च तयोर्विराधेन सह दण्डकारण्ये संघर्षः समजनि। बृहदाकारः स राक्षस आयुधैरव्रणितव्योऽजय्यश्चासीत् । अस्य कथानिकस्य प्राथमिके घट्टे रामस्य व्यवहारो न योधश्लाधनीय आसीत्। आत्मविश्वासेन साकं करणानां यथावदुपयोगक्षमत्वं च कश्चित्कालं तस्य लुप्तमासीत् । अवश्यमेव स सद्यः स्वात्मानं पुनः प्राप्नोति प्रत्ययस्थैर्यं च लभते । ततः परं विजयप्राप्तौ न कोपि श्रम आसीत् ।

एतावत्कालं केवलं यादृच्छिकाः संघर्षा एव समजायन्त । रावणभगिन्याः शूर्पणखायाः विरूपीकरणेनात्याचारिभिःशत्रुभिः सह क्रियमाणे संघर्षस्यान्तिमे घट्टे सः स्वयमागच्छतीति रामेणावश्यं विदितमासीत् । स च संग्रामः प्राकारादिभिररक्षिते अनावृते विशालेऽरण्य एव समजनि। भ्रात्रोरुपरि भारान्तरस्य वहनस्याप्यावश्यकता बभूव। तुमुलयुद्धवेलायां जनकात्मजायाः परिरक्षणमपि करणीयमासीत् । समरे कामपि नियमाचारसंहितामस्वीकुर्वन्त आसन् नक्तञ्चराः ।

प्रथमं यदा केवलं चतुर्दशसंख्याताः राक्षसा एव युद्धाय समागच्छन् तदा सीतां प्रत्यनन्तरं भावितुं लक्ष्मणं नियुयोज स्वयं युद्धोद्यतोऽभवच्च-

मुहूर्तं भव सौमित्रे
सीतायाः प्रत्यनन्तरः ।
इमानस्या वधिष्यामि
पदवीमागतानिह (आ- XX-4)

लक्ष्मण आदेशानुरोधमेव सद्यो बभूव। भ्रातुः समरचातुरी लक्ष्मणेन नाऽविदिता । अपि चाऽवश्यकतायां सत्यां भ्रातृसाहाय्यार्थं समीपे एवावर्तत ।

यदा पराक्रमशालिना त्रिशिरसा दूषणेन च सह चतुर्दशसहस्रसंवितान् सैनिकानादाय खरो युद्धभूमिं समुपाजगाम तदा स्थितेः गौरवं क्लिष्टं च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समवर्धयताम् । सा च सेना इतस्ततः समाहृतैः कतिपयैर्भटैः रूपवत्कृता नाऽसीत् । सर्वेऽपि संग्रामेषु चतुराः प्रदर्शितपराक्रमाश्च बभूवुरेव । सैन्याधिपोः दूषणः उत्कृष्टानेव राक्षसप्रवरान् सैन्ये समाजयस्वेति खरेणाऽदिष्ट आसीत् ।

चतुर्दशसहस्राणि
मम चिन्तानुवर्तिनाम् ।
रक्षसां भीमवेगानां
समरेष्वनिवर्तिनाम् ॥
नीलजीमूतवर्णानां
लोकहिंसाविहारिणाम् ।
सर्वोद्योगमुदीर्णानां
रक्षसां सौम्य कारय ॥ (आ- XXII-8, 9)

खरः स्वयमेव सेनामुखे शत्रू दण्डयितुं कृतनिश्चयः सन् समातिष्ठत ।

एतस्मिन्नन्तरे रामस्य सतर्कता समग्रा समदृश्यत । दुष्टानां रिपूणां विनाशं सूचयन्ति शकुनानि सुव्यक्तान्यभवत् । अत्र युद्धे निरतानां सैनिकानामविशङ्कित स्थैर्यस्यात्यन्तावश्यकतां प्रति वाल्मीकिः विशेषतोपवर्णयति । आत्मविश्वासेन परिपुष्टायां मनोभावनायां परिनिष्ठितो रामः भ्रातुर्मुखमुत्साहपरिमण्डितमपश्यत् । युद्धसमये आसन्ने अनुत्साहवतस्य सौनिकस्य प्रयत्नाः विफला अवश्यं भवेयुरिति रामो विशदीकरोति ।

संन्निकर्षे तु नः शूर
जयं शत्रोः पराजयम् ॥
सुप्रभं च प्रसन्नं च
तव वक्त्रं हि लक्ष्यते ॥
उद्यतानां हि युद्धार्थे
येषां भवति लक्ष्मण ।
निष्प्रभं वदनं तेषां
भवत्यायुः परिक्षयः ॥ (आ- XXIV - 8, 9)

अस्यां वेलायां रामः कार्यगौरवं न विस्मृतवान् । उपागच्छतः सैन्यस्य तीव्रं निर्घोषं श्रुत्वा किं वाऽत्र भविष्यतीति सम्यगेव परिज्ञातवान् रामः । सर्वप्रथमं प्रियपत्न्याः सुरक्षिततत्वे एव स दत्तचित्तः । कस्यांचित् पर्वतगुहायां सुरक्षार्थं सीतां नयेति लक्ष्मणं निर्बबन्ध च ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्माद् गृहीत्वा वैदेहीं
शरपाणिधनुर्धरः।
गुहामाश्रय शैलस्य
दुर्गां पादपसंकुलाम्। (आ- XXIV -12)

एतस्मिन् कार्ये निपीते सति रामः समराय सज्जीभवति स्म। कवचेन परिभूषितः अधिज्यं धनुरादाय प्रातुर्भवन् रामो दिवि तिष्ठतां देवानमभिनन्दनं प्राप।

तं दृष्ट्वा तेजसाऽविष्टं
प्राव्यथन् वनदेवताः।
तस्य रूष्टस्य रूपं तु
रामस्य ददृशे तदा।
दक्षस्येव क्रतुं हन्तु-
मुद्यतस्य पिनाकिनः। (आ-XXIV -35)

कालिदासेन रामस्य पराक्रमशालिनः पूर्वजस्य रघोः ईदृशमेव वर्णनं कृतं।

स एवमुक्त्वा मघवन्तमुन्मुखः
करिष्यमाणस्सशरं शरासनम्।
अतिष्ठदालीढविशेषशोभिना
वपुः प्रकर्षेण विडम्बितेश्वरः। (र. वं.-III-52)

नक्तञ्चराः सहस्रश एकाकिनो रामस्योपरि निपेतुरायुधवृष्टींश्च चक्रुः। रामोपि सहस्रशः शरान् प्रक्षिपन् तैः प्रत्ययुदध्यत। शत्रुभिर्भीकरत्वेन दृश्यमानः स ईषदपि स्तोकं न प्राप। कियतीं शक्तिमुपयुज्यामिति रामेण प्रागेव कदाचिन्निर्णीतम् रामबाणैरद्भुतं कर्म कृतमिति वाल्मीकिना वर्ण्यते किन्तु चतुर्दशसहस्रैः नक्तञ्चरैः परिभूयमानत्वेऽपि रामेण अमोघानां दिव्यायुधानां ग्रहणं न कृतम्।

इतरान् निरवशेषान् कृत्वा रामः खरेण सह द्वन्द्वयुदधे समलग्नः समभवत्। खरेण खण्डशीकृतं चापं परित्यज्य अगस्त्य मुनिना प्रदत्तं वैष्णवचापं राम आदत्ते स्म। एतावत्कालमपि तस्य दिव्यचापस्य ग्रहणमावश्यकं नाऽमन्यत राम इति सुस्पष्टं भाति।

यदा जटायुषो वचनेन सीता रावणेनापहृतेति रामेण ज्ञातं तथा तेन दक्षिणस्यां दिशि गन्तव्यमासीत्। सा लंङ्कायामेव बन्दीकृता तिष्ठतीति तेन निगमनं न कर्तव्यमासीत्। तां गूहयितुं प्रभावशालिनो राक्षसस्य सकाशे समग्रमपि त्रैलोक्यं यथातथमवस्थितमासीत्। सीतां परित्रातुं कुत्र वा सा समुपगूहितेति निश्चित्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञातव्यमासीत्। रावणस्य तथा तस्य निकेतनस्य सैन्यबलस्य रूपधेयस्य च विषये नातिमात्रं रामेण विदितमासीत्।

राष्ट्रतन्त्रे सर्वसम्मतत्वेन स्वीकृतमेतत्तथ्यं यत् शासकः सुहृदां संप्राप्त्या शत्रूणां दौर्बल्यकरणेन च निपुणः शक्तिशाली भवति। एतावदवधि रामस्य न किमपि मित्रं वा लक्ष्मणादन्यः सहयोगी वा आसीत्। दनोः सकाशात् सुग्रीवविषयं श्रुत्वा रामः प्रथमतः कस्यचित् सुहृदो मार्गणं कर्तुं प्राययत। स च कपिराजः दयावानुदारचित्तो बलिष्ठ श्चासीत्। समस्ते त्रैलोक्ये तेनाऽविदितं स्थानं न किमप्यासीत्। अभ्यर्थीभवन् कस्यचित् सकाशमिदंप्रथमतयैव राम उपगच्छति स्म। पश्चाद्वालिना एषः प्रश्नः उन्नीतः किं वा स्वस्योपसर्पणमेव रामस्योपयुक्ततरं नाऽभविष्यत्? किन्तु अधर्मिष्ठेन सह मैत्री रामेण न कदापि कार्या। रामो विग्रहवान् धर्म इति प्रवादः खलु। अपरं च सुग्रीवस्य कस्यचित् मित्रस्याऽवश्यकता प्रादुर्भूता। स्वात्माभिमाने संचिन्त्यमाने सुग्रीवेण सह सख्यमेव रामेण विधातव्यं यतः तस्मै प्रभूतं दातुं समर्थः सः। रामेण सुग्रीवस्य सुरक्षितत्वं किष्किन्धायाः सिंहासनं च प्रतिश्रुतम्। वालिनः सम्मुखे स केवलमभ्यर्थी एवाभविष्यत्। राष्ट्रतन्त्रे एष एव श्लाघनीयो नयः यदूनेन सह मैत्री क्रियते नत्वधिकेन दुराभिमनिना सह।

महासत्वः स्वभ्राता यानि यानि दुःखान्यन्वभवत् तेषां सर्वेषामाञ्जनेय समकाशे कथनं लक्ष्मणाय नितरां क्लेशावहमभवत्। तद्वत् लक्ष्मणः कपिश्रेष्ठाय एतदपि स्पष्टीकृतवान् यदुदारचित्तो रामः परेषु प्रसाददृष्टीः चकार किन्तु अधुनैव विषादग्रस्तः सन् वैवश्यमनुभवति स्म। औपचारिकरीत्या लक्ष्मणे नैतदपि व्यक्तं क्रियते स्म यत्तस्य भ्राता अभ्यर्थीभूत्वा सुग्रीवस्य सकाशमुपगत इति-

यस्य प्रसादे सततं
प्रसीदेयुरिमाः प्रजाः।
स रामो वानरेन्द्रस्य
प्रसादमभिकाक्षंते।

येन सर्वगुणोपेताः
पृथिव्यां सर्वपार्थिवाः।
मानिताः सततं राज्ञा
सदा दशरथेन वै॥

तस्यायं पूर्वजः पुत्र-
स्त्रिषु लोकेषु विश्रुतः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुग्रीवं वानरेन्द्रं तु
रामः शरणमागतः ॥
शोकाभि भूते रामे तु
शोकार्ते शरणं गते ।
कर्तुमर्हति सुग्रीवः
प्रसादं सह यूथपैः ॥ (कि- IV-21-24)

रामोपि स्वयं सुग्रीवेण सह सख्यं बह्वमन्यत। यतो राम उदात्तशील उदारमनाश्च सर्वदैवाभवत्ततस्तेन कर्तव्यंनिबन्धनं सर्वं प्रथमत एव कर्तुं सन्नद्रोऽभवत्। अत्र कारणद्वयमासीत्। सुग्रीवाभिषेकद्वारा किष्किन्धाया उपलभ्यमानं सर्वमप्युपकरणजातमनायासेनैव रामस्य प्राप्तं भवेत्। सीतान्वेषणार्थमेतत्सर्वमत्यन्तापेक्षितं किल। अपरं च सुग्रीव एव कृतज्ञतानिबद्धः प्रथमतः कार्य इति रामेणाऽमन्यत न त्वितरतः। सन्दर्भवशात् बालिनो विषये धर्मपथात् व्यतिचलितुं निर्बन्धो रामस्य संज्ञातः।

वालिनो वधानन्तरं वर्षाकालावसानपर्यन्तं प्रतीक्षां कर्तुं रामो निर्बन्धितः। अवश्यमेव रामेणाऽशापूर्वं प्रतीक्षा कृता। किन्तु पश्चात् सुग्रीवस्य औदासीन्यं प्रति रामस्य शङ्का समुत्पन्ना लक्ष्मणं संप्रेष्य सुग्रीवस्य मनसि भीतिरपि समुत्पादयिव्येति रामेण निर्णयः कृतः। एतस्याऽभिमतः उद्दिष्टं फलं समुपलब्धम्। सुग्रीवोत्यन्तं त्रस्तोऽभवत्तदनन्तरं रामे दृढभक्तिरपि तस्य संजातः। प्रत्युत यदाकदाचिदत्युत्साहं प्रदर्शयन् साहसिकमपि स प्रदर्शयामास। सर्वप्रथमं सुग्रीव एव रावणेन सह द्वन्द्वयुद्धाय प्रावर्तत।

रामेण गंम्भीरेण रत्नाकरेण कृतस्य विघ्नस्याभिमुख्यं कर्तव्यमित्यपरो निबन्धः संज्ञातः। यत् सत्यं अपारः पारावारः गोष्पदवदाञ्जेनेयेनोल्लंघितः। किन्तु अपरे कथं वा सागरस्य तरणं कुर्युरिति चिन्ताव्याकुलः सञ्जातो। रामः रामस्य पुरतश्चअपरोऽपि प्रश्नः समुपस्थितः यच्छत्रोर्बलाबले प्रति सुनिर्णीतं परिज्ञेयमासीत्। त्वरितत्वरितं समवलोक्य मारूतनिा दशाननस्य दुर्गादिसन्निवेशं प्रति किंचित् द्विज्ञातमासीत्। किन्तु तादृशमवलोकन केवलमेकेनं दिनेन समधिगतमासीत्। सेतुबन्धनरूपस्य प्रश्नस्य समाधानोपलब्धेः पूर्वमेवाऽप्रतीक्षित विधया व्यक्त्यन्तरसकाशात् रामेण प्राप्यत। भृत्युभीषण्याऽधिक्षेपेन चासकृदभिभूते भूत्वाऽन्ते दशाननेन राष्ट्राद् बहिः निष्कासितः सन् विभीषण स्त्रैलोक्यैकपरित्रातारं रामं शरणमुपागमत्। विभीषणेन पार्श्वस्थेन रामो न केवलं शत्रोर्बलाबले अपि तु सर्वमप्याभ्यन्तरं रहस्यं सैन्याधिसन्निवेशवैदग्ध्यं च समग्रतया विदितं चकार।सर्वप्रथममेव विभीषणस्य लङ्काधिपतित्वेनाभिषेचन प्रक्रियापि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राष्ट्रनयसम्बन्धिनी विशिष्टा क्रिया समभवत् । ततः परं विभीषणस्य स्वामिभक्तिं प्रति सन्देहकणिकाऽपि न करणीया । रावणनिकटं प्रति विभीषणस्य पुनर्गमनमसंभाव्यं तस्य मृत्यौ रामस्येव विभीषणस्यापि औन्मुख्यं समानम् । रावणप्रेषितैश्चारैः कृतं सर्वं प्रयत्नं विफलीकर्तुमपि विभीषणस्य साहाय्यं रामेण समधिगतमेव । वस्तुतः शुकसारणयोः स्वादिष्ठफलप्राप्त्यर्थं रामः परिपूर्णतया उपयुङ्क्ते । रामस्य वानराणां च प्रभावाधिक्यसन्देशं रावणनिकटं प्रेषयितुं तावेवोपयुङ्क्वान् रामः । एतच्च रावणस्य सैन्याधिपेषु कम्पितत्वं जनयेत् । यद्यपि स्वयं रावणे तद् भवेत् न वा । ईषद् कोपप्रदर्शनेनातिमात्रं प्रकम्पितस्य समुद्राधिपस्य साहाय्येन सेतुबन्धः कृतः वानराश्च रामलक्ष्मणाभ्यां सहिताः समुद्रं तीर्णवन्तः ।

लङ्कायां निहितपादो रामः मनक्षोभराहित्यस्य स्थैर्यस्य च सविग्रहं रूपमिव समतिष्ठत् । आसन्नस्य युद्धस्य विषये रामस्य स्वकीय एव नयतन्त्रविशेषः सुसज्ज आसीत् । नैष सन्दर्भः केवलं व्यक्तिगतविक्रमातिशस्य प्रदर्शनाय । महता सैन्येन साकं तत्र समागतः सः तस्य समग्रतया उपयोगमवश्यमेव कुर्यात् । सुग्रीवो वानराणां प्रमुखो राजा च । सैन्याधिपस्य कस्यचिन्नामनिर्देशः कार्यमासीत् । अग्निपुत्रं पराक्रमशालिनं नीलं तत्पदवीस्थं रामश्चकार । स्वेन सह संघर्षाय समुपस्थितं सुविस्तृतं सैन्यं कम्पितहृदयो रावणः समुदैक्षत । शत्रूणां तेषां नेतृवृन्दानाञ्च विक्रमातिशयं प्रति विस्तरशो वर्णयतां स्वभृत्यानां वाचालतया नाति प्रीतो रावणः तथापि तथ्यं सर्वैः सम्यग् विदितम् । प्रभूतेषु वानरवीरेषु केवलमन्यतम एवासीत् सुग्रीवानुचरो मारूतिः । एकेन हनूमता दिनार्धेन सम्यग् प्रकम्पिता लङ्कापुरी सैन्यस्य पादसम्मितो भागो ध्वस्तश्च ।

त्रिकूटोपर्युत्प्लुत्य रावणेन सह मुष्टियुद्धं चकार सुग्रीवः । तेन सर्वेषामपि मानसीकोल्लासः संञ्जातः । कैलासोद्धारकोदशवदनोऽस्मिन् द्वन्दयुद्धे न पर्याप्तं प्रशस्यं कार्यं कृतवान् । तथापि रामः तादृशं साहसिकं कर्म प्रतिषिद्धवान् । कदाचित् बन्दी भवतः सुग्रीवस्य पुनरादानरूपं प्रश्नं सम्मुखे उपस्थापयितुं रामो नैच्छत् । सुग्रीवो वानराणां राजा आसीत् किल । तादृशेन कार्यघटनेन राक्षसानां प्रीत्याधिक्यमवश्यमेव भवेत् । पश्चाद्यदा सुग्रीवो युदधे निपातितः तदा तं बन्दीग्राहं रावणनिकटं प्रापयितुमियेष कुम्भकर्णः । तादृशं कार्यं रामं धर्मसङ्कट आनयेन्नाम । सुग्रीवरावणयोर्द्वन्द्वयुद्धं वानराणां हृदये नितरामुत्साहं जनयितुं सुक्ष्मो हेतुः समबर्तत ।

युद्धस्य प्राथमिको घट्टो विपदंविशिषे पर्यवसितः । प्रथमं तावद्वानराणां विजयस्य सूचना यद्यपि समभवत् तथापि मेघनाद उभावपि भ्रातरौ नागपाशबद्धावकरोत् । एषः रामस्य सैनिकैरशनिपात सदृश अमन्यत ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाग्यवशाद्विष्णोर्वाहनभूतो पक्षिराजस्तत्र समागत्य रामलक्ष्मणौ नागपाशविमुक्तावकरोत्।

नागपाशेन बन्धनरूपः कथानकः सैन्यस्य वृद्धिमुपगछत उत्साहस्य भंङ्गहेतुर्बभूव। रामेणैव सर्वप्रथममिदं परिज्ञातमिति सत्यम्। स्थितेः परिवर्तनमवश्यं करणीयमिति तेन निर्णीतम्। तदनन्तरं संजाते संग्रामे राक्षसाः वलवदभिभूताः। बहवोऽपि तेषां सैन्याधिपा निहताः। अकम्पनं धूम्राक्षौ वीरशालिना हनूमता ध्वस्तौ। वज्रदंष्ट्रोङ्गदेन निहतः। रावणस्य सुविश्वस्तः सैन्याधिपः प्रहस्तो नीलेन च। अस्मिन् सन्दर्भे रावणः स्वयं युद्धरङ्गमविशत् हनूमता बाहुबलस्य परिचयं प्रापितश्च स्वस्य बलाधिक्यमजय्यत्वं च प्रमाणीकर्तुं रामः कृतनिश्चयो बभूव। उभावपि भ्रातरौ युगपदभ्यवद्रावणो लक्ष्मणं निपातयामास च।तथाप्येतत् स्पष्टमभवत् कैलासोद्धारको वीरः तरुणं राजकुमार मुत्थापयितुं न प्रबभूव। हनूमतो वज्रकल्पेन मुष्ट्याधातेन प्रहतो रावणो जानुभ्यां भूमिं समुपागमत् रक्तं ववाम च। स्वप्रभावाधिक्यस्य विश्वसनीयं प्रमाणं स्वयमेव प्रदर्शयितुं रामः कृतनिश्चयः। तदनन्तरं संजाते संघर्षे निश्शस्त्रीकृतो राक्षसराजः रामशरं प्रतीक्षमाणो विवशः समवर्तत। देत्याधिपो नितरां प्रह्वीकृत इति जानन् रामस्तस्मै लङ्कां प्रति गन्तुमनुमतिं प्रयच्छन् पुनर्युद्धायाऽयाहीति युदधाह्वानमपि प्रायच्छत।

कृतं त्वया कर्म महत् सुभीमं
हतप्रवीरश्च कृतस्त्वयाहम्।
तस्मात् परिश्रान्त इति व्यवस्य
न त्वां शरैर्मृत्युवशं नयामि॥

प्रयाहि जानामि रणार्दितत्वं
प्रविश्य रात्रिञ्चरराज लङ्काम्।
आश्वस्य निर्याहि रथी च धन्वी
तदा बलं प्रक्ष्यसि मे रथस्थः॥

स एवमुक्तो हतदर्पहर्षो
निकृत्तचापः स हताश्वसूतः।
शरार्दिमो भग्नमहाकिरीटो
विवेश लङ्कां सहसा स राजा॥ (यु-50-142-144)

इतः परं समस्ते च सैन्ये युद्धस्यान्तिमां परिणतिं प्रति न कोपि सन्देह आसीत्। भग्नाशतयातीव खिन्नः किंकर्तव्यतामूढश्चसन् निद्राधीनं स्वभ्रातरं कुम्भकर्णमुत्थाप्य रणक्षेत्रे प्रेषयितुं निर्णयं कृतवान् राक्षसराजः। पर्वताकारो रावणानुजो यदा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युद्धभूमिं समुपागच्छत् न कोपि धैर्येण स्थातुं प्राभवत्। स चानुभवः शर्मण्यदेशीय सैन्यानां प्राथमिके आभूगोलसंग्रामे काम्ब्राइ इति प्रख्याते युदधस्थाने शतघ्नी सदृशानां टैंकभिख्यानां आयोधनवाहनानां आविर्भाव इवापश्यत् हनूमत्सुग्रीवादयः कुम्भकर्णेन सह संघर्षकर्मणि पर्याप्त सामर्थ्यवन्तो नासन् । कुम्भकर्णस्य बाहुपाशबन्धनात्। सुग्रीवः कथञ्चित् रक्षामवाप। एषा विभीषिता मया स्वयमेव साधयितव्या इति रामेण विचारः कृतः। असन्दिग्धं लक्ष्मणोऽपि तत्पार्श्वस्थ एवावर्तत। तथापि रामः स्वयं युद्धाय प्रस्तातुं कृतमतिरेवाभवत्। संघर्षः पुनरल्पकालिका, रामबाणेन स निशाचरः यमालयं प्रेषितश्च।

वानरा अतीव सम्प्रीताः समभवन् रावणस्त्वत्यन्तं शोकार्तो भीतिग्रस्तश्च।

एतादृश्याः घटनाया समनन्तरमपि रावणः स्वयं युद्धभूमिमगत्वा सैन्याधिपानितरान् ज्ञातिबान्धवांश्च एकैकतः प्रेषयितुमुद्युक्तोऽभवत् तस्य महत्सैन्यमत्यन्तभीषणं देवान्तकनरान्तक महोदरप्रभृतिभिस्सेनानायकैरतिकाय त्रिशिरारूपाभ्यां पुत्राभ्यां च पुरतो नीतमासीत्। नरान्तकोऽङ्गदेन महोदरो नीलेन च निहतौ। अक्षकुमारहन्ता मारुतिरपरं रावणपुत्रं त्रिशिरसमपि यमनिकेतनं प्रेषयामास।

यदाऽतिकायो रावणपुत्र अश्वसहस्र योजिते महारथे समुपविष्टः युद्धभूमिमागच्छत्। रामोऽपि तेन किंचित् प्रभावितः प्राकृतैः वानरैः सह योद्धुमनुत्सुकतः सन् शक्तिव्यवसाययुक्तः कश्चन महाधीरो मह्यं युद्धं ददातु इतयुच्चैर्जुघोष स रावणपुत्रः। लक्ष्मणेन तस्य युद्धाह्वानं सद्य एव स्वीकृतम्। प्राज्ञः सेनाधिप इव राम आत्मानं सुसज्जमपि नातिप्रसक्तमकरोत्। यद्यपि कञ्चित्कालं तेनाऽत्यन्तं संघर्षः करणीय आसीत्तथापि लक्ष्मणः कर्तव्यकर्मणि साफल्यमवाप।

अधुनापि रामस्य युद्धाह्वानं स्वयं स्वीकर्तुं राक्षसराज सन्नद्धो नाभवत्। केन हेतुना स एवंविधां विचिकित्सा चकारेति पश्चात् चर्चयिष्यामः। मायासामर्थ्यप्रयोगेन रिपून् कथमपि जेतुं स्वपुत्रेष्वत्यन्तपराक्रमशालिनं मेघनादं रावणः प्रेषयामास। मेघान्तरितः सन् समस्तमपि वानरसैन्यं रामलक्ष्मणौ च ब्रह्मास्त्रेण निपातयितुं सः समर्थोऽभवत्। मारुतेः, प्रभावतिशयः जाम्बवतः प्रज्ञया परिपुष्टः एतां दुर्दशां परिवर्तयितुं शशाक।संजीवन्यौषधिनाऽपायान्मुक्तो रामः लङ्कापुरिमग्निना दाहयितुं विचिकित्सां नाऽकरोत्। एतावत्कालावधि स स्वात्मानं नियन्त्रयामास । एकदा ब्रह्मास्त्रप्रयोगेन राक्षसानुन्मूलयितुं रामस्यानुमतिं लक्ष्मणः प्रार्थयामास। इन्द्रजितः कुतन्त्रैस्तस्य क्षमा नष्टप्राय आसीत्। विनाशकानि दिव्यायुधानि यत्रकुत्रापि न प्रयोक्तानीति सिद्धान्तं स्वीकृतवानासीद्रामः, । यदि स स्वयं कृतनिर्णयोऽभविष्यत् तर्हि स आग्नेयाद्यस्त्रैः समग्रां लङ्कां दाहयितुं प्रभुरभविष्यत्। राम एतत् न कृतवान्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किन्तु वानरेभ्योऽनुमतिं प्रयच्छत् ॥स च सर्वस्वीकृतः साधारणः समरनीतिरेव। पश्चात् स्थितः सन् रामः सर्वं पर्यालोकयतिस्म।

यदा राक्षससैन्याधिपाः समग्रतया समागच्छन् तदा रामेण वानरवीरा एव युद्धसन्नाहकर्मणि प्रेषिताः। कुम्भनिकुम्भौ सुग्रीवेण हनूमता च निहतौ। स्वपितुः प्रतिक्रियां वाञ्छन् खरात्मजो मकराक्षो रामेण सह द्वन्द्वयुद्धं कर्तुं यदा युद्धाह्वानमकरोत्। रामः सामोदं तत् स्वीचकार। महेश्वरेण प्रदत्तेन त्रिशूलेनं रामोऽनायासेन जेतव्य इति मनसि चिन्तयामास मुढो राक्षसः। तच्च शूलं बालक्रीडनकमिव निमेषमात्रेण खण्डशः कृतवान् दाशरथिः। राक्षसमाग्नेयास्त्रेण निजधान च ॥

इन्द्रजित् रावणश्च युद्धभूमाववशिष्टावास्ताम्। प्रज्ञया समनुष्ठितेन विभीषणस्य चारप्रयोगेन रामेणेतद्विदितमासीत् यदिन्द्राजित् निकुम्भिलायां दिव्यास्त्रप्राप्तयर्थं कृतहोमादिकर्मा इति। दुराधर्ष मायाविनं सर्वदा सर्वानुपद्रवन्तमरतिं निहन्तुं लक्ष्मण एव गछत्विति रामो निर्णीतवान्। स्वयमेव मेघनादेन सहाऽवश्यं युद्धं करणीयमिति रामस्य शाठंय नाभवत् ।रावणस्तदापि जीवन्नासीत् तस्य सामुख्यं कर्तुं समग्रा स्वीया शकिः प्रयोक्तव्या भविष्यतीति रामो जानाति स्म। स्वेन क्रियमाणं सर्वमपि प्रयासं लक्ष्मणेनाऽपि करिष्यत इत्यपि स ज्ञातवान् । तथापि सतर्कः सन् लक्ष्मण प्रभावशालिना हनूमता प्राज्ञेन जाम्बवता च सह प्रेषयामास। पञ्चदिनव्याप्ते महाघोरे संग्रामे मेघनादोऽपि कालवंशं प्रापितः। इदानीमेकमात्रो रावण एवावशिष्टोऽभवत्। रामेण सह साक्षात युद्धंकर्तुं तेन युद्धभूमावागन्तव्यमासीत्। राक्षसराजेन सह सम्मानताप्राप्त्यर्थं देवराजा मातलिचालितं स्वकीयं रथं रामार्थं रणाङ्कणे प्रेषितवान्। एतस्यौपायिकत्वेन रामोऽपि तत्स्वीकर्तुं विचिकित्सां न कृतवान्। कस्यापि शत्रोर्युद्धाह्वानं कदाऽपि स्वीकर्तुं सर्वदा सन्नद्धोऽपि समस्तामपि विजयश्रियं स्वायत्तीकर्तुं रामो विमुख एवाभवत्। महता सैन्येन सह साधरणे समरसंघर्षे प्राप्ते सर्वैरपि स्वास्वा भूमिकाऽवश्यमेव स्वीकर्तव्येति तस्याभिसन्धिः। साहाय्यं पथप्रदर्शनं च प्रदातुं सदा सन्नद्धोऽपि स्वीयांभूमिकां साटोपप्रदर्शनपूर्वकं स्वीकर्तुं नेच्छति स्म। रावणस्य विक्रमशालिनौ पुत्रावतिकायं मेघनादं च हन्तुं पर्याप्तविक्रमशाली स्वभ्राता लक्ष्मण इति रामो जानाति स्म।

यथावासंकृत् स कथयति स्म तथा समरस्योदर्कः सदा सन्दिग्ध एव। तस्मात् कारणात् संघर्षार्थ नातित्वरां कृत्वा प्रज्ञापूर्विका सुदृढा नीतिरवश्यमेव कार्या । स्वस्य सेनाया आत्मविश्वासं मनोदार्ढ्य च यथावदवस्थापयितुमत्यन्तापेक्षावर्तत इति चापि स विशश्वास। यदा च स आत्मविश्वासो महाकायेन कुम्भकर्णेन प्रविचाल्यते

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्म तत्र स्वयं सन्निधातुं स्वात्मानं सज्जीचकार। स एव सर्वसैन्याधिप इति हेतोः एवैकस्यापि सुरक्षिततत्वं अत्मनो दायित्वं सम्यग् जानाति स्म। अत्यन्तावश्यकतां विना स्वकीयान् सैनिकान् समरयागे हवनसामग्रीत्वेन समर्पयितुं नापीयेष रामः। तथैव विजयश्रियो भागभाक्त्वं सर्वस्यापि प्रदातव्यमित्यपि तस्य मतिः। तस्मिन् समर्पिते प्राथमिके एव कार्ये स्वयोग्यतां विक्रमातिशयं च प्रदर्श्याभौमपराक्रमक्षमत्वं सर्वविदितं कृतवानासीत्। किन्तु सुग्रीवों ङ्गदनीलश्चेत्यादयो वानराः ऋक्षराजो बुद्धिमान् जांम्बवांश्च तादृशा महासत्वा एव आसन् किल। प्राज्ञेन सैन्याधिपेन सर्वेषामपि स्वसेनागतानां परिपूर्णं कार्यक्षमत्वमुपयोगविधेयमवश्यं कार्यम्।

आयोधन सम्बन्धि एतत्तत्वं समुचितया प्रायोगिक पद्धत्या रामेण निदर्शनीकृतम्।

इदानीं रामस्य युद्धाह्वानं प्रति रावणस्य कीदृशं प्रतिकरणमासीत्तस्य युद्धे नयविशेषश्च कीदृश इति विचारयामः। बाल्यात्प्रभृति वीरत्वेन प्रख्यातिमुपगतस्य मानवीयशूरवीरादुपयाताया विभीषिकायाः गुरुतरत्वं रावणेनानधिगतं न स्यात्। तस्मै एतदपि नाविदितं यत् मानवादेव तस्यान्तो भवितेति । रावणेन प्राङ्निहतेन इक्ष्वाकुवंशोदभवेनाऽरण्येन रावण एवमभिशप्त आसीत् "मम वंशोद्भवः कश्चन पुरुषः त्वां सपुत्रज्ञातिबान्धवं साश्वसारथिमवश्यमेव निहनिष्यतीति"। अन्येन केनचिदुत्थापितुमपि यत्नशक्यमासीतन्महेश्वरचापमनायासेनैव रामेण लीलयैव त्रोटितमिति वार्ता प्रचुरचारयुक्तेन रावणेनाऽवश्यं श्रुता भवेत्। कतिपयेभ्यो दिनेभ्यः पूर्वं रामः सुबाहुं सपरिवारं हत्वा रावणमातुलं मारीचं समुद्रे निमज्ज्ययामास। तदानीं रावणेन रामस्य समराह्वानां किमिति न स्वीकृतम्? चतुर्दशवयस्को रामस्तदानीमप्राप्तसमग्रपौरुष एवासीत्। आपदः कुड्मलावस्थायामेव दूरीकरणं तेन कर्तव्यमासीत्। एवं किमिति न कृतवान्? एतस्मिन् सन्दर्भे अयमेव प्रश्नोऽस्माभिः प्रष्टव्यः समाधेयश्च।

विभीषितायाः संभविष्यतः परिणामस्य समग्रे ज्ञाने सत्यपि रावणःतद्विषये उदासीनः समभवत् किमेवं भवेद्वा हेहयराजेन कार्तवीर्येण वानर प्रमुखेण वालिना च सामुख्ये जाते यद् वैषम्यं स्वानुभूतं तदेव पुनर्मा यातुरिति रावणेन विचारितम्? यत्र स्वात्माभिमानस्य संरक्षणविषयः संलग्नः तत्र साधारण्येन विपदमभिकर्तुं स न विचिकित्सेत। पितामहीसदृश्याः ताटकायाः वधः कृत्वा रामेण स्वमातुलस्यात्माभिमानभङ्गश्च कृतः। खरेण सह सङ्घर्षाद् द्वादशवर्षेभ्यः पूर्वं विराधं निहतवान् रामः राक्षसैः पीडितानां तपोधनानामभयप्रदानं प्रतिश्रृण्वन् रामः आश्रमादाश्रमटति स्म।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

खरस्य वधवार्ता सद्य एवाकम्पनमुखाद्रावणेन श्रुता आसीत् । आदावपराधी दण्डयितव्य इति रावणेन निश्चयः कृतः किन्तु सविनयमकम्पनेन राक्षसराजा विज्ञप्तः अवश्यमेव पराक्रमे रावणाधिको राम इति । रामेण सह साक्षात् संघर्षे रावणो न विजयी भविष्यतीत्यकम्पनेन स्पष्टीकृतम्। रावणः सकृत् जनितविश्वासः सन् साक्षात्संघर्षं परिहृत्य सीतापहरणरूपं कूटोपायं स्वीकृतवान्। विरोधबुद्ध्या रामोपगमनस्य विपद्रूपान् परिणामान् कथयन् यदा मारीचस्तं सतर्कं कृतवान् तदा रावणस्तं विचारमपि परित्यज्य लङ्कां न्यवर्तत । शूर्पणखया धिक्कृतो रावणः अन्ते किमपि करणीयमिति निश्चयमकरोत्। तथापि तस्या उपदेशमनुरुध्य छलेन सीतामपहर्तुमेव कृतमतिरभवद्राक्षराजः न रामलक्ष्मणावभिमुखीकर्तुम्। भगिन्याः विरूपीकरणं कृत्वा यः स्वं धर्षयामास तेन सह युद्धं कथमिति परिहृतवान् त्रिलोकविजयी रावणः ?

कदाचिदेषः वाद उत्थाप्येत तस्य भार्यामपहृत्य प्रतिक्रियां कर्तुमियेष रावण इति। किन्त्वेतत्कर्म रावणविषये नैव श्लाघनीयमासीत्। स्वेन पराजितानां प्रह्वीकृतनां च देवानां समस्तस्य संसारस्य च दृष्ट्या रावणो भीरुसदृशतामुपयाति स्म। साक्षात्। संग्रामेऽवश्यकं साहसिक्यिं रावणस्य नाऽभूदिति वादमुख एवऽस्माभिःस्वीकार्यो भवति। प्राथमिके संवादे मारीचकथितानि समापनवचनान्यन्वर्थानि-

प्रसीद लङ्केश्वर राक्षसेन्द्र
लङ्कां प्रसन्नो भव साधु गच्छ ॥
त्वं स्वेषु दारेषु रमस्व नित्यं ।
रामः स भार्यो रमतां वनेषु ।

एवमुक्तो दशग्रीवो
मारीचेन स रावणः
न्यवर्तत पुरीं लङ्कां
विवेश च गृहोत्तमम् (आ - XXXI-49-50)

रावणः लङ्कां प्रतिनिवृत्य भोगान् भोक्तुमेव निश्चयं कृतवान् ।

हनूमत आगमनानन्तरं सर्वे विषया अभिनवया वीक्षणगत्या रावणेन द्रष्टव्या अभवत् । शत्रुः तमेव स्वयमन्विष्य युद्धायाह्वयेत इति रावणेन सम्यग् ज्ञातं पुनरपि तेन निश्चयः कृतः यत् लङ्कादुर्गे स्थित्वा स्वसंरक्षणोपायान् कर्तुं वरमिति । समुद्रबन्धनं कृत्वा लङ्कायां वानाराणां प्रवेशे समारब्धे रावणेन युद्धमपरित्याज्यमभवत । स्वाभिमानरक्षणे तेनाऽवश्यं वीर्यपराक्रमशालिभिः स्व ज्ञातिबन्धुभिरन्वितो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामलक्ष्मणाभ्यां सह युद्ध्येत । युद्धारम्भे ताभ्यां सह व्यक्तिगत संघर्षं स पर्यहरत्। भाग्यवशात् नागपाशेन शत्रून् बध्वा पितुं प्रश्नसमाहारं कर्तुं प्रभुः समभवत् रावणपुत्रो मेघंनादः । किन्तु यदा रामलक्ष्मणौ नागपाशान्मुक्तौ भूत्वा पुनरपि लङ्काभिभवं कृतवन्तौ युदधरंङ्गे प्रवेष्टुं निर्बद्धो वभूव रावणः ।

अस्मिन् सन्दर्भे प्राज्ञसैन्याधिपानुरूपं कर्म एव रावणेन कृतम्। लङ्कादुर्गस्य वानरसैन्यैः सद्यस्वायत्तीकरणं परिहर्तु इन्द्रजिदादीनां बलिष्ठानां योद्धृणां लंङ्कायां प्रतिप्रेषणं कृत्वा स्वयमेव युद्धेऽवस्थातुं कृतनिश्चयो रावणः। पश्चात् संजाते संङ्गमे-रावणस्य, गुरुतरः सङ्घर्षः हनूमता सह समभवत्। तदनन्तरं रामेण कृतावमानश्च समभवत्। सावहेलनमुदारमतिना शत्रुणा परिहासोक्तिभिस्सह लंका प्रतिप्रेषिता त्रिलोक विजयी दशाननः ।

तच्च युद्धाह्वानं नैव साधारणमिति तथ्यं रावणेन मानयितव्यमासीत्। स्वात्माभिमानस्य परिरक्षणार्थं रामेण सह द्वन्द्वयुद्धं अपरेद्युरेव कर्तुं रावणो निर्बद्धः समभवत्। किन्तु तन्न करणीयमित्येव स कृतमतिः त्रैलोक्यविजयी रावणः । यच्च शत्रुरुत्कृष्टतर इति स्वेनैवाभ्युपेतः। तं निर्बलीकर्तुमेव चतुरतरानुपायानुपयोक्तुं स प्रारेभे। आकारे बले च सर्वोत्कृष्टं स्व भ्रातरं कुम्भकर्णं रामलक्ष्मणौ प्रति प्रथमं प्रेषयामास । यथा पूर्वमस्माभिर्विवृतं तस्य शिरच्छेदकं कर्म रामेण क्रीडावदनायासमेवानुष्ठितंम् । अधुनापि सैन्याधिपानपरांश्चैव रामं प्रति प्रेषयितुमेव रावणोद्युक्तोऽभवत् न तु स्वयं युदध भूमौ प्रवेशं कर्तुम्। तेषु न कोपि रामानुरूप इति तेन न ज्ञातं वा लक्ष्मणानुरूपश्चेति वा? केनाप्येकेन तौ भ्रातरौ जेतव्याविति कामप्याशां मनसि कृतवान् वा दशाननः? वस्तुस्थितिर्न तादृशी इत्येव प्रतिभाति। अपरिहरणीय मेतन्निगमनं यत् न्याय्ये समरे अन्यतरस्य भ्रातुरुपरि स्वस्य जय असम्भाव्य इति रावणेन ज्ञातं किल। स्वानुयायिषु ये ये बलिष्ठा आसन् तांस्तानादाय शत्रुभ्यामनवरतं प्रयुद्ध्य तयोर्दुर्बलीकरणमेव रावणस्यैकमात्रोपायः, स चान्तिमः समरनयः। एतदपि रावणाभिमतमासीद् यत् कूटतन्त्रेण मायाप्रयोगेण च रामलक्ष्मणयोरन्यतरः कदाचित् मेघनादेन हन्येत। सर्वथा स्वकीयनिकटतमान् ज्ञातीन् बलिरूपेणर्पयित्वा शत्रू दुर्बलीकर्तुमेव स प्राययत। राम इव रावणोप्येतदजानात्. युद्धे संभूतिरनि श्चितेति । एष च नयः प्रज्ञानानुरूप इति न;किन्तु एतेन रावणो बहुमतां दशां प्रापेति वक्तुं न शक्यते।मरणवक्त्रे अवश्यं निपतिष्यन्तीति परिपूर्णतया ज्ञात्वेव पुत्रान् ज्ञातींश्च बलिरूपेणार्पितवान् रावणः ।

कथं वा महानसौ राक्षसराज ईदृशं व्यवहारं कृतवान्? रावणस्य मृतदेहोपरि विलपन्ती मण्डोदरी अस्य प्रश्नस्य किमप्युत्तरं प्रयछति-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्रियाणि पुरा जित्वा
जितं त्रिभुवनं त्वया।
स्मरद्भिखि तद् वैर-
मिन्द्रियैरवे निर्जितः ॥ (यु-111-15)

यदा इद्रियाणि तमपराजयत् तदा रावणो दुर्बलः समभवत्। तदृशं दौर्बल्यं बहूनां दुष्पथगामित्व प्रेरकमभवत् पुरा। रामायणं तादृशानां तपोधनानां मनीषिणां च कथाभिःपरिपूर्णं यैः कामिनीप्रेमवागुराबध्यै धर्माद्व्यतिचलनं कृतम्। रावणस्य विषये एतदेव दौर्बल्यकारणं सिद्धमभवत्। भोगेच्छुः भोगानुभूत्यर्थमधर्मकारी च सञ्जतो रावणः तादृश्यामवस्थायाम्।

॥लब्धदिव्यत्वो विक्रमातिशयः॥

मनुष्येतरैरवध्यस्य रावण्स्य तदनुचराणां त्रैलोक्यकण्टकानां राक्षसानां वधार्थमेव मनुष्यरूपेण जन्म लेभे श्रीरामचन्द्र इत्येष अस्माकं चर्चाविषयः। एतदर्थं रामेण मानवीयं बुद्धिकौशलं युद्धनयविशेषश्च स्वीक्रार्यौ। कोटिशो युदधार्थं समुपस्थितानां राक्षसानं समुच्छेदनार्थं तत्सम्मितानां वानराणामुपयोगः तेन कृतः। रावणस्यामात्याः सैन्याधिपाश्च वानरमुख्यैः युद्धसंलग्नाः कृताः। तस्य पुत्राः लक्ष्मणेन हनूमता च निहता एव। परन्तु रामेणैकेनापि कियत् कर्तुं शक्यत इत्यपि सकृत् सम्यग् प्रदर्शितं। स्वभ्रात्रा इन्द्रजितो वधानन्तरं रामेण तादृशो युद्धनयः समुपयुक्तः यस्मात् सर्वेपि राक्षसाः संभ्रान्तचित्ता अभवन्। दिवसस्याष्टभागेनैव रक्षसां चुतर्दशसहस्राणि सरथाश्वारोहाणि कालगतिं प्रापितानि च तेन। पश्चाद्रामेणैतादृशं अद्भुतावहं महनीयं च कर्म नीरीक्षमाणाः सुग्रीवजाम्बवप्रभृतय एवं कथिताः-

एतदस्त्रबंल दिव्यं
मम वा त्र्यम्बकस्य वा॥

केन कारणेन विष्णोर्नाम रामेण नोक्तम्? किं वा स्वस्य विष्णोरवतारभूतत्वे नैव समभिहितम्? युद्धप्रागल्भ्य विषये महेश्वराद् बलवत्तरत्वं नोपन्यस्तवानित्येतच्छ्रद्धेयम्।

मानुषत्वे समरनयचातुय दिव्यत्वँ प्राप्तवान् रामः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

।। त्रिस्तरीया समाजव्यवस्थितिः ।।

भूतलस्य तेषु तेषु त्रिविधेषु भूमिभागेषु निवसतां भौतिकसंस्कृतिविषये विभिन्नानादर्शानाचारविशेषान् च स्वीकृत्य व्यवहारं कुर्वतां त्रैविध्यमुपगतानां समाजानां वर्णनं कुरुते स्वस्य काव्ये प्राचेतसो महर्षिः । आदिकविना एते त्रिविधाः समाजाः मानवीयप्रगतिसम्बन्धिनः त्रिविधा भूमिकाः प्रातिनिध्येन विवृण्वते यथाऽदिमो वानरसदृशो नराः, मांसभोजिनो राक्षसाः संस्कृतिसम्पन्ना आर्यसमाजनिविष्ठाश्चेत्युक्तिरौचित्यगर्भेऽति न प्रतिभाति ।

अस्मिन् नास्त्येव सन्देहो यदुत्तरकोसलाधिपानिक्ष्वाकुककुत्स्थप्रभृतीन् विशिष्टान् शासकविशेषान् जनकप्रभृतींश्च यः समाजो जनयामास तस्मिन् समाजे आर्यसंस्कृतेः मानवीयसभ्यतायाश्चात्युन्नता काष्ठाऽत्मानमलभेदिति ।। वाल्मीकेरभिप्राये स एवाऽदर्शनिष्ठः समाजः यत्र रामो जन्म लेभे तथा कल्याणगुण-सम्पन्ना वैदेही पर्यलसच्च । कदाचिदिक्ष्वाकूणां परमोन्नता आदर्शाः महता कालव्यपगमेनावनतिं प्रापुरिति स्यात् । परन्तु रामेण ते ते आदर्शाः पूर्वस्थितां श्रियं प्रापयामास ।यदा यदा वयं रामं चर्चाविषयं कुर्मस्तदा तदा सा चर्चा सीतया सौमित्रिणा वा विरहिता न भवेत्येव ।

मानवसमाजे नरभोजित्वं समुपस्थितमासीदित्यस्य प्रतिनिधित्वेन रामायणवर्णिता राक्षसा आसन्नित्यनुमितिः न्याय्यीकार्येऽति न प्रतिभाति । सन्दर्भविशेषेषु लङ्कानिवासिनां राक्षसानां ताटकाविराधादीनामरण्यनिवासिनां च नरमांसभोजने तात्पर्यं जुगुप्सावहया रीत्या रामायणेऽवश्यं वर्णितमस्ति । तथापि राक्षसानां स्वभावविशेषान् मानसिकविकारांश्च वर्णयन् आदिकविः तत्र मानवीयत्व मवश्यमेव निवेशयति । अन्यथा रामस्य लक्ष्मणस्य च कमनीयं रूपविशेषं दृष्ट्वा शूर्पणखा वाऽयोमुखी वा मदनविक्रियाविशेषं कथं वा प्राप्नुयुः । यदि रावणो वस्तुतः पर्वताकार आननदशकयुक्तश्चाऽभविष्यत् कथं वा तस्य लध्वाकारवत्यां सीतायामाभिरुचिर्निविष्टा स्यात् यद्यपि सा त्रैलाक्यप्रख्यातसौन्दर्यवती स्यान्नाम ?

लंङ्कापुर्याः भौतिकी सम्पत्समृद्धिः स्वर्गतिशायिनी साकेतपुरीमितरांश्च भूलोकनगरींश्चात्यन्तमतिशेते स्म । सा च सम्पत्समृद्धिः दीर्घकालिकेन तपोनुष्ठानेन ईश्वरप्रसादरूपेण संप्राप्ता । यदा हनूमानुन्नातान् प्राकारविशेषानुल्लंख्य लङ्कां समुपससाद तदा स तस्याः महत्याः नगर्याः स्थापत्यकलावैशिष्ट्यं विभूतिविशेषं च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृष्ट्वा चकितः समभवत् । निरतिशयसौन्दर्यवत्या युवतयः त्रिस्थानस्वरभूषितं गीतं गायन्त्यः नरमांसभोजिनः समाजस्य वर्णनेन सह संगतिं न लभन्ते । नूपुराणां झणझणत्कारो वैदिकमन्त्राणामनुभूतिविशषेदायकेनोच्चारणेन च सम्मिश्रणं कुरुते स्म ।

सोपान निनदांश्चापि
भवनेषु महात्मना
आस्फोटितनिनादांश्च
क्ष्वोडितांश्च ततस्तः ॥
शुश्राव जपतांस्तत्र ।
मन्त्रान् रक्षोगृहेषु वै ।
स्वाध्यायनिरतांश्चैव
यातुधानान् ददर्श सः ॥
रावणस्तवसंयुक्तान् ।
गर्जतो राक्षसानपि ।
राजमार्गं समावृत्य
स्थितं रक्षोगणं महत् । (सु-IV-12-14)

राक्षसानां समूहः सर्वत्र ऐकरुप्यं नाऽवहतिस्मा यदा केचिद्वैदिकमन्त्रोच्चारणे निरता आसन् तदाऽपरे राक्षसराजस्य कीर्तिघोषं गर्जन्ति स्म । गायन्तिस्मेऽति नोक्तमादिकविना गर्जन्ति स्मेत्येव ।

विविधेषु तपोव्यवहारेषु निरतानां राक्षसानां वर्णनमपि दृश्यते । केचित् जटिला केचित् मुण्डितशीर्षाश्च मानवीय समाजस्ताः तापसविशेषा इव दृश्यन्ते । स्म ।

ददर्श मध्यमे गुल्मे
राक्षसस्य चरान् बहून् ।
दीक्षितान् जटिलान् मुण्डान्
गोजिनाम्बरवासस: ।
दर्भमुष्टिप्रहरणा-
नग्निकुण्डायुधांस्तथा । (सु-IV-15-16)

प्रत्युत तत्रैवेकाक्षा एककर्णाः लंबोदरपयोधराः इत्यादयः वैरुप्यभूयिष्ठाः विकलांगाश्च बहवः कृतवसतय आसन् । यथा मानवीयसमाजे परिदृश्यन्ते तथैव लङ्कावासिषु राक्षसीष्वपि काश्चित् रतिसौभाग्यसुखनिषेविन्य अपराश्च विरहवेदनया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परितप्यमानाश्च दरीदृश्यन्ते स्म। राक्षसराजस्य दशाननस्य शय्यागारस्तेनानुभूय मानायाः सम्पत्समृद्ध्याः रतिसुखानुभवस्य च प्रमाणानि दर्शयन्त्यस्तथैव ईषज्जुगुप्सामावहन्ताश्चासन्। दीर्घकालिकविषयभोगानन्तरमतिमात्रं क्लान्तास्सत्यः रावणान्तः पुरनिवासिन्यः ता सर्वे इतस्ततों यथेष्टं सुप्ताश्चाभवन् तासां एष उपभोग उच्छृङ्खलः नियन्त्रणाऽविधेयश्चानवरतमासीदिति सुस्पष्टमेव।

वानर समाजमध्य उपलब्धायाः स्थितेर्विषये भिन्नाः परस्परविरुदधाश्चाऽभिप्रायाः वर्तन्ते। केषांचिदितिहासकाराणामेवमभिसन्धिः यदार्यावर्तनिवास्यादिकिविर्वाल्मीकिः द्रमिडसमुदायस्य वणने क्रियमाणे तेषां संस्कृति किंचित् न्यूनस्तरीयमुपवर्णितुं कृतोद्यम इति ।वानरराणां राक्षसानां चर्चा। समाजद्वयस्य वर्णने महाकवेरभिप्रायस्थिरता न नियता। कदाचित् किष्किन्धानिवासिनः कपीनत्यन्तचपलान् वानरानिव वर्णयति। रामलक्ष्मणाभ्यां स्वेन सह प्रथमसमागमे सुग्रीवः कस्यचित् सालवृक्षस्य पर्णबहुलां शाखां त्रोटयित्वा रामनिषीदनार्थं भूमौ विन्यस्यति। हनूमांश्च तथैव कस्यचित् चन्दनवृक्षस्य शाखा च लक्ष्मणाय। प्रत्युत रामः प्रथमसमागम एव हनूमतः अप्रस्खलितां वाक्चातुरीमभिनन्दति।

संस्कार क्रमसम्पन्ना
मद्भुतामवलम्बिताम्।
उच्चारयति कल्याणीं
वाचं हृदयहर्षिणीम्।
अनया चित्रया वाचा
त्रिस्थानव्यञ्जनस्थया।
कस्यनाराध्यते चित्त
मुद्यतासेररेरपि॥ (कि-III-32-33)

स्वभावचपलाः कपयः कुत्र ? पाण्डित्यभूषितः सौम्यवाग् आञजनेयश्च कुत्र ?

पशूनां विषयेऽतिमात्रमनुगुणः किष्किन्धायाः दुर्गसन्निवेशः कस्यांचित् गुहायामवर्तत। तथापि विविधचित्रादिमण्डितानां बहूनां हर्म्याणामपि तत्र यथायथं विहितत्वमासीत्। स्वभावोक्तिमर्यादया हनूमतः हर्षाधिक्यवर्णनं कविना यत्कृतं तत्पठित्वा पण्डिता अपि हर्षाधिक्यप्रकटने पामरा इव व्यवहरन्तीत्यमुमेव सुस्पष्टं पश्यामः॥

यदा बालकाण्डे कविः वानरोत्पत्तिं वर्णयति तदा वानरान् कामरूपिण इति वदति। एतत्कामरूपित्वं राक्षसानामपि निसर्गसिद्धं । हनूमान् प्रथमतो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वटुरूपमुपादाय राममुपगच्छति। राक्षसान् रावणमारीचशुकसारणादीन् सन्दर्भानुगुण्येन विविधरूपाणि स्वीकुर्वतः पश्यामः। तस्मात् त्रिविधानां समाजानां वैशिष्ट्यतरतमभावं तेषां शारीरिकघटनाविशेषानामाधारेण न कुर्मः किन्तु ते कथं वा व्यवहरन्ति कीदृशी वा तेषामाचारव्यवस्थितिरित्यादिकं मनसि कृत्वा तथाविधं निर्णयः कार्यः। किं वा राक्षसानां वानराणां च कदाचिदाचारसंहिताअवर्तत या मानवीयाणामाचारसंहितायाः विभिन्ना व्यवस्थिता आसीत्? किं वा तेषामादर्शाः धर्माश्च विभिन्ना आसन्? एतेषां प्रश्नानां समाधानं केवलं रामायणग्रन्थपठनेन न प्राप्तुं शक्यं। यथाऽस्मभिः पूर्वमुक्तं तथा महान्तः कलाविदश्चिन्तकाश्च प्रश्नानुत्थापयन्ति, किन्तु परिपूर्णतया नोऽत्तारयन्ति।

मानवीयेषु व्यवहारविशषेषु रामस्य परिवारमादर्शपरिनिष्ठितं कृत्वैव प्रतिपादयत्यादिकविः। पितरि सर्वेषु भ्रातृषु च रामस्य प्रीतिदार्ढ्यं निस्सीममासीत्। आदेशं विनैव पितुर्मनोविचारान् स्वयं परिज्ञाय रामस्तदनुरोधेन व्यवहतरति स्म। तथापि सर्वेषामपि मानवीयव्यवहाराणां धार्मिकत्वनिबन्धनं रामेण स्वव्यवहारेण प्रदर्शितम्। पितरं धर्मनिष्ठं विधातुमेव रामो वनं प्रति प्रस्थितः। यदि स्वपितरमुद्दिश्य स्वप्रेम्णैव कार्याणि कर्तुं राम उत्सुक्तोभविष्यत् तर्हि स वनं प्रति गन्तुमविचारयन् प्रासादे एव वसतिं कर्तुं व्यवसितोऽभविष्यत् यतः स्वविरहेण पितुर्मृत्युः सुनिश्चित इति तेन परिज्ञातम्।

रामस्य पितरमुद्दिश्य प्रीतिप्रकर्षस्तथैव पित्रा प्रतिदत्तश्च। सर्वेऽभ्योऽपि वस्तुभ्योच्चतरत्वेन रामं वीक्षे स्वप्रेयस्यै अपि दशरथः प्रकटयतीति तस्य वैशिष्ट्यं युज्यते। तथापि स्वपुत्रार्थमापि दशरथ अधर्मकार्ये न व्यापृतो भविष्यति। एते सर्वेऽपि इक्षवाकूणामादर्शत्वेन कविना प्रतिपादिताः।

स्वमातरं कौसल्यामपरे च कैकेयीसुमित्रे प्रति रामस्य प्रेमप्रकर्षः तुल्यकल्पः समभवत्। एतश्च याथातथ्यं कैकेय्याः मुखत एव वयं श्रुणुमः। अन्तः पुरे यावत्यो वनिता आसन् तावतीषु सर्वास्वपि मातृनिर्विशेषं श्रद्धा रामस्य परिस्फुटमासीत् यदि ताः सकृदपि दशरथेन पत्नीत्वेन स्वीकृताः।

एषः व्यवहारः सादरस्य पितृप्रेम्णो निदर्शनभूतत्वेन ऋग्-वेदकालादारभ्याऽर्षभारते प्रचलतीति निश्चप्रचम्। माता च पिता च तुल्यरूपेण पुत्रस्याऽदरविशेषमर्हतः। तस्मादेव कारणात् यथा पितुः मातुश्च मिथाविरुद्धा वादेशौ रामेण प्राप्तौ तदाऽन्यतरस्याप्यादेशस्योल्लंखने स विमुख आसीत्। अतः मातरमाशीर्वादसहितं वनगमनेऽनुमतिं प्रयच्छत्वित्यन्वरुद्ध्यत।

स्नेहस्य सम्यग् मिथः परिचयस्य च सदृश एव रामस्य प्रेयसीं प्रति प्रीतिप्रकर्षः प्रववर्ते स्म। जायाप्रतिग्रहणविषये रामः स्वकीयं मानदण्डं परिकल्पयामास। यद्यपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वात्मनः पराक्रमाधारेणैव सीतायाः पाणिग्रहणयोग्यता रामस्य सिद्धा तथापि धर्मशास्त्राणामादेशात् व्यतिचलनं स न चकांक्षे। वधूः वरस्य पित्रा एव निश्चेतव्य इति हेतोः रामो दशरथस्यागमनमनुमोदनं च प्रतीक्षमानोऽतिष्ठत्। अवश्यमेव पितुरभिनन्दनं प्राप्स्यतीति तेन विश्वासः कर्तुं शक्य आसीत्। कुतो वा सीतापेक्षयोत्कृष्टतरा पत्नी जनकस्य वंशापेक्षया प्रार्थनीयतरः सम्बन्धी च लभ्येत ?

बालकाण्डस्य समापनश्लोकेषु संक्षिप्तोप्यर्थगर्भतया परिपुष्टः सीतारामयोर्मिथोबन्धवर्णनं वाल्मीकिना प्रदीयते। एकोऽपरस्य मनोविचारान् सम्यग् जानाति स्म। रामस्य वनवासं प्रति प्रस्थानस्य प्रकाशानन्तरं सीतारामयोः सुदीर्घो विवादः समजनि। एतादृशस्य विवादस्य केवलमौपचारिकत्वमेवासीत्। न तु हार्दिक्यमित्यनन्तरं वयं जानीमः। सीताऽवश्यमेव वनयात्रायां स्वात्मानमनुगमिष्यतीत्यत्र रामस्य न काऽपि शङ्काऽऽसीत्। स्वकुटुम्बसदस्यानां परिषदानां पौराणां च सन्निधौ रामेण स्वकर्तव्यमनुष्ठातव्यमासीत्। सीता स्वेच्छयैव भर्त्रा सह वनं प्रति गच्छतीति सर्वे जानन्तु इति रामेण निश्चयः कृतः।

यद्युत्तरकाण्डमपि वाल्मीकिरचितमित्यस्माभिः विश्वासः कर्तव्यः तर्हि भर्त्रा सह विपिने व्यापितानि त्रयोदशवर्षाणि सीतायाः जीविते आनन्दातिरेक भूयिष्ठानीत्यप्यस्माभिः स्वीकर्तव्यम्। प्रवासानन्तरं सीतया कतिपये मासा एव अयोध्यायामुषिताः। स्वकीये अष्टादशे एकोनविंशे वा वयसि यौवनप्राप्तेः सद्यस्समनन्तरं वनं प्रविष्टा सा । यावत्कालं स्वभर्त्रा सह जीवितमनयत् तावत्कालं नगर्या उपभोगानुभवः तस्या अकिञ्चित्करा एव । राक्षसेभ्यः कदा कदा क्षुद्रेभ्य उपद्रवेभ्यः ऋते सा भर्त्रा साकं लक्ष्मणेन सम्यग् परिचरिता सति वन्यमयेऽन्तरीक्षे सन्तुष्टिमयं जीवितमन्वभवत्। स्वभर्त्रा साकं कापि नारी स्वर्गीयमानन्दमनुभवितुं प्रभवतीति सर्वस्मै सनिदर्शनं सा प्रमाणीचकार।

इतरेषां त्रयाणां भ्रातृणां दाम्पत्यजीवितं प्रति नाधिकं जानीमः। सर्वेऽप्यवश्यमेव स्वस्वपत्नीषु सप्रेमव्यवहारानेव चक्रुरिति सुनिश्चितम्। रामायणे बहवो विषयाः सुस्पष्टतया नाभिहिताः। वनप्रयाणसमये लक्ष्मण उर्मिलां नैवापृच्छत इति वक्तुं न शक्यते । वनं प्रति स्वात्मनोप्यनुगमनं प्रार्थयन्ती ऊर्मिला लक्ष्मणं सन्दिग्धावस्थां न प्रापितवती । भ्रातुः भ्रातृजायायाश्च परिपूर्णसेवार्थमेव लक्ष्मणेन व्यवहारः करणीय आसीत्। मात्रा सुमित्रया लक्ष्मण एवमादिष्टः सीतारामौ मातृपितराविव द्रष्टव्यौ सेवितव्यौ चेति। एतत् सर्वैरपि श्रुतं सम्यग् विदितञ्च।

अस्माकमितिहासे वा लाके इतरत्र विद्यमानेषु ग्रन्थेषु वाभ्रातृत्रयस्य रामेण सह यः प्रेमव्यवहार आसीत् तत्सदृशो न कुत्रापि दृश्यते। रामलक्ष्मणयोः सम्बन्धमधिकृत्य अस्माभिर्विस्तरशश्चर्चा कृता। एकस्यापरेण सहाविना भावएव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निरन्तरमभवत् । यदा रामः स्वस्य यौवराज्याभिषेकस्य वार्तामश्रुणोत्तथा स लक्ष्मणं साम्राज्यसुखं भुङ्क्ष्वेति सानन्दमनुरोधं करोति ।

सौमित्रे भुङ्क्ष्व भोगांस्त्व
मिष्ठान् राज्यफलानि च
जीवितं चापि राज्यं च ।
त्वदर्थमभिकामये ।

केवलं लक्ष्मणेनैव तादृश उपभोगः करणीया इति न रामस्याभिसन्धिः । त्रयाणामपि भ्रातृणामुपभोगार्थमेव तस्यास्तित्वमिति रामः स्पष्टीकरोत्येव । एतस्मिन् विषये कैकेय्या अपि न कापि विचिकित्सा आसीत् । रामेणाप्ययं स्पष्टीकृत आसीद्यत् त्रिभिरपि भ्रातृभिः साकमनुपभुज्यमाने भोगे तस्य नाभिरुचिरिति ।

भ्रातृणां संग्रहार्थं च ।
सुखार्थं चापि लक्ष्मण ।
राज्यमप्यहमिच्छामि
सत्येनायुधमालभे ॥

नेयं मम मही सौम्य
दुर्लभा सागराम्बरा
नहीच्छेयमधर्मेण
शक्रत्वमपि लक्ष्मण ।

यद् विना भरतं त्वां च
शत्रुघ्नं वापि मानद ।
भवेन्मम सुखं किंचिद्
भस्म तत् कुरुतां शिखी ।

स्वस्मिन् हठात् निवेश्यमानं राजसिंहासनं निराकुर्वन् भरतस्तदेव रामं प्रति विनयेन सह प्रयच्छति । पश्चाद्रामस्य पादुके राजकीय प्रतिनिधित्वेन सह स स्वीचकार प्रवासानन्तरं स्वस्य प्रत्यागमनं भरतेन सौत्सुक्यं सादरं च प्रतीक्षमाणमवर्तत इति रामः सम्यग् जानाति स्म । तथापि सः भरतस्य सिंहासने स्थातुं तत्परतास्ति नवेति पर्यवेक्षितुं हनूमन्तं प्रेषयामास । शासनप्रभावं मनुष्यं कलुषीकुर्यात् । चतुर्दशवर्षाणि यावत्कालं शासनकार्यं कुर्वन्नेवावर्तत भरतः । एतत् सुविचित्रं यत् हनूमान् स्वामिन आदेशद्व्यतिचलनं चकार भरद्वाजाश्रमं प्रति नैव निवृत्तः । किं रामेण विस्मृतं वा ? हनूमतोऽप्रत्यागमनेन स न विचलितोऽभवत् परन्तु पुष्पकविमाने अयोध्यां प्रति स्वयमेव प्रस्थितः । भरतो न कदापि कलुषीभविष्यतीति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामेण सम्यगेव ज्ञातं । भरतस्य प्रतिकरणं कीदृशमिति ज्ञातुं रामेण यत् कपिवरः प्रेषितः तत्र केवलमौपचारिकत्वमेव रामेण प्रदर्शितमिति हनूमताऽपि विदितमासीदेव । वाल्मीकिरचितं रामायणं काव्यं भ्रातृप्रेमाधिकृत्य विस्तरशो विरचितं काव्यमेव ।

॥ राक्षससमाजः ॥

किं वा राक्षसानां वानराणां च समाजयोरप्येतादृशाः प्रेमबन्धाः पारम्परिक-समुदायाचाराश्चास्माभिः दृश्यन्ते ? रावणस्य कौटुम्बिकजीविते पितुः पुलस्त्यमहर्षेः न किमपि स्थानमासीत् ॥ बहुषु सन्दर्भेषु गाढाद्गाढतरस्य पुत्रप्रेष्णः प्रदर्शनं रावणविषयेऽपि वर्णितमस्ति ॥ किमनेन राक्षससमाजेऽपि पितृपुत्रप्रीतिप्रकर्ष सुतरां प्रचलन्नासीदित्यनुमातुं शक्नुमः ? अस्मिन् विषये अस्माभिः साक धानैर्भ वितव्यं ॥ न केवलं राम अपितु लक्ष्मणोपि च स्वेतरेण संघर्षयोग्य इति सम्यग् जानन्नपपि रावणः स्वपुत्रान् एकस्मादपर इति कृत्वा मृत्युक्क्रामुद्दिश्य प्रेषयति ॥ तथैव भ्रातरं कुम्भकर्णमपि ॥ सर्वेऽपि तस्य पुत्राः पितृभक्ताः, पित्रार्थे स्वजीवितमपि दातुं सन्नद्धाश्चासन् ॥ किं वा रावण आनुकूल्यं प्रतिप्रेमप्रकटनं च तदनुकूलं प्रदर्शयति स्म ? रामेण सह प्राथमिके संघर्षे पराजितो रावणस्तेजोवधं संप्राप ॥ तस्मादेव कारणात्तस्मिन् व्यक्तिपरिवर्तनमपि सञ्जातम् ॥ अन्तःप्रकम्पितः स्वार्थपरश्च सन् स आत्मनो हिताय इतरेषां बलित्वेन समर्पणमप्यनुचितं नाऽमन्यत ॥

पतिप्रेमदृढा दशाननपत्नी मण्डोदरी भूयो भूयोपि तस्य हितमेव प्रार्थयामास मनसा चकांक्ष च ॥

निस्सन्देहं रावणे पत्निप्रेमदार्ढ्यमपि समुचितमात्रयाऽऽसीत् किन्तु तस्य परिस्पुरणं तस्यैव स्वतस्मिद्धया रीत्या एवासीत् ॥ स्वकीयाः वैषयियिकलालसायाः परिपूरणार्थमितस्ततो कामिनीः समादाय तस्याः मनाः खिन्नं विधातुमपि संङ्कोचं न कदापि रावणश्चकार ॥ पत्युपदेशे यथा सीता सर्वदैव सफला समभवत् तथा मण्डोदरी न कदापि साफल्यं लेभे ॥ राक्षसराजस्य कृते पत्न्याः केवलं कामोपभोगकरणत्वमासेदुः ॥

एतस्मिन् विषये राक्षसैः सर्वसम्मता एतादृशीं हेयतामाससादेति न निश्चेतव्यं यत्र रावणे जुगुप्सावहया विधया व्यवहरन्नासीत् ॥ रावणस्य माता स्वयं चरित्रवती पतिव्रता चासीदिढि प्रासिद्धम् ॥ गुणवन्तं पुत्रं प्राप्नुयामिति इच्छन्त्येव सा पुलस्त्यमुपजग्राम ॥ किन्त्वपत्यत्रयाणां विषये तस्याः प्रार्थना चारितार्थ्यं नाससाद इत्यहो विधिवैपरीत्यम् । कुम्भकर्णः प्रभूतभक्षणतत्परत्वेन कलङ्कितोऽपि कतिपय गुणैवियुक्तो नाभवत् । अशुभकर्मणो विपरीतफलसिद्धिर्नूनं भविष्यतीति भ्रातरमुपदेष्टुं समीचीनां विवेकशक्तिं स प्रदर्शयामास ॥ ज्यायसि भ्रातरि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोऽवश्यमेव सुस्निग्धोऽभवत् ॥ स कुपतिरथवा कुपिता आसीदित्यत्र न किमपि प्रमाणं रामायणे दृश्यते ॥ विभीषणस्य पत्नी तु प्रज्ञायुक्ता चारित्रवती गुणदोषविवेचनशालिनी चासीत् ॥

कुम्भवर्णविभीषणयोर्मिथो वैरुध्यविषये तारतम्यविवेचनमर्हति ॥ विभीषणस्तितीक्षादि तपोगुणकल्याणशीलो विष्णुभक्तश्चासीत् ॥ कुम्भकर्णस्तु अमितभोजितत्वस्य बृहदाकारं निदर्शनं च ॥ एतच्च क्रिस्तीय धर्मग्रन्थेषु दशवि धवृजिनेष्वन्यतमं दृश्यते । अमितभोजन मलसस्यायुतसिद्धम् । तेन एतस्मिन् न किमप्याश्चर्यं यद् भोजनानन्तरं स दीर्घकालनिद्रासेवी वर्तते स्म ॥ वाल्मीकिनाऽतिशयोक्त्युपयोगः कृतं स्यात् ॥ एतादृशानां नरविशेषाणां बहुधावर्णनमर्वाचीनग्रन्थेष्वपि दृश्यते ॥ ग्रन्थकर्त्रुरलक्साण्डर् ड्यूमा इति प्रख्यातस्य 'सैनिकत्रय' इति नम्नि सुपरिचित उपन्यासे पोर्तो (Porthos) नाम सैनिको बहुतरं खादित्वा धुर्धुरायमानः शेते स्म ॥ एतद्वर्णनं पठन्तो रामयणानुवाचकाः अवश्यमेव कुम्भवर्णं स्मरेयुः । बहुभोजीनम् राक्षसानां मानवानां च निस्सन्देहं वृजीनम् ॥ अदिकाव्ये इतस्ततः प्रवीर्णेषु विवरणेषु राक्षसानां वैषयिक भोग तृष्णावर्णनेषु च तेषां परिश्रमक्षमत्वेऽपि रत्यादिसुखतात्पर्यं चित्रितं वर्तते ॥ रावणस्य प्रमुखं दौर्बल्यं एतदेवासीदिति प्रतिभाति शूर्पणखायाः वैरुप्यकरणेन जनितक्रोधो रावणो यदा सीतापहरणार्थं मारीचसाहाय्यमपेक्षति स्म तदा मारीचस्तमेवमुपदिशत्—

"त्वं स्वेषु दारेषु रमस्व नित्यम्"

तेन समाहितचित्तो रावणः लङ्कां प्रति निवृत्तः। राक्षसराजस्य विषये कीर्तिकामत्वं भातृप्रेमपुत्रवात्सल्यादिकाः गुणाः रतिसुख-लालसायाः निघ्नत्वमेव भजन्ति स्म ॥ अवश्यमेव राक्षसाणां समाजे भातृपुत्रादिस्नेहानां निदर्शनानि निम्नस्तरीयाण्येव दृश्यन्ते

॥वानरयूथपरिवारे ॥

राक्षसैः सह सञ्जाते सङ्ग्रमे रामलक्ष्मणयोः विजयः वानराणां प्रमुखसाहाय्येनैव समभवत् ॥ किन्तु तेषां सामाजिकजीवनं प्रति समुचितं वर्णनं अस्माभिः न उपलभ्यते ॥ तथापि वाल्मीकिना काश्चित् सामग्र्यः प्रदत्ताः याभ्यः तेषां कैटुम्बिवजीवनविषये सांस्कृतिकसामुदायिकजीवने च कानिचित् दृश्यानि अस्माभिरवश्यमुपलभ्यन्ते ॥ विस्तरशः उपवर्णनं च भ्रात्रोः वालिसुग्रीवयोः अङ्गदस्य हनूमतश्चेति केषांचित् प्रमुखानां वानराणां विषये एव लभ्यते ॥ उपदेशप्रदाने पटुतमायां तारायां स्वपत्न्यां वाली अतिमात्रं स्निग्धः सक्तश्चासीत् ॥ स्वमृत्यु समये तारायाः गुणपौष्कल्यं प्रशंसन् वाली तां स्वीकर्तुं सुग्रीवमुपदिशति सकृत् वालिना

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्याः उपदेशः अवामन्यत यत्परिणामेन सः मृत्युं प्राप्तवान् ॥ स्वात्मनि सुस्निग्धा तारा स्वमृत्योरनन्तरं सुग्रीवेण अवश्यं गृहीता भविष्यति तस्मिन् विषये सहमतिश्च तस्याः भविष्यतीत्येवं बालिना स्वयं ज्ञातमासीत् ॥ किष्किन्धायाः सुग्रीवस्य निष्कासनानुपदं तस्य पत्नीं रुमां हठात् ग्रहीतुं सः स्वयं विचिकित्सां न कृतवान् ॥ तत्रापि रुमायाः इच्छायाः विरोधेन तां स्वीकृतवानिति कुत्रापि न वर्णितं वर्तते । वानरसमाजे एतद्विषये आचारसंहिता सुदृढा आसीदिति न वक्तुं शक्यते ॥ सिंहासनारोहणानन्तरं स्वेन पुनर्लब्धायाः रुमायाः ज्यायसः भ्रातुः, पत्न्याः तारायाश्च सान्निध्ये सुग्रीवः अतीव प्रीतिमुपलभतेस्मेति स्पष्टं प्रतिभाति ॥

सुग्रीवेण एवमुक्तं यत् सः स्वयं स्वभ्रातरि स्निह्यति स्म तथैव वाली स्वात्मनि च इति ॥ दुन्दुभिना सह द्वन्द्वयुद्धघट्टे गुहामुखमवरुध्य सुग्रीवः, किष्किन्धाप्रासादंन्यवर्तत इति हेतोः वाली सुग्रीवं भ्रातृद्रोहिणममन्यत । कविः अनुवाचकमनस्सु तादृशं विचारं निवारयितुं किमपि उक्तवान् ? यदि सुग्रीवः वस्तुस्तः भ्रातरि सुस्निग्धः अभविष्यत् तस्य साहाय्यं सर्वधा विधातुं तेन प्रयत्नोपि किं न करणीयः अभविष्यत् भातुः मृतशरीरमन्विष्य तस्य दाहादिसंस्कारोपि किं न करणीयः आसीत् ? सर्वेपि भ्रातरः न भरतसदृशाः इति रामेण उवतं तद्वश्यमेव तथ्यं ॥

पितृपुत्रवन्धश्चापि वानरपरिवारेषु न दार्ढ्य मुपागच्छदित्यपि प्रतिभाति ॥ हनूमतः पितरं केसरिणं सुग्रीवस्य अनुयायिनामन्यतमत्वेन कुत्रचित् वर्णयति कविः ॥ स्वपुत्रे हनूमति विशेषतः अभिरुचिं सः न प्रदर्शयति स्म तस्य पराक्रमातिशयेन दशरथादिवत् नितरां मुमुदे इत्यपि रामायणग्रन्थे न दृश्यते ॥ अङ्गदः पुनः स्वपितरि गाढतरं स्निग्धः आसीत् ॥ वाली तं रामस्य परिरक्षणार्ह इति कथयित्वा पितृभातरि भक्तिमान् भवेति स्वपुत्रमुपदिशति च ॥ स्वपितुरुपदेशमनुसर्तुं अनुसर्तुं सन्नद्धोपि सन् पितृव्यं दुराचारिणं मन्यमानः तं प्रति कलुषितां मनोभावनां कुरूते च स्म ॥ सीतान्वेषणाय गतवन्तः यदा भग्नाशाः समभवन् तदा अङ्गदेन एवमुक्तं यत् सुग्रीवः तं न मर्षयिष्यतीति । सुग्रीवस्य उदारशीलतां प्रति नातीव बहुमानं सः कृतवान् ॥ अङ्गदं यौवराज्ये अभिषेकयितुं रामेणैव निश्चयः कृतः ॥ हनूमतः उपदेशानन्तरमपि अङ्गदः सुग्रीवस्य धर्मविषयिनीं भावनामाक्षेपत्येव । ज्येष्टपत्न्यां मातृवत् पूजयितव्यायां स्वपितृव्यः सुग्रीवः पतिवद्व्यवहारं कृतवान् तथैव भ्रातरं गुहाबद्धं कृत्वा द्रोहमाचरश्चेति तस्मिन् अङ्गदः दोषारोपणं करेत्येषः श्रद्धावहः ॥ स्वोपकर्तुः रामस्य कार्याणामुपेक्षा तेन कृतेत्यपि वदति । अंगदस्य एषः अभिप्रायः, इतरेषामपि वानरश्रेष्ठानां अभिमतः इत्यपि रामायणे स्पुटं प्रतिपादितः सर्वथा वानरयूथसमाजे मिथः सुदृढस्य समाजस्य रूपं न दरीदृश्यते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥रामो विग्रहवान् धर्मः ॥

एतन्न सुस्पष्टं यद्वाल्मीकिना धर्मस्य स्वरूपं प्रति सार्वत्रिकी भावना सुव्यवस्थिततत्वेन भाविता न वेति ॥ अस्मावं देशे मनीषिणामभिप्राये धर्मस्य गहना गतिः ॥ एतदेव उत्तरं द्रौपत्याः वस्त्राक्षेपसन्दर्भे भीष्मपितमहेन तस्यै प्रदत्तम् ॥

धर्मविषयिनी भावना भिन्ने भिन्ने समाजे भिन्नैव भवितुमर्हतीति सुगमो विषयः ॥ किन्तु कल्याणोन्मुखे समाजे कानिचित् साधारणानि तत्वानि अवश्यमभ्युपेतानि ॥

राक्षसानां शिष्टाचारसंहिता नाकवासिनां मानवानां चोपलभ्यमानायाः संहितायाः व्यतिरिक्ता भवतु नाम ॥ किन्तु सर्वसाधारण्या कयाचित् संहितयाऽवश्यमेव भवितव्यं । देवानामप्याचारसंहितायाः स्वीकारोऽवश्यं कर्तव्यः नोचेत् तेऽपि दण्डार्हाः स्युः कामेन प्रेरित इन्द्रः पापमाचरितवान् तस्मात् कारणात् महर्षिणा शप्तोऽभवत् ॥ क्रूरमपि दशाननं दूतो न वध्य इति विषयं विभीषणः स्मारितवान् । कुम्भकर्णमाल्यवादिभिः रावणं प्रति दत्तेनोपदेशेनैतत् स्पष्टीभवति यद्राक्षसानामपि समाजे शिष्टाचारसंहिता नातिभिन्ना एषाऽचारसंहिता निष्ठया सर्वसाधारण्येन वा न परिपालिता इति श्रद्धेयम् ॥ दशरथजनकोश्वपतिरित्येतेषां नृपानां समाजे धर्माद्व्यतिचलनं यथा धिक्कृतिविषयीकृतं राक्षमसमाजे तथैव कृातमिति न प्रतिभाति ॥ धर्मशास्त्रेषु निष्णातः सदसद्विवेकवान् च वाली यवीयसो भातुः पत्नीं स्वायीकृर्तुं विचिवित्सां न कृतवान् ॥ न वाली न वा सुग्रीवोन्योन्यरय पत्न्या उपभोगे किमप्यसमीचीनत्वं दृष्टवन्तौ ॥ तथाप्येतद् कार्मधर्मविरुद्धमिति कैश्चित् प्रदर्शितम् ॥ वालिनः कर्म रामेणधिक्षिप्तं, तथापि यदा तारा वालिनो मृत्योरनन्तरं सुग्रीवेण साकं सहवासे सान्त्वनं प्राप तदा रामेणतं धर्मव्यतिचलनमकिंचित्करममन्यत ॥ आदिमनिवासिनां मध्ये विवाहबन्धाः दाढ्र्ययुक्ताः समुदाचाराः इति न स्वीक्रियन्ते ॥ तत्र स्वातन्त्रस्य आधिक्यं वर्तते स्म, तथापि धर्मविषयिनी भावना सर्वत्रापि साधारण्येव ॥

एतादृशे विरुद्धाभिप्रायविषये वाल्मीकिः स्वस्योपदेशप्रदानक्षम त्वमाविष्करोति ॥ केवलं सर्वेऽपि मानवाः किमिति मानवाः सर्वेऽपि प्राणिनः प्रलोभनमये वातावरणे अनुकूलसाचर्ये च जीवितं व्यापयन्ति ॥ यदा कश्चन प्रलोभनस्यामिषीभवति तदा किं वा एतत्कर्म धर्मसंहितं उत न वा इति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रश्नमकृत्वैवानुकूलसाहचर्यस्योपयोगं कुरूते वा? अमिषीभवन् नरः स्वभावशुद्धिविषये दुर्बलः संजायते ॥ रावणः स्वयमतिप्रभावशाली व्यक्तिविशेष आसीत् ॥ महतो राक्षसराजस्य प्राथमिके दर्शने एव हनूमान् अतिमात्रं प्रभावितोऽभवत् ॥ दीर्घकालिकायाः प्रतीक्षाया अनन्तरं रावणेन सह युद्धे आरभ्यमाणे सति सद्यः संजातां सोक्तिं नियन्त्रितुं रामोपि नाश्शाक ।

प्रत्युवाच ततो रामो
विभीषणमरिंदमः ।
अहो दीप्तमहातेजा
रावणो राक्षसेश्वरः ॥

आदित्य इव दुष्प्रेक्ष्यो
रश्मिभिर्भाति रावणः ।
न व्यक्तं लक्षये ह्यस्य
रूपं तेजः समावृतम् ॥

देवदानववीराणां
वपुर्नैवंविधं भवेत् ।
यादृशं राक्षसेद्रस्य
वपुरेतद् विराजते ॥

त्रिलोकव्यापिनः प्रभावस्य महत्वेन रावणो नितरां दूषितोऽभवत् ॥ प्रलोभनवशंगतः सः वेदवतीरम्भादि महिलारत्नानि घर्षयितुमारेभे ॥

धर्मविरुद्धस्य प्रतिषिद्धस्य भोगानुभवस्य लालसा तं भीरुं कारयामास ॥ यद्यपि रामलक्ष्मणौ मनुष्याधमौ इत्यवहेलनया दृष्टवान् तथापि ताभ्यां सह स्वाभिमानरक्षार्थमवश्यं युद्धे कर्तव्ये सति तयोः युद्धाह्वानं कर्तुमथवा तयोराह्वानं स्वीकर्तुं प्रतियोद्धुं वा धैर्यवान् नाभवत् ।

श्रियः परमोच्चकाष्ठां समधिरूढवानपरो व्यक्तिविशेष आसीद्वानरराजो वाली ॥ मृत्युश्य्ययां शयानं तमादिकविः महात्मेति संज्ञया विशिनष्टि ॥ परन्तु स्वभ्रातुर्व्यवहारमुदात्तपूर्वमवकलोकयितुं न समर्थ आसीत् सः ॥ प्रत्युत भातरं स्वराष्ट्रान्निष्कास्य तत्पत्नीमपि स्वायस्तीचकार वानरराजः ॥ तस्मात् कारणात् धार्मिकाद् व्यवहारान् बहुमन्यमानानां जनानां पुरतः स अधोनिपपातेति वक्तव्यं ॥ एतस्मात् कारणादेव रामोऽपि तस्य स्वभावविशेषं धिक्कर्तुं शक्नोति स्म ॥

कस्मिन्नेव समाजे कीदृशेपि वातावरणे कोपि स्वप्रयत्नेन परमोच्चां काष्ठां प्राप्तुं प्रभवतीति वाल्मीकिना प्रमाणीक्रियते ॥ तत्र हनूमतो निदर्शनमपि तेन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रदीयते ॥ राक्षससमाजेऽपि विभीषणसदृशो कल्याणगुणवान् श्रद्धानिरतः कश्चन सात्विकः उत्पन्नोभवत् ॥ किंवा विभीषण ईषत् स्वार्थसिद्धिप्रेरितोप्यासीदित्येष प्रश्नः सकृच्चर्चविषय एव ॥ यद्यपि बहवो व्यख्यातारस्तादृशाद्दोषारोपणात्तं निर्मुक्तमेवाकुर्वन् तथापि तस्याचरितानि न्याय्यीकर्तुं शक्यानीत्येतत् सन्दिग्धमेव ॥ ज्यायसि भ्रातरि विद्यमाने स्वयमेव राज्याभिषेचने विधेयीकरणात् लङ्कासिंहासनप्रप्तिप्रलोभनेनापि स किं न प्रेरित इति प्रश्न आपतति ॥ यत् सत्यं यदि रावणो धर्मानुसारेण शासनं कुर्वन्नवर्तिष्यत तर्हि महत्वाकांक्षायाः विधेयो नाऽभविष्यत् ॥ किन्तु लङ्का दुराचारस्य दुष्कृत्यस्य आवासः संजात एव ॥ लङ्काया एकमात्र आशाबन्धः विभीषणोन्मुख एव समवर्तत । तथापि भाविपौराणं दृष्टौ तस्य स्वभावशुद्धौ कञ्चित्कलङ्कलेशं विन्यसति स्म ॥

स्वकीयया यमनियमादिनिष्ठया संयमेन च वैशिष्ट्यस्य परमां काष्ठां प्राप्तवान् पात्रविशेषो हनूमान् ॥ प्राथमिके एव समागमे राममुखादुत्कृष्टानि प्रशंसावचनानि श्रोतुं यदाञ्जनेयोऽर्हति स्म तेन तस्य प्रज्ञास्तरोत्युच्चतरोऽवश्यं भवेत् ॥ अवश्यमेवाधीतवेदवेदांगेनापि तेनाभूयतेति सुस्फुटम् । तस्य शारीरिकप्रयत्नसंसाधितानां महतां कर्मणां वर्णनैः रामायणकाव्यं परिपूरितमेव ॥ एकमात्रोल्लंघनेन शतयोजनविस्तीर्णस्य पारावारस्य तरणमवश्यमतिमहनीयं कर्म एव ॥ हिमाचलमुत्प्लुत्य संजीवन्यौषधियुक्तपर्वतमेकस्मिन् हस्ते निधाय प्रत्यागमनं ततोपि महत्तरं कर्म संसिद्धं । बहूनां राक्षससेनाधिपानां रावणस्य पुत्रद्वयस्य च निहतिं कृतवान् सः ॥ तथापि पश्चाद्रचितेषु ग्रन्थेषु यादृशीमसूयार्हं स्थितिं सोलभत तादृशीं वाल्मीविरामायणे नैव प्राप्तवान् ॥ यदा वाली जीवन्नासीत् तदा सर्वेषामुपरि तस्य प्रभावः व्यापृत आसीत् ॥ रावणमपि स प्रह्वीचकार ॥ कुम्भकर्णस्य रावणस्य वा प्रतिद्वन्दित्वेन हनूमानात्मानं नालभत ॥ तथाप्यवश्यमेव विक्रमशालित्वेनाजय्यत्वेन च तस्य वर्णनं सम्यग् क्रियमाणमभवत् ॥ संभवत एष पश्चात्कालिको विकासविषयः । परन्तु तस्य सुदृढया रामभवक्त्याः कारणेन वाल्मीकिः हनूमन्तमत्युच्चपदवीमारोपयति । वानरपरिवारसंभूतत्वेपि स दैविकस्थानविशेषं प्राप्नोति यद्यप्येष विषयो वाल्मीकिरामायणे स्पष्टतया न प्रतिपादितः ॥

देवैः कर्तुं दुश्शकस्य महतः कर्मणः न केवलं साधनेन अपि तु धर्मस्थिरत्वेन चात्मानमिक्ष्वावुषु श्रेष्ठतमं रामः प्रमाणीचकार ॥ मारीचसदृशास्तस्य शत्रवोपि रामं विग्रहवान् धर्म इत्यकथयन् ॥ एतदवश्यं श्रद्धार्हं यत् वाल्मीकिकृतो धार्मिकत्वप्रचारः केवलं व्यक्तिविशेषमुखेनैवास्ति न तु समाजविशेषकथनद्वारा ॥ न कोपि समाजः परिवारो वा तस्य दृष्टौ सर्वथा श्रेष्ठः ॥

भ्रातृषु न कोऽपि द्वितीयां पत्नीं न स्वीचकार कस्याऽपि सीतयोक्तेषु त्रिषु

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यसनेषु द्वितीयस्य व्सनस्य विचारलेशोप्यवर्तत ॥ एतस्मिन् विषये प्रायशः, तत्कालभवैः नृपैः दशरथेन च तारतम्ये कृते तेषां गठनमन्यादृशमेव । रामस्य धर्मस्य यादृशी सादरा प्रसक्तिरासीत् तथैवाधर्मभीरुत्वमपि सुव्यक्तमेव ।

विग्रहवान् धर्म इति शत्रुणाप्युद्घोषितस्य कस्यचहादर्शपुरुषस्य रुपेणैव रामं चित्रीकृतवान् वाल्मीकिः । ईदृशस्यार्शपुषस्य पदमनुगच्छतां मानवानां अत्युन्नतपदवीप्राप्तिः सुकरा भविष्यति इत्यादिकविना सङ्कल्पितं स्यात ।

प्रसन्नमूर्तिस्समुदारचेतः
वंशभिमानः शुभवाग्विलासः ।
अनीति भीतिर्गुरुसाधुनम्रः
साम्राज्यलक्ष्मीं लभते मनुष्यः ॥

॥शुभमस्तु ॥

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya ★ Bharatiya Vidya
551

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)